यदि हि मातापितरौ गर्भं जनयेतां, भूयस्यः स्त्रियः पुमांसश्च भूयांसः पुत्रकामाः, ते सर्वे पुत्रजन्माभिसन्धाय मैथुनधर्ममापद्यमानाः पुत्रानेव जनयेयुर्दुहितॄर्वा दुहितृकामाः, न तु काश्चित् स्त्रियः केचिद्वा पुरुषा निरपत्याः स्युरपत्यकामा वा परिदेवेरन् ॥ (२) ॥

यदि हि જો यदि, मातापितरौ માતાપિતા माता-पिता, गर्भम् ગર્ભને गर्भको, जनयेताम् ઉત્પન્ન કરતાં હોય તો उत्पन्न करते हों तो, भूयस्यः ઘણીયે बहुतसी, स्त्रियः સ્ત્રીઓ स्त्रियां, भूयांसः અને ઘણાયે और बहुतसे, पुमांसः च પુરુષો पुरुष, पुत्रकामाः પુત્રની કામનાવાળા હોય છે पुत्रकी कामनावाले होते हैं, ते सर्वे તે સર્વ वे सब, पुत्रजन्म- પુત્રપ્રાપ્તિને पुत्रोत्पत्तिको, अभिसंधाय લક્ષમાં રાખીને लक्ष्य कर, मैथुनधर्मम् ગ્રામ્યધર્મનું मैथुनक्रियाको, आपद्यमानाः સેવન કરતા सेवन करते हुए, पुत्रान् एव પુત્રોનેજ पुत्रोंको ही, दुहितृकामाः वा અથવા દીકરીની ઇચ્છાવાળા और कन्याको चाहनेवाले, दुहितॄः દીકરીઓને पुत्रियोंको, जनयेयुः ઉત્પન્ન કરે उत्पन्न करें, कश्चित् વળી કોઈપણ और कोई भी, स्त्रियः સ્ત્રીઓ स्त्री, केचित् वा કે કોઈ પણ अथवा कोई भी, पुरुषाः પુરુષો पुरुष, निरपत्याः નિ:સંતાન निःसंतान, न तु स्युः न રહે न रहे, अपत्यकामाः અથવા સંતાનની કામનાવાળાઓ अथवा संतानकी कामनावाले, (न) परिदेवेरन् વિલાપ ન કરે न रोवें ॥ (२) ॥

4-(2). If the mother and father could bring about the conception, then seeing that most men and women desire sons, all of them, with a view to begetting sons, would, by resorting to cohabitation, procreate sons alone. Or those desirous of daughters would procreate daughters alone Neither would there be any childless men or women, nor would persons desiring progeny go about disconsolate.

न चात्माऽऽत्मानं जनयति। यदि ह्यात्माऽऽत्मानं जनयेज्जातो वा जनयेदात्मानमजातो वा, तच्चोभयथाऽप्ययुक्तम्। न हि जातो जनयति सत्त्वात्, न चाजातो जनयत्यसत्त्वात्, तस्मादुभयथाऽप्यनुपपत्तिः।

आत्मा च આત્મા आत्मा, आत्मानम् આત્માને आत्माको (अपनेको), न जनयति ઉત્પન્ન કરતો નથી उत्पन्न नहीं करता, यदि हि જો यदि, आत्मा આત્મા आत्मा, आत्मानम् આત્માને आत्माको, जनयेत् ઉત્પન્ન કરે છે તો उत्पन्न करता है तो, जातः वा ઉત્પન્ન થયેલો આત્મા उत्पन्न हुआ आत्मा, आत्मानम् આત્માને आत्माको (अपनेको), जनयेत् ઉત્પન્ન કરે છે उत्पन्न करता है, अजातः वा અથવા ન ઉત્પન્ન થયેલો આત્મા આત્માને ઉત્પન્ન કરે છે? अथवा न उत्पन्न हुआ आत्मा आत्माको उत्पन्न करता है?, तत् च તે वह, उभयथा બન્ને રીતે दोनों तरहसे, अपि પણ भी, अयुक्तम् युक्तिसंगत નથી ठीक नहीं है, हि કારણકે क्योंकि, सत्त्वात् વિદ્યમાન હોવાથી विद्यमान होनेसे, जातः ઉત્પન્ન થયેલો આત્મા उत्पन्न हुआ आत्मा, न जनयति પોતાને ઉત્પન્ન કરતો નથી अपनेको नहीं उत्पन्न करता, असत्त्वात् च અને અવિદ્યમાન હોવાથી और विद्यमान न होनेसे, अजातः નહિ ઉત્પન્ન થયેલો આત્મા नहीं उत्पन्न हुआ आत्मा, न जनयति પોતાને ઉત્પન્ન કરતો નથી अपनेको नहीं उत्पन्न करता, तस्मात् તેથી इस लिए, उभयथा अपि બન્ને રીતે પણ दोनों तरहसे भी, अनुपपत्तिः ઘટતું નથી युक्ति नहीं बैठती;

४-(२). स्युरपत्यकामा वा परिदेवेरन्–स्युः न चापत्यकामाः परिदेवेरन् (ध.)

४-(३) °प्ययुक्तम्–°प्यनुपपन्नम् (फ)

,, तस्मादुभयथा–तस्मादेवोभयथा (द.)

4-(3). Nor again does the spirit beget itself. If, indeed, the spirit engenders itself, it must do so, being already born, or in the alternative being yet unborn. Both alternatives are untenable. Nothing that is already created can be said to engender itself for the reason that it already exists. nor, again, can an unborn thing be said to engender itself, for the reason that it does not exist. Either way the position is untenable.

तिष्ठतु तावदेतत्। यद्ययमात्माऽऽत्मानं शक्तो जनयितुं स्यात्, न त्वेनमिष्टास्वेव कथं योनिषु जनयेद्वशिनमप्रतिहतगतिं कामरूपिणं तेजोबलजववर्णसत्त्वसंहननसमुदितमजरमरुजममरम् ; एवंविधं ह्यात्माऽऽत्मानमिच्छत्यतो वा भूयः ॥(३)॥

एतत् એ દલીલ इसे भी, **तावत् तिष्ठतु** રહેવા દઈએ रहने दो, **यदि** જો यदि, **अयम् आत्मा** આ આત્મા यह आत्मा, **आत्मानम्** આત્માને (પોતાને) आत्माको (अपनेको), **जनयितुम्** ઉત્પન્ન કરવા उत्पन्न करनेके लिए, **शक्तः स्यात्** સમર્થ હોય તો शक्तिमान हो तो, **एनम्** એને इसे, **इष्टासु** ઇષ્ટ इष्ट, **योनिषु एव** યોનિઓમાંજ योनियोंमें ही, **वशिनम्** વશી वशी, **अप्रतिहतगतिम्** અનિયન્ત્રિત ગતિવાળો अरुद्ध गतिवाला, **कामरूपिणम्** યથેચ્છ રૂપવાળો यथेच्छ रूपवाला, **तेजः** તેજ तेज, **बल**- બળ बल, **जव**- વેગ वेग, **वर्ण**- વર્ણ वर्ण, **सत्त्व**- મન मन, **संहनन**- અને બાંધાથી और गठनसे, **समुदितम्** યુક્ત युक्त, **अजरम्** અજર अजर, **अरुजम्** નીરોગ नीरोग, **अमरम्** તેમજ અમર एवं मृत्युरहित, **कथम्** કેમ क्यों **न** ન न, **जनयेत्** ઉત્પન્ન કરે? पैदा करे?, **हि** કારણકે क्योंकि, **आत्मा** આત્મા आत्मा, **आत्मानम्** પોતાને अपनेको, **एवंविधम्** એવો इस तरहका, **वा** અથવા अथवा, **अतः भूयः** એથી પણ અધિક ગુણોથી યુક્ત इससे भी अधिक गुणोंसे युक्त, **इच्छति** ચાહે છે चाहता है ॥ (३) ॥

४-(३) न त्वेनम्—न त्वेवम् (च.)

4-(4). Let us leave it at that. But even if the spirit is capable of engendering itself, why does it not reproduce itself exclusively in desirable wombs, possessed of lordship, unrestrained movement, protean power, and compounded of splendour, strength, speed, complexiou, intelligence and compactness of limbs and exemption from decay, disease and death? For thus the spirit would wish itself or indeed better than thus.

असात्म्यजश्चायं गर्भः। यदि हि सात्म्यजः स्यात्, तर्हि सात्म्यसेविनामेवैकान्तेन प्रजा स्यात्, असात्म्यसेविनश्च निखिलेनानपत्याः स्युः, तच्चोभयमुभयत्रैव दृश्यते ॥ (४) ॥

अयम् च આ यह, **गर्भः** ગર્ભ गर्भ, **असात्म्यजः** સાત્મ્યથી પણ ઉત્પન્ન થતો નથી सात्म्यज भी नहीं, **हि** કારણકે क्योंकि, **यदि** જો यदि, **सात्म्यजः स्यात्** એ સાત્મ્યથી ઉત્પન્ન થતો હોય वह सात्म्यसे उत्पन्न होता हो, **तर्हि** તો तो, **सात्म्यसेविनाम्** સાત્મ્ય સેવનારાઓને सात्म्य सेवन करने वालोंको, **एव** ફક્ત ही, **एकान्तेन** અવશ્ય अवश्य, **प्रजा** પ્રજા संतान, **स्यात्** થાય होवे, **असात्म्यसेविनः च** અને અસાત્મ્ય સેવનારા और असात्म्य सेवन करनेवाले, **निखिलेन** સર્વથા सर्वथा, **अनपत्याः** સંતાનરહિત निःसंतान, **स्युः** હોય हों, **तत् च** પરંતુ તે પ્રજાસહિતપણું તથા પ્રજારહિતપણું परन्तु वे सप्रज होना तथा अप्रज होना, **उभयम्** બંને दोनों, **उभयत्र एव** બંનેય સાત્મ્ય સેવીમાં તથા અસાત્મ્ય સેવીમાં दोनों ही सात्म्यसेवीमें तथा असात्म्यसेवीमें, **दृश्यते** જોવામાં આવે છે देखे जाते हैं ॥ (४) ॥

4-(5). Nor is the conception born of concordance. If indeed it be born of concordance, then to those exclusively who observe this concordance of diet and behaviour, there should be

offspring and those whose lives are not so regulated should all be without issue. As a matter of fact both these couditions i. e. fertility and sterility are seen alike in both classes.

अरसजश्चायं गर्भः। यदि हि रसजः स्यात्, न केचित् स्त्रीपुरुषेष्वनपत्याः स्युः, न हि कश्चिदस्त्येषां यो रसान्नोपयुङ्क्ते; श्रेष्ठरसोपयोगिनां चेद्गर्भा जायन्त इत्यभिप्रेतमिति, एवं सत्याजौरभ्रमार्गमायूरगोक्षीरदधिघृतमधुतैलसैन्धवेक्षुरस-मुद्गशालिभृतानामेवैकान्तेन प्रजा स्यात्, श्यामाकवरकोद्दालककोरदूषककन्दमूलभक्षाश्च निखिलेनानपत्याः स्युः, तच्चोभयमुभयत्र दृश्यते ॥ (५)॥

अयम् च આ यह, गर्भः ગર્ભ गर्भ, अरसजः રસજન્ય પણ નથી रसज भी नहीं, हि કારણકે क्योंकि, यदि જો यदि, रसजः स्यात् તે રસજન્ય હોય તો रसज हो तो, स्त्रीपुरुषेषु સ્ત્રીપુરુષમાં स्त्रीपुरुषोंमें, केचित् કોઈ कोई, अनपत्याः નિઃસન્તાન सन्तानरहित, न स्युः ન હોય न हों, हि કારણકે क्योंकि, एषाम् એઓમાં इनमेंसे, कश्चित् કોઈ कोई भी, न अस्ति એવો નથી ऐसा नहीं है, यः જે जो, रसान् રસોનો रसोंका, न उपयुङ्क्ते ઉપયોગ ન કરતો હોય उपयोग न करता हो, श्रेष्ठरस-उपयोगिनाम् શ્રેષ્ઠરસનો ઉપયોગ કરનારનેજ श्रेष्ठरसोंका उपयोग करनेवालोंके, गर्भाः ગર્ભ गर्भ, जायन्ते ઉત્પન્ન થાય છે उत्पन्न होते हैं, इति એવો ऐसा, अभिप्रेतम् અભિપ્રાય अभिप्राय, इति चेत् હોય તો हो तो, एवम् सति એ સ્થિતિમાં ऐसी स्थितिमें, आज- બકરા बकरे, औरभ्र- મેંઢા मेड, मार्ग-मायूर- મૃગ અને મોરના માંસનો રસ मृग और मयूरके मांसका रस, गो- ગાયનાં गौके, क्षीर-दधि-घृत- દૂધ દહીં અને ઘી दूध दही तथा घी, मधु-तैल-सैन्धव- મધ-તેલ-સૈન્ધવ शहद-तैल-सैन्धव, इक्षुरस- શેરડીનો રસ इक्षुरस, मुद्ग-शालि भृतानाम् મગ અને શાળના ચોખા એઓથી પોષણ પામેલા મનુષ્યોને मूंग और शालि चावल इनसे पोषणको प्राप्त हुए मनुष्योंके, एव જ ही, एकान्तेन અવશ્ય अवश्य, प्रजा પ્રજા संतान, स्यात् થાય हों, श्यामाक- તેમજ સામો एवं श्यामाक, वरक- વરક वरक, उद्दालक- ઉદ્દાલક उद्दालक, कोरदूषक- કોદરા कोद्रव, कन्द-मूल- કન્દ અને મૂળ कन्द और मूल, भक्षाः च ખાનારા મનુષ્યો खानेवाले मनुष्य, निखिलेन સર્વથા संपूर्णतया, अनपत्याः નિઃસન્તાન निःसन्तान, स्युः રહે रहें, तत् च પરંતુ તે પ્રજાસહિતપણું તથા પ્રજારહિતપણું परन्तु वे सप्रज होना तथा अप्रज होना, उभयत्र બન્ને શ્રેષ્ઠરસસેવીમાં તથા અશ્રેષ્ઠરસસેવીમાં दोनों श्रेष्ठरससेवीमें तथा अश्रेष्ठरससेवीमें, दृश्यते જોવામાં આવે છે देखे जाते हैं ॥(५)॥

4-(5). Nor is the conception born of nourishment. If it is indeed born of nourishment, then none among men and women should be childless, for there is no such among them who does not imbibe some kind of nourishment. If you say that what is meant is that to those alone who avail themselves of the best kind of nourishment children are born, even so, only those who are nourished on the meat of goats, sheep, deer, peafowl and on cow's milk, curds, ghee, honey, til oil, rock-salt, juice of the sugar-cane, green gram and sali rice, should have children; while those who eat millet, varaka, wild millet, common millet, bulbs and roots, should all of them be childless. Both conditions, again, are seen in both classes.

न खल्वपि परलोकादेत्य सत्त्वं गर्भमवक्रामति,

४.-(५) अरसजश्चायं- न रसजश्चायं (द.)
,, श्यामाकवरकोद्दालक–श्यामाककोद्रवकोद्दालक (ख.)
,, मायूर°–मायूररस° (घ. च. छ.)
,, कन्दमूल°–कन्दमूलफल° (च.)
,, कन्दमूलभक्षाः – कन्दमूलफलभक्ष्याः (छ.)

यदि ह्येनमवक्रामेत्, नास्य किञ्चित् पौर्वदेहिकं स्यादविदितमश्रुतमदृष्टं वा, स च तच्च न किञ्चिदपि स्मरति ॥ (६)॥

सत्त्वम् મન मन, परलोकात् પરલોકમાંથી परलोकसे, एत्य આવીને आ कर, गर्भम् ગર્ભમાં गर्भमें, न खलु अपि अवक्रामति ઉતરતું નથી नहीं उतरता, यदि हि જો यदि, एनम् તે એ ગર્ભમાં वह इस गर्भमें, अवक्रामेत् ઉતરે તો उतरता हो तो, अस्य એને इस गर्भको, पौर्वदेहिकम् પૂર્વ દેહનું पूर्व देहका, किञ्चित् કાંઈપણ कुछ भी अविदितम् અજ્ઞાત अज्ञात, अश्रुतम् અશ્રુત अश्रुत, वा કે अथवा, अदृष्टम् અદૃષ્ટ अदृष्ट, न स्यात् ન હોય न हो, सः च પણ તેને किन्तु उसको, तत् च તે वह, किंचित् अपि કાંઈ પણ कुछ भी, न स्मरति યાદ આવતું નથી स्मरणमें नहीं आता ॥ (६) ॥

4-(6). Nor, in fact, does a mind, coming from another world, enter into the embryo. For, if the mind thus enters into the embryo, there should be nothing unknown, unheard or unseen pertaining to its previous incarnation. As a matter of fact one does not recollect anything of that kind.

तस्मादेतद् ब्रूमहे-अमातृजश्चायं गर्भोऽपितृजश्चानात्मजश्चासात्म्यजश्चारसजश्च, न चास्ति सत्त्वमौपपादुकमिति (होवाच भरद्वाजः) ॥ (४)॥

तस्मात् તેથી इस लिए, एतद् ब्रूमहे અમે આ વસ્તુ કહીએ છીએ કે हम इस बातको कहते हैं कि, अयम् આ यह, गर्भः ગર્ભ गर्भ, अमातृजः च માતૃજ નથી मातृज नहीं, अपितृजः च પિતૃજ નથી पितृज नहीं, अनात्मजः च આત્મજ નથી आत्मज नहीं, असात्म्यजः च સાત્મ્યજ નથી सात्म्यज नहीं, अरसजः च અને રસજ પણ નથી और रसज भी नहीं, सत्त्वम् च વળી મન और मन, औपपादुकम् इति બીજા શરીરથી સંબંધ કરનારું दूसरे शरीरसे सबन्ध करनेवाला, न अस्ति નથી नहीं, (भरद्वाजः ભરદ્વાજે भरद्वाजने, उवाच એમ કહ્યું ऐसा कहा ॥ ४ ॥

4. Therefore do we assert this; The embryo is not born of the mother, nor of the father, nor of the spirit, nor of the concordance nor of the nourishment. Nor is there a mind which is the connecting agent. Thus declared Bharadwaja.

आत्रेयेण कृतं तत्समाधानम्—

नेति भगवानात्रेयः, सर्वेभ्य एभ्यो भावेभ्यः समुदितेभ्यो गर्भोऽभिनिर्वर्तते ॥ ५ ॥

भगवान् ભગવાન भगवान, आत्रेयः આત્રેયે કહ્યું आत्रेयने कहा, न इति એમ નથી ऐसा नहीं, एभ्यः આ इन, सर्वेभ्यः સર્વ सब, समुदितेभ्यः એકઠા થયેલા मिलित, भावेभ्यः ભાવોથી भावोंसे, गर्भः ગર્ભ गर्भ, अभिनिर्वर्तते ઉત્પન્ન થાય છે बनता है ॥ ५ ॥

5. The sage Atreya replied; "No, for the embryo arises from all these factors acting together."

गर्भस्य मातृजत्वप्रतिपादनं, मातृजा भावाश्च—

मातृजश्चायं गर्भः । न हि मातुर्विना गर्भोत्पत्तिः स्यात्, न च जन्म जरायुजानाम् । यानि खल्वस्य गर्भस्य मातृजानि, यानि चास्य मातृतः संभवतः संभवन्ति, तान्यनुव्याख्यास्यामः;

अयम् આ यह, गर्भः च ગર્ભ गर्भ, मातृजः માતૃજ છે मातृज है, हि કારણકે क्योंकि, मातुः विना માતા વિના माताके बिना, गर्भोत्पत्तिः ગર્ભની ઉત્પત્તિ गर्भकी उत्पत्ति, न स्यात् ન થાય न हो सके, जरायुजानाम् च તથા જરાયુજ પ્રાણીઓને और जरायुज प्राणियोंका, जन्म न જન્મ પણ ન થાય जन्म भी न हो सके, अस्य આ इस, गर्भस्य खलु ગર્ભના गर्भके, यानि જે માતૃજ ભાવો છે जो मातृज भाव हैं, संभवतः

४-(६) ह्येनमवक्रामेत्,-ह्येवमवक्रामेद् (क.)
,, किञ्चित्-किञ्चिदेव (छ.)
४. तस्मादेतद् ब्रूमहे—तस्मादेतद्वोनाम (क.)

अर्थात् ઉત્પન્ન થતા अर्थात् उत्पन्न होते हुए, **अस्य** આ ગર્ભના इस गर्भके, **यानि** જે ભાવો जो भावों, **मातृतः च** માતાના બીજથી माताके बीजसे, **संभवन्ति** ઉત્પન્ન થાય છે उत्पन्न होते हैं, **तानि** તેઓનું उनका, **अनुव्याख्यास्यामः** વ્યાખ્યાન કરશું व्याख्यान करेंगे;

6-(1). In one sense, the embryo is born of the mother. For, surely, there is no conception in the absence of the mother nor without her is the birth possible of the viviparous class of creatures. We shall now enumerate the mother-engendered parts of the embryo, that is, those which pass to the embryo during its formation from the mother.

तद्यथा—त्वक् च लोहितं च मांसं च मेदश्च नाभिश्च हृदयं च क्लोम च यकृच्च प्लीहा च वृक्कौ च बस्तिश्च पुरीषाधानं चामाशयश्च पक्वाशयश्चो-त्तरगुदं चाधरगुदं च क्षुद्रान्त्रं च स्थूलान्त्रं च वपा च वपावहनं चेति (मातृजानि) ॥ ६ ॥

तत् यथा જેમકે जैसे कि, **त्वक् च** ત્વચા त्वचा, **लोहितम् च** રક્ત रक्त, **मांसम् च** માંસ मांस, **मेदः च** મેદ मेद, **नाभिः च** નાભિ नाभि, **हृदयम् च** હૃદય हृदय, **क्लोम च** ક્લોમ क्लोम, **यकृत् च** યકૃત્ यकृत्, **प्लीहा च** પ્લીહા प्लीहा, **वृक्कौ च** બે વૃક્કો दोनों वृक्क, **बस्तिः च** બસ્તિ बस्ति (मूत्राशय), **पुरीषाधानम् च** પુરીષાધાન पुरीषाधान, **आमाशयः च** આમાશય आमाशय, **पक्वाशयः च** પક્વાશય पक्वाशय, **उत्तरगुदम्** ઉત્તરગુદા उत्तरगुद, **अधरगुदम् च** અધરગુદા अधरगुद, **क्षुद्रान्त्रम् च** નાનાં આંતરડાં क्षुद्रान्त्र, **स्थूलान्त्रम् च** મોટાં આંતરડાં स्थूलान्त्र, **वपा च** વપા वपा, **वपावहनम् च इति** અને વપાવહન और वपावहन, (मातृजानि માતૃજ છે मातृज हैं) ॥ ६ ॥

१. उत्तरगुदं—उत्तरगुदश्च (थ.)
,, अधरगुदं—अधरगुदश्च (थ.)

6. These are—the blood, flesh, and fat, the umbilicus, the heart, the kloman, the liver, the spleen, kidneys, bladder, pelvic colon and stomach, the colon, the rectum and the anus, the small intestine, the large intestine, the omentum and mesentery.

गर्भस्य पितृजत्वप्रतिपादनं, पितृजा भावाश्च—

पितृजश्चायं गर्भः। नहि पितुर्ऋते गर्भोत्पत्तिः स्यात्, न च जन्म जरायुजानाम्। यानि खल्वस्य गर्भस्य पितृजानि, यानि चास्य पितृतः संभवतः संभवन्ति, तान्यनुव्याख्यास्यामः;

अयम् આ यह, **गर्भः** ગર્ભ गर्भ, **पितृजः च** પિતૃજ પણ છે पितृज भी है, **हि** કારણકે क्योंकि, **पितुः ऋते** પિતા વિના पिताके बिना, **गर्भोत्पत्तिः** ગર્ભની ઉત્પત્તિ गर्भोत्पत्ति, **न स्यात्** ન થાય न हो सके, **जरायुजानाम् च** અને જરાયુજોના और जरायुजोंका, **जन्म न** જન્મ પણ ન થાય जन्म भी न हो सके, **अस्य** આ इस, **गर्भस्य खलु** ગર્ભના गर्भके, **यानि** જે जो, **पितृजानि** પિતૃજ ભાવો છે पितृज भाव हैं, **संभवतः** અર્થાત્ ઉત્પન્ન થતા अर्थात् उत्पन्न होते हुए, **अस्य** આ ગર્ભના इस गर्भके, **यानि** જે ભાવો जो भावों, **पितृतः च** પિતાના શુક્રથી पिताके शुक्रसे, **संभवन्ति** ઉત્પન્ન થાય છે उत्पन्न होते हैं, **तानि** તેઓનું उनका, **अनुव्याख्यास्यामः** વ્યાખ્યાન કરશું व्याख्यान करेंगे;

7-(1). In one sense the embryo is born of the father, also. For in the absence of the father, there is no conception too, nor without him is the birth possible of the viviparous class of creatures. We shall now enumerate the father-engendered parts of the embryo, that is, those that pass to the embryo during its formation, from the father.

तद्यथा—केशश्मश्रुनखलोमदन्तास्थिसिरास्नायुधमन्यः शुक्रं चेति (पितृजानि) ॥ ७ ॥

तत् यथा જેમકે जैसे कि, केश- કેશ केश, श्मश्रु દાઢી-મૂછ दाढी-मूंछ, नख- નખ नख, लोम- રૂંવાડાં लोम, दन्त- દાંત दान्त, अस्थि- હાડકાં हड्डियां, सिरा- સિરા सिराएं, स्नायु- સ્નાયુ स्नायु, धमन्यः ધમની धमनियां, शुक्रम् च इति અને શુક્ર और वीर्य, (पितृजानि પિતૃજ છે पितृज हैं) ॥ ७ ॥

7-(2). These are the hair of the head and beard, nails, hair of the body, teeth, bones, veins, sinews, arteries and semen.

गर्भस्यात्मजत्वप्रतिपादनम्, आत्मजा भावाश्च—

आत्मजश्चायं गर्भः। गर्भात्मा ह्यन्तरात्मा यः, तं 'जीव' इत्याचक्षते शाश्वतमरुजमजरममरमक्षयमभेद्यमच्छेद्यमलोड्यं विश्वरूपं विश्वकर्माणमव्यक्तमनादिमनिधनमक्षरमपि ।

अयम् આ यह, गर्भः ગર્ભ गर्भ, आत्मजः આત્મજ आत्मज, च પણ છે भी है, हि કારણકે क्योंकि, यः જે जो, अन्तरात्मा અન્તરાત્મા કહેવાય છે अंतरात्मा कहाता है, गर्भात्मा તે ગર્ભાત્મા છે वह गर्भात्मा है, शाश्वतम् નિત્ય नित्य, अरुजम् વેદનારહિત नीरोग, अजरम् અજર अजर, अमरम् અમર अमर, अक्षयम् અક્ષય अक्षय, अभेद्यम् અભેદ્ય अभेद्य, अच्छेद्यम् અચ્છેદ્ય अच्छेद्य, अलोड्यम् અક્ષોભ્ય अक्षोभ्य, विश्वरूपम् વિશ્વરૂપ विश्वरूप, विश्वकर्माणम् વિશ્વકર્મા विश्वकर्मा, अव्यक्तम् અવ્યક્ત अव्यक्त, अनादिम् અનાદિ अनादि, अनिधनम् મૃત્યુરહિત मृत्युरहित, अक्षरम् अपि અને અક્ષર और अक्षर, तम् તે ગર્ભાત્માને उस गर्भात्माको, 'जीवः' 'જીવ' 'जीव', इति એમ ऐसा, आचक्षते કહે છે कहते हैं;

8-(1). In one sense, the embryo is born of the spirit also. The embryonic spirit is the same as the in-dwelling spirit. It is called the embodied soul, eternal, diseaseless, ageless, deathless, undecaying, indivisible, unsunderable, immovable, omniform, omnifunctional, invisible, beginningless, endless and immutable.

९. अच्छेद्यमलोड्यं-अच्छेद्यमलोठ्यं (ख.)

स गर्भाशयमनुप्रविश्य शुक्रशोणिताभ्यां संयोगमेत्य गर्भत्वेन जनयत्यात्मनाऽऽत्मानम्, आत्मसंज्ञा हि गर्भे। तस्य पुनरात्मनो जन्मानादित्वान्नोपपद्यते, तस्मान्न जात एवायमजातं गर्भं जनयति, अजातो ह्ययमजातं गर्भं जनयति; स चैव गर्भः कालान्तरेण बालयुवस्थविरभावान् प्राप्नोति, स यस्यां यस्यामवस्थायां वर्तते तस्यां तस्यां जातो भवति, या त्वस्य पुरस्कृता तस्यां जनिष्यमाणश्च, तस्मात् स एव जातश्चाजातश्च युगपद्भवति; यस्मिंश्चैतदुभयं संभवति जातत्वं जनिष्यमाणत्वं च स जातो जन्यते, स चैवानागतेष्ववस्थान्तरेष्वजातो जनयत्यात्मनाऽऽत्मानम्।

सः તે જીવ वह जीव, गर्भाशयम् ગર્ભાશયમાં गर्भाशयमें, अनुप्रविश्य પ્રવેશ કરીને प्रविष्ट हो कर, शुक्रशोणिताभ्याम् શુક્ર અને શોણિત સાથે शुक्रशोणितसे, संयोगम् एत्य સંયોગ પામીને मिल कर, आत्मानम् પોતાને अपनेको, आत्मना પોતાથી अपनेसे, गर्भत्वेन ગર્ભરૂપમાં गर्भरूपमें, जनयति ઉત્પન્ન કરે છે पैदा करता है, हि કારણકે क्योंकि, गर्भे આથીજ ગર્ભમાં इस लिए गर्भमें, आत्मसंज्ञा 'આત્મા' એ નામ છે

८. जन्मानादित्वात्—जन्मादिसत्त्वात् (इ. त.)

,, तस्मान्नजात एवायमजातं गर्भं जनयति, अजातो ह्ययमाजातं गर्भं जनयति;—तस्मादजात एवायमजातं गर्भं जनयति, जातोऽप्यजातं च गर्भं जनयति; (ब.)

,, न जात—अजात (च.)

,, अजातो ह्ययमजातं—जातोऽप्यजातं (द.)

,, प्राप्नोति—आप्नोति (त.)

,, ,, —अवाप्नोति (ब.)

,, यस्मिन्—तस्मिन् (छ.)

,, उभयं—उभयं युगपत् (च.)

'आत्मा' यह संज्ञा है, तस्य તે इस, आत्मनः पुनः આત્માનો आत्माका, अनादित्वात् અનાદિપણાને લીધે अनादि होनेसे, जन्म જન્મ जन्म, न उपपद्यते થઈ શકે નહિ नहीं हो सकता, तस्मात् તેથી इस लिए, जातः एव જન્મેલો उत्पन्न हुआ, अयम् આ આત્મા यह आत्मा, अजातम् ન જન્મેલા अजात, गर्भम् ગર્ભને गर्भको, न जनयति ઉત્પન્ન નથી કરતો उत्पन्न नहीं करता, अजातः हि પણ ન જન્મેલો परंतु अजात, अयम् આ આત્મા यह आत्मा, अजातम् ન જન્મેલા अजात, गर्भम् ગર્ભને गर्भको, जनयति ઉત્પન્ન કરે છે उत्पन्न करता है, सः च एव અને તે જ और वही, गर्भः ગર્ભ गर्भ, कालान्तरेण કાલાન્તરે कालान्तरसे, बाल- બાલ बाल, युव- યુવાન युवा, स्थविर- અને વૃદ્ધ और वृद्ध, भावान् અવસ્થાઓને अवस्थाओंको, प्राप्नोति પ્રાપ્ત કરે છે प्राप्त करता है, सः તે वह, यस्याम् यस्याम् જે જે जिस जिस, अवस्थायाम् અવસ્થામાં अवस्थामें, वर्तते હોય છે रहता है, तस्याम् तस्याम् તે તે અવસ્થામાં उस उस अवस्थामें, जातः ઉત્પન્ન उत्पन्न, भवति થાય છે એમ કહેવાય છે हुआ है ऐसा कहा जाता है, अस्य તેની इसकी, या तु पुरस्कृता જે ભવિષ્યની અવસ્થા છે जो भावी अवस्था है, तस्याम् તેમાં उसमें, जनिष्यमाणः च જન્મવાનો છે એમ કહેવાય છે उत्पन्न होनेवाला है ऐसा कहा जाता है, तस्मात् તેથી इस लिए, सः एव તે वही, जातः च જન્મેલો उत्पन्न, अजातः च અને ન જન્મેલો और अनुत्पन्न, युगपत् એકી સાથે एकसाथ, भवति બને છે होता है, यस्मिन् च અને જેમાં और जिसमें, जातत्वम् જન્મેલા હોવાનું जातत्व, जनिष्यमाणत्वम् च અને જન્મવાનું और जनिष्यमाणत्व, एतत् उभयम् એ બન્ને ભાવો ये दोनों, संभवति સંભવે છે संभवित हैं, सः તે वह, जातः જન્મેલો उत्पन्न हुआ, जन्यते ઉત્પન્ન થાય છે उत्पन्न होता है, सः च एव અને તે જ और वही, अनागतेषु ભવિષ્યની अनागत, अवस्थान्तरेषु જુદી જુદી અવસ્થાઓમાં अवस्थान्तरोंमें, अजातः અજાત આત્મા अनुत्पन्न आत्मा, आत्मना પોતાથી अपनेसे, आत्मानम् પોતાને अपनेको, जनयति ઉત્પન્ન કરે છે उत्पन्न करता है;

8-(2). The spirit, entering the womb and linking itself to the ovum fertilized by the sperm manifests itself as the embryo, for the appellation of the spirit in the embryo. To that spirit however, being beginningless, there cannot be any birth in the true sense. Therefore, it is not true to say that, being itself first born, it engenders the unborn embryo; but verily being itself unborn, it engenders the unborn embryo. The selfsame embryo, by the passage of time, reaches in turn, the condition of childhood, youth and old age; and in whichever condition it happens at the time to be, with reference to that condition it is said to-be-born; but with reference to that condition which is yet ahead, it is said to-be-born. Therefore the selfsame spirit is said to be born and unborn at the same time. In which thing both these predications are possible, namely having been and having yet to be born, that thing, when born, is said to be engendered, and that very thing, again, with regard to its future vicissitudes, being "unborn", engenders itself.

सतो ह्यवस्थान्तरगमनमात्रमेव हि जन्म चोच्यते तत्र तत्र वयसि तस्यां तस्यामवस्थायां; यथा—सतामेव शुक्रशोणितजीवानां प्राक् संयोगाद्गर्भत्वं न भवति, तच्च संयोगाद्भवति; यथा—सतस्तस्यैव पुरुषस्य प्रागपत्यात् पितृत्वं न भवति; तच्चापत्याद्भवति; तथा सतस्तस्यैव गर्भस्य तस्यां तस्यामवस्थायां जातत्वमजातत्वं चोच्यते ॥८॥

हि કેમકે क्योंकि, तत्र तत्र તે તે उस उस, वयसि વયમાં उम्रमें, तस्याम् तस्याम् તે તે उस उस, अवस्थायाम्

અવસ્થામાં अवस्थामें, **सतः** વિદ્યમાન विद्यमानकी, **अवस्थान्तरगमनमात्रम्** અવસ્થાન્તર-પ્રાપ્તિ अवस्थान्तरमें भी गमनमात्र, **एव हि** જ ही, **जन्म** જન્મ जन्म, **उच्यते च** કહેવાય છે कहलाता है, **यथा** જેમકે जैसे, **जीवानाम्** જીવ जीवके, **सताम् एव** વિદ્યમાન હોવાં છતાં विद्यमान ही, **शुक्र-शोणित-** શુક્ર-શોણિત शुक्र-शोणित, **संयोगात्** સંયોગથી संयोगसे, **प्राक्** પહેલાં पहले, **गर्भत्वम्** ગર્ભત્વ गर्भत्व, **न भवति** નથી नहीं, **तत् च** અને તે वह, **संयोगात्** સંયોગથી संयोगसे, **भवति** થાય છે होता है, **यथा** જેમકે जैसे, **तस्य एव** તે જ उसी, **पुरुषस्य** પુરુષ पुरुषके, **सतः** વિદ્યમાન હોવા છતાં विद्यमान होने पर भी, **अपत्यात् प्राक्** સંતાન થયા પહેલાં अपत्य होनेसे पहले, **पितृत्वम्** તેને પિતૃત્વ उसको पितृत्व, **न भवति** પ્રાપ્ત થતું નથી नहीं प्राप्त होता, **तत् च** અને તે પિતૃત્વ और वह पितृत्व, **अपत्यात्** સંતાન થવાથી अपत्य होनेसे, **भवति** પ્રાપ્ત થાય છે प्राप्त होता है, **तथा** તે પ્રમાણે इस प्रकार, **तस्य एव** તે જ उसी, **सतः** વિદ્યમાન विद्यमान, **गर्भस्य** ગર્ભનું गर्भका, **तस्याम्** तस्याम् તે તે उस उस, **अवस्थायाम्** અવસ્થામાં अवस्थामें, **जातत्वम्** જન્મેલાપણું जातत्व, **अजातत्वम् च** અને ન જન્મેલાપણું और अजातत्व, **उच्यते** કહેવામાં આવે છે कहा जाता है॥८॥

8-(3). The mere transition of an existent thing into another state is styled "birth" with reference to that new state or that new condition. Thus for instance, prior to their union, spermatazoa, ovum and the spirit, though existing all the time, do not attain the status of the embryo, but acquire it only after their union. Thus also, prior to the birth of a child, a man though existing all the time, has no claim to paternity, but it comes to him after the birth of the child. In the same manner, it is of the embryo, existing all the time, that the conditions of "having been born" and "having yet to be born" are predicated, with reference to a given situation.

न खलु गर्भस्य मातुर्न पितुर्न चात्मनः सर्वभावेषु यथेष्टकारित्वमस्ति; ते किंचित् स्ववशात् कुर्वन्ति, किंचित् कर्मवशात्, कचिच्चैषां करणशक्तिर्भवति, कचिन्न भवति ।

गर्भस्य खलु ગર્ભના गर्भके, **सर्वभावेषु** સર્વ ભાવોમાં सब भावोंमें, **न मातुः** નથી માતાને नहीं माताको, **न पितुः** નથી પિતાને नहीं पिताको, **न च आत्मनः** નથી આત્માને और नहीं आत्माको, **यथेष्टकारित्वम्** સ્વેચ્છાચારિત્વ यथेष्टकारिता, **अस्ति** હોતું होती है, **ते** તેઓ वे, **किंचित्** થોડું कुछ, **स्ववशात्** પોતાની ઇચ્છાથી अपनी इच्छासे, **किंचित्** અને થોડું और कुछ, **कर्मवशात्** કર્માધીન થઈને कर्मवश हो कर, **कुर्वन्ति** કરે છે करते हैं, **कचित् च** અને ક્યારેક और कहीं, **एषाम्** એઓને इनको, **करणशक्तिः** મન, બુદ્ધિ, ઇંદ્રિયાદિ કરણોની શક્તિ मन, बुद्धि, इन्द्रियादिक करणोंकी शक्ति, **भवति** હોય છે होती है, **कचित्** અને ક્યારેક और कहीं, **न भवति** નથી હોતી नहीं होती;

9-(1). However, neither the mother, nor the father, nor yet the spirit is in the total sense, an autonomous agent in the formation of the embryo. They (the mother etc.) act to some extent by themselves and to some extent under the compulsion of actions done in a former life; again sometimes they are equipped with the means and sometimes they are not.

यत्र सत्त्वादिकरणसंपत्तत्र यथाबलमेव यथेष्टकारित्वम्, अतोऽन्यथा विपर्ययः। न च करण-

---

९. न खलु—न तु खलु (ध.)
,, स्ववशात्—स्ववशाः (ध.)

दोषादकारणमात्मा संभवति गर्भजनने, दृष्टं चेष्टा योनिरैश्वर्यं मोक्षश्चात्मविद्भिरात्मायत्तम् ।

अत्र જ્યાં जहां, सत्त्वादिकरण- સત્ત્વાદિકરણની सत्त्वादिकरणोंकी, संपत् સંપત્તિ હોય છે सम्पन्नता होती है, तत्र ત્યાં वहां, यथाबलम् एव કરણના બળ પ્રમાણે જ करणबलके अनुसार ही, यथेष्टकारित्वम् યથેષ્ટકારિત્વ હોય છે यथेष्टकारिता होती है, अतः એથી इससे, अन्यथा ઉલટી સ્થિતિમાં अन्यथा, विपर्ययः વિપરીતતા હોય છે विपरीतता होती है, करणदोषात् અને કરણના દોષને લીધે करणदोषसे, गर्भजनने ગર્ભોત્પત્તિમાં गर्भोत्पत्तिमें, आत्मा આત્મા आत्मा, अकारणम् અકારણ अकारण, न संभवति च નથી नहीं होता, आत्मविद्भिः આત્મજ્ઞાનીઓએ आत्मज्ञानियोंने, इष्टा योनिः ઇષ્ટ યોનિ इष्ट योनि, ऐश्वर्यम च ઐશ્વર્ય ऐश्वर्य, मोक्षः च અને મોક્ષને और मोक्षको, आत्मायत्तम् આત્માધીન अपने अधीन, दृष्टम् માન્યા છે देखा है;

9-(2). Where there is the conjunction of means such as the mind etc., there the autonomy of the agent is limited only by the scope of the instruments; where no such scope is afforded, there is no autonomy. But on this score it cannot be contended that the spirit is incapable of engendering the embryo, because it happens that the instruments are defective. Moreover, the entering into the desired womb, tha sovereign powers and the final liberation are regarded, by the theologians, to be applicable only to the spirit.

नह्यन्यः सुखदुःखयोः कर्ता । न चान्यतो गर्भो जायते जायमानः, नाङ्कुरोत्पत्तिरबीजात् ॥ ९ ॥

हि કારણકે क्योंकि, सुखदुःखयोः સુખ દુઃખનો सुख दुःखका, कर्ता કર્તા कर्ता, अन्यः न બીજો કોઈ નથી अन्य कोई नहीं है, जायमानः ઉત્પન્ન થતો और उत्पद्यमान, गर्भः च ગર્ભ गर्भ, अन्यतः આત્મા સિવાય બીજાથી आत्माके सिवाय अन्यसे, न जायते ઉત્પન્ન થતો નથી उत्पन्न नहीं होता, अबीजात् બીજ વિના बीजके विना, अङ्कुरोत्पत्तिः न અંકુરની ઉત્પત્તિ થતી નથી अंकुरकी उत्पत्ति नहीं होती ॥ ९ ॥

9 (3). For there is none else who is the subject of pleasure and pain. Nor from any source other than the self, does the springing embryo take its rise; there is no rise of the seedling without the seed.

यानि तु खल्वस्य गर्भस्यात्मजानि, यानि चास्यात्मतः संभवतः संभवन्ति, तान्यनुव्याख्यास्यामः,

अस्य गर्भस्य तु खलु આ ગર્ભના इस गर्भके, यानि જે जो, आत्मजानि આત્મજ ભાવો છે आत्मज भाव हैं, संभवतः અર્થાત્ ઉત્પન્ન થતા अर्थात् उत्पन्न होते हुए, अस्य આ ગર્ભના इस गर्भके, यानि જે ભાવો जो भाव, आत्मतः च આત્માથી आत्मासे, संभवन्ति ઉત્પન્ન થાય છે उत्पन्न होते हैं, तानि તેઓનું उनका, अनुव्याख्यास्यामः વ્યાખ્યાન કરશું व्याख्यान करेंगे;

10-(1). We shall now enumerate the spirit-engendered parts of the embryo, that is, those that pass from the spirit to the embryo during its formation.

तद्यथा—तासु तासु योनिषूत्पत्तिरायुरात्मज्ञानं मन इन्द्रियाणि प्राणापानौ प्रेरणं धारणमाकृतिस्वरवर्णविशेषाः सुखदुःखे इच्छाद्वेषौ चेतना धृतिर्बुद्धिः स्मृतिरहङ्कारः प्रयत्नश्चेति (आत्मजानि) ॥ १० ॥

तत् यथा જેમકે जैसे, तासु तासु તે તે उन उन, योनिषु યોનિઓમાં योनियोंमें, उत्पत्तिः ઉત્પત્તિ जन्म, आयुः આયુષ્ય आयुष्य, आत्मज्ञानम् આત્મજ્ઞાન आत्मज्ञान, मनः મન मन, इन्द्रियाणि ઇન્દ્રિયો इन्द्रिय, प्राणा-

१. आत्मा संभवति गर्भजनने—आत्मा जनने संभवति (थ.)

पानो प्राणु- અપાન પ્રાણ- अपान, प्रेरणम् પ્રેરણ प्रेरणा, धारणम् દેહનું ધારણ દેહકા धारण, आकृति-स्वर-वर्ण-विशेषाः આકૃતિ, સ્વર અને વર્ણના ભેદો आकृति, स्वर और वर्णके भेद, सुखदुःखे સુખદુઃખ सुखदुःख, इच्छाद्वेषौ ઇચ્છા-દ્વેષ इच्छा- द्वेष, चेतना ચેતના चेतना, धृतिः ધૃતિ धृति, बुद्धिः બુદ્ધિ बुद्धि, स्मृतिः સ્મૃતિ स्मृति, अहङ्कारः અહંકાર अहङ्कार, प्रयत्नः च इति અને પ્રયત્ન और प्रयत्न, (आत्मजानि એ આત્મજ છે ये आत्मज हैं) ॥ १० ॥

10. These are:—the birth in such and such womb; the life-span; self-awareness; the mind; the senses; respiration; excretory urge; the directing and sustaining powers of the various parts; distinctive shape, voice and color; pleasure and pain; desire and aversion; consciousness; resolution; understanding; recollection; egoism and effort. (These are born of the spirit.)

गर्भस्य सात्म्यजत्वप्रतिपादनम् , आत्मजा भावाश्च—

सात्म्यजश्चायं गर्भः। नह्यसात्म्यसेवित्व-मन्तरेण स्त्रीपुरुषयोर्वन्ध्यत्वमस्ति, गर्भेषु वाऽप्य-निष्टो भावः। यावत् खल्वसात्म्यसेविनां स्त्रीपुरु-षाणां त्रयो दोषाः प्रकुपिताः शरीरमुपसर्पन्तो न शुक्रशोणितगर्भाशयोपघातायोपपद्यन्ते, तावत् समर्था गर्भजननाय भवन्ति ।

अयम् આ यह, गर्भः ગર્ભ गर्भ, सात्म्यजः च સાત્મ્યજ પણ છે सात्म्यज भी है, हि કારણકે क्योंकि, असात्म्यसेवित्वम् અસાત્મ્યસેવન असात्म्यसेवनके, अन्तरेण વિના बिना, स्त्रीपुरुषयोः સ્ત્રીપુરુષને स्त्री-पुरुषको, वन्ध्यत्वम् વાંઝિયાપણું वन्ध्यत्व, गर्भेषु अथवा ગર્ભમાં પણ अथवा गर्भमें भी, अनिष्टः भावः वा અનિષ્ટ ભાવ अनिष्ट भाव, न अस्ति થતો નથી नहीं होता, असात्म्यसेविनाम् અસાત્મ્ય સેવન કરનાર असात्म्य-सेवी, स्त्रीपुरुषाणाम् સ્ત્રીપુરુષોનાં स्त्रीपुरुषोंके, शरीरम् શરીરમાં शरीरमें, उपसर्पन्तः પ્રસરતા फैलते हुए, त्रयः दोषाः ત્રણે દોષો तीनों दोष, प्रकुपिताः પ્રકુપિત થઈને प्रकुपित हो कर, यावत् खलु જ્યાં સુધી जब तक, शुक्र-शोणित- शुक्र- शोणित शुक्र- आर्तव, गर्भाशय- અને ગર્ભાશયની और गर्भाशयकी, उपघाताय હાનિ માટે हानिके लिए, न उपपद्यन्ते થતા નથી नहीं होते, तावत् ત્યાં સુધી तब तक, गर्भजननाय તેઓ ગર્ભ ઉત્પન્ન કરવામાં वे गर्भ जननके लिए, समर्थाः સમર્થ समर्थ, भवन्ति થાય છે होते हैं;

11-(1). In one sense the embryo is born of concordance, too. For, without his or her being given to discordant diet or behaviour, there is no true sterility either in man or woman or any defective condition in the embryo. However as long as the three humors being irritated, overrun the bodies of those of ill-regulated habits but do not penetrate deep enough to impair the semen in men, and the ovum and womb in women, so long these men and women are capable of procreation.

सात्म्यसेविनां पुनः स्त्रीपुरुषाणामनुपहत-शुक्रशोणितगर्भाशयानामृतुकाले सन्निपतितानां जीवस्यानवक्रमणाद्गर्भा न प्रादुर्भवन्ति। नहि केवलं सात्म्यज एवायं गर्भः, समुदयोऽत्र कारणमुच्यते।

अनुपहत- દોષરહિત दोषरहित, शुक्र-शोणित-गर्भाशयानाम् શુક્ર- શોણિત તથા ગર્ભાશયવાળાં शुक्र-शोणित तथा गर्भाशयवाले, सात्म्यसेविनाम् સાત્મ્યસેવી सात्म्यसेवी, स्त्रीपुरुषाणाम् पुनः સ્ત્રીપુરુષો स्त्रीपुरुषोंको, ऋतुकाले ઋતુકાળે ऋतुकालमें, संनिपतितानाम् સંયુક્ત થયા છતાં मैथुन करनेसे भी, जीवस्य જીવનો जीवके, अनवक्रमणात् પ્રવેશ ન થવાથી अप्रवेशसे, गर्भाः ગર્ભ गर्भ, न प्रादुर्भवन्ति ઉત્પન્ન થતા નથી उत्पन्न नहीं होते, अयम् गर्भः આ ગર્ભ यह गर्भ, केवलम् કેવળ केवल, सात्म्यजः एव સાત્મ્યજ सात्म्यज ही, न हि

११. समुदयोऽत्र—समुदायोऽत्र (ब.)

नथी જ नहीं, अत्र પરંતુ અહીં इसमें, समुदयः શુક્ર આર્તવ જીવ વગેરેનો સમુદાય शुक्र आर्तव जीव आदिका समुदाय, कारणम् કારણુ कारण, उच्यते કહેવાય છે कहा जाता है;

11-(2). On the other hand, even of those who are of well-regulated habits and possessed of defectless semen, ovum and uterus, and who mate during the prescribed season, there is no resulting conception, because of the non-descent of the spirit. The reason is that conception does not result from the factor of concordance alone, but the agency here is the complex of factors.

यानि खल्वस्य गर्भस्य सात्म्यजानि, यानि चास्य सात्म्यतः संभवतः संभवन्ति, तान्यनुव्याख्यास्यामः;

अस्य गर्भस्य खलु આ ગર્ભના इस गर्भके, यानि જે जो, सात्म्यजानि સાત્મ્યજ ભાવો છે सात्म्यज भाव हैं, संभवतः અર્થાત્ ઉત્પન્ન થતા अर्थात् उत्पन्न होते हुए, अस्य આ ગર્ભના इस गर्भके, यानि જે ભાવો जो भाव, सात्म्यतः च સાત્મ્યસેવનથી सात्म्यसेवनसे, संभवन्ति ઉત્પન્ન થાય છે उत्पन्न होते हैं, तानि તેઓનું उनका, अनुव्याख्यास्यामः વ્યાખ્યાન કરશું व्याख्यान करेंगे,

11-(3). We shall enumerate the concordance-engendered parts of the embryo i. e., those that pass from the factors of concordance to the embryo at formation.

तद्यथा—आरोग्यमनालस्यमलोलुपत्वमिन्द्रियप्रसादः स्वरवर्णबीजसंपत् प्रहर्षभूयस्त्वं चेति (सात्म्यजानि) ॥ ११ ॥

तत् यथा જેમકે जसे, आरोग्यम् આરોગ્ય आरोग्य, अनालस्यम् આળસનો અભાવ स्फूर्ति, अलोलुपत्वम् લોલુપતાનો અભાવ अलोलुपता, इन्द्रियप्रसादः ઇન્દ્રિયોની પ્રસન્નતા इन्द्रियोंकी प्रसन्नता, स्वर-वर्ण-बीज-संपत् સ્વર, વર્ણ તથા બીજની સંપત્તિ स्वर, वर्ण तथा बीजकी सम्पन्नता, प्रहर्ष-भूयस्त्वम् च इति અને હર્ષની અધિકતા और हर्षकी अधिकता, (सात्म्यजानि એ સાત્મ્યજ છે ये सात्म्यज हैं) ॥ ११ ॥

11. These are health, freedom from sluggishness, absence of excessive or depraved appetites, clearness of the senses, excellence of voice, complexion, virility and sex-vigor.

गर्भस्य रसजत्वप्रतिपादनं, रसजा भावाश्च—

रसजश्चायं गर्भः। न हि रसादृते मातुः प्राणयात्राऽपि स्यात्, किं पुनर्गर्भजन्म। न चैवासम्यगुपयुज्यमाना रसा गर्भमभिनिर्वर्तयन्ति, न च केवलं सम्यगुपयोगादेव रसानां गर्भाभिनिर्वृत्तिर्भवति, समुदायोऽप्यत्र कारणमुच्यते।

अयम् આ यह, गर्भः ગર્ભ गर्भ, रसजः च રસજ પણ છે रसज भी है, हि કારણકે क्योंकि, रसात् ऋते રસ વિના रसके विना, मातुः માતાની माताकी, प्राणयात्रा अपि પ્રાણસ્થિતિ પણ प्राणयात्रा भी, न स्यात् સંભવતી નથી नहीं हो सकती, किम् पुनः તો પછી तो फिर, गर्भजन्म ગર્ભનો જન્મ ક્યાંથી થાય? गर्भजन्म कहांसे हो सके?, असम्यक् યથાવિધિ નહિ अविधिपूर्वक, उपयुज्यमानाः યોજાયેલા सेवन किये, रसाः રસો रस, गर्भम् ગર્ભને गर्भको, न च एव अभिनिर्वर्तयन्ति નથી જ ઉત્પન્ન કરતા नहीं उत्पन्न करते हैं, रसानाम् અને રસોના और रसोंके, केवलम् કેવળ केवल, सम्यक् સમ્યક્ सम्यक्, उपयोगात् ઉપયોગથી उपयोगसे, एव જ ही, गर्भाभिनिर्वृत्तिः ગર્ભની ઉત્પત્તિ गर्भकी उत्पत्ति, न च નથી नहीं, भवति થતી होती, अत्र અહીં यहां, समुदायः શુક્ર, શોણિત આદિ ભાવોનો સમુદાય शुक्रशोणित

१२. न चैवासम्यगुपयुज्यमाना—न चैवास्या असम्यगुपयुज्यमाना (च. ग.)
,, समुदायोऽप्यत्र—समुदायोऽत्र (ग.)
,, ,, —समुदयोऽप्यत्र (ड.)

आदि भावोंका समुदाय, अपि પણ भी, कारणम् કારણ कारण, उच्यते કહેવાય છે कहा जाता है;

12-(1). In one sense, the embryo is born of nourishment, too. For without nourishment the mother cannot even live, let alone bring forth her young. Nevertheless nourishment, improperly imbibed, does not conduce to conception; nor, to be sure, does conception result solely from the proper use of nourishment; here, too, it is the complex of factors that is said to be the cause.

यानि तु खल्वस्य गर्भस्य रसजानि, यानि चास्य रसतः संभवतः संभवन्ति, तान्यनुव्याख्यास्यामः;

अस्य गर्भस्य खलु આ ગર્ભના इस गर्भके, यानि तु જે जो, रसजानि રસજ ભાવો છે रसज भाव हैं, संभवतः अर्थात् ઉત્પન્ન થતા अर्थात् उत्पन्न होते हुए, अस्य આ ગર્ભના इस गर्भके, यानि જે ભાવો जो भाव, रसतः રસસેવનથી रससेवनसे, संभवन्ति સંભવે છે उत्पन्न होते हैं, तानि તેઓનું उनका, अनुव्याख्यास्यामः વ્યાખ્યાન કરશું व्याख्यान करेंगे;

12-(2). We shall enumerate the nourishment-born parts of the embryo i. e. those that pass from nourishment to the embryo during formation.

तद्यथा—शरीरस्याभिनिर्वृत्तिरभिवृद्धिः प्राणानुबन्धस्तृप्तिः पुष्टिरुत्साहश्चेति (रसजानि) ॥१२॥

तत् यथा જેમકે जैसे, शरीरस्य શરીરની शरीरकी अभिनिर्वृत्तिः ઉત્પત્તિ उत्पत्ति, अभिवृद्धिः વધવું बढ़ना, प्राणानुबन्धः પ્રાણાનુબંધ प्राणका बना रहना, तृप्तिः તૃપ્તિ तृप्तिः, पुष्टिः પુષ્ટતા पुष्टि, उत्साहः च इति અને ઉત્સાહ और उत्साह, (रसजानि એ રસજ છે ये रसजन्य हैं) ॥१२॥

12. These are—the differentiation of limbs and their proper development, invigoration, satisfaction, plumpness and enthusiasm.

सत्त्वस्य (मनसः) औपपादुकत्वप्रतिपादनं, सत्त्वजा भावाश्च—

अस्ति खलु सत्त्वमौपपादुकं; यज्जीवं स्पृक्शरीरेणाभिसंबध्नाति, यस्मिन्नपगमनपुरस्कृते शीलमस्य व्यावर्तते, भक्तिर्विपर्यस्यते, सर्वेन्द्रियाण्युपतप्यन्ते, बलं हीयते, व्याधय आप्याय्यन्ते, यस्माद्धीनः प्राणाञ्जहाति, यदिन्द्रियाणामभिग्राहकं च 'मन' इत्यभिधीयते; तत् त्रिविधमाख्यायते—शुद्धं, राजसं, तामसमिति ।

सत्त्वम् खलु મન मन, औपपादुकम् બીજા શરીર સાથે આત્માનો સબંધ કરનાર दूसरे शरीरके साथ आत्माका संबन्ध करनेवाला, अस्ति છે है, यत् જે जो, जीवम् જીવાત્માને जीवको, स्पृक्शरीरेण સ્પર્શવાળા શરીર સાથે स्पर्शयुक्त शरीरसे, अभिसंबध्नाति જોડે છે जोड़ता है, यस्मिन् જે जिसके, अपगमन- દેહાન્તરમાં જવા देहान्तरमें जानेको, पुरस्कृते તૈયાર થાય છે ત્યારે तत्पर होने पर, अस्य એનો इसका, शीलम् સ્વભાવ स्वभाव, व्यावर्तते બદલાઈ જાય છે बदल जाता है, भक्तिः રુચિ रुचि, विपर्यस्यते વિપરીત થઈ જાય છે विपरीत हो जाती है, सर्वेन्द्रियाणि સર્વે ઇન્દ્રિયો सब इन्द्रियां, उपतप्यन्ते સંતાપ પામે છે संतप्त होती हैं, बलम् બળ बल, हीयते ઘટે છે घटता है, व्याधयः વ્યાધિઓ रोग, आप्याय्यन्ते વૃદ્ધિ પામે છે बढ़ते हैं, यस्मात् જેથી जिससे, हीनः રહિત બની रहित हो कर, प्राणान् પુરુષ પ્રાણોને पुरुष प्राणोंको, जहाति તજી દે છે छोड़ देता है, इन्द्रियाणाम् અને ઇન્દ્રિયોનું और इन्द्रियोंका, अभिग्राहकम् નિયામક अभिग्राहक (विषयोंमें प्रेरक), यत् च જે जो, मनः મન मन, इति એ નામથી इस संज्ञासे, अभिधीयते કહેવાય છે कहा जाता है, तत् તે वह, शुद्धम् સાત્ત્વિક सात्त्विक, राजसम् રાજસ राजस,

१२. शरीरस्याभिनिर्वृत्तिः—शरीराभिप्रवृत्तिः (थ.)

१३. अस्ति खलु सत्त्वमौपपादुकम्—अस्ति खल्वपि सत्त्वमुपपादुकम (क. ख. छ. थ.)

,, जीवं स्पृक्शरीरेण—जीवस्पृक्शरीरेण (थ.)

तामसम् च અને તામસ और तामस, इति એ इन, त्रिविधम् ત્રણ પ્રકારનું तीन प्रकारका, आख्यायते કહેવાય છે कहाता है;

13-(1). There is also the connecting agent which is the mind. That which yokes the spirit with the sentient organism, that on the imminence of whose departure virtue leaves the body, the inclinations change, all the sense-organs are distraught, strength wanes, diseases get aggravated, and finally on whose departure the organism is bereft of life and which holds the senses together—this is called the mind. It is said to be of three types—pure, passionate and inert.

येनास्य खलु मनो भूयिष्ठं, तेन द्वितीयायामाजातौ संप्रयोगो भवति; यदा तु तेनैव शुद्धेन संयुज्यते, तदा जातेरतिक्रान्ताया अपि स्मरति। स्मार्त्तं हि ज्ञानमात्मनस्तस्यैव मनसोऽनुबन्धादनुवर्त्तते, यस्यानुवृत्तिं पुरस्कृत्य पुरुषो 'जातिस्मर' इत्युच्यते ।

येन જે ગુણથી जिस गुणसे, अस्य આનું इसका, मनः મન मन, भूयिष्ठम् અધિક યુક્ત હોય છે अधिक युक्त होता है, तेन તે ગુણથી उस गुणसे, द्वितीयायाम् બીજા दूसरे, आजातौ જન્મમાં जन्ममें, संप्रयोगः યોગ योग, भवति થાય છે होता है, यदा तु જ્યારે जब, तेन एव તે જ उसी, शुद्धेन શુદ્ધ મનથી शुद्ध सत्त्वके साथ, संयुज्यते સંયુક્ત થાય છે संयुक्त होता है, तदा ત્યારે तब, अतिक्रान्तायाः વ્યતીત पूर्वके, जातेः જન્મનું जन्मका, अपि પણ भी, स्मरति સ્મરણ કરે છે स्मरण करता है, हि કારણકે क्योंकि, आत्मनः આત્માનું आत्माका, स्मार्तम् સ્મૃતિરૂપ स्मृतिरूप, ज्ञानम् જ્ઞાન ज्ञान, तस्य एव તે જ उसी, मनसः મનના मनके, अनुबन्धात् અનુબંધથી अनुबन्धसे, अनुवर्तते અનુવર્તન કરે છે रहता है, यस्य જેના जिसकी, अनुवृत्तिम् અનુવર્તનને अनुवृत्तिको, पुरस्कृत्य લઈને लेकर, पुरुषः પુરુષ पुरुष, जातिस्मरः જાતિસ્મર जातिस्मर, इति એમ ऐसा, उच्यते કહેવાય છે कहा जाता है।

13-(2). Now, of whatever dominant type a man's mind is in this life, he gets linked to that very type in the next birth. Thus, for instance, when he is linked to that very pure type of mind that he possessed in the previous existence, then he can recall the past incarnation as well. Hence memory follows the spirit because it remains linked to the same mind; it is in consequence of this that a particular person is said to be a "Jatismara" (one who remembers his past birth).

यानि खल्वस्य गर्भस्य सत्त्वजानि, यान्यस्य सत्त्वतः संभवतः संभवन्ति, तान्यनुव्याख्यास्यामः;

अस्य આ इस, गर्भस्य खलु ગર્ભના गर्भके, यानि જે जो, सत्त्वजानि સત્ત્વજ ભાવ છે सत्त्वज भाव हैं, संभवतः અર્થાત્ ઉત્પન્ન થતા अर्थात् उत्पन्न होते, अस्य આ ગર્ભના इस गर्भके, यानि જે ભાવો जो भाव, सत्त्वतः મનથી मनसे, संभवन्ति ઉત્પન્ન થાય છે उत्पन्न होते हैं, तानि તેઓનું उनका, अनुव्याख्यास्यामः વ્યાખ્યાન કરશું व्याख्यान करेंगे;

13-(3). We shall now enumerate the mind-born parts of the embryo, i. e. those that pass to the embryo during formation, from the mind.

तद्यथा—भक्तिः शीलं शौचं द्वेषः स्मृतिर्मोहस्त्यागो मात्सर्यं शौर्यं भयं क्रोधस्तन्द्रोत्साह-

१३. द्वितीयायामाजातौ–द्वितीयायां जातौ (क.-च.-ष.)
,, ,, द्वितीयामाजातिं (फ.)
,, जातेरतिक्रान्ताया अपि–जातिमतिक्रान्तामपि (फ.)

स्तैक्ष्ण्यं मार्दवं गाम्भीर्यमनवस्थितत्वमित्येवमादयश्चान्ये, ते सत्त्वविकारा यानुत्तरकालं सत्त्वभेदमधिकृत्योपदेक्ष्यामः। नानाविधानि खलु सत्त्वानि, तानि सर्वाण्येकपुरुषे भवन्ति, न च भवन्त्येककालम्, एकं तु प्रायोवृत्त्याऽऽह ॥ १३ ॥

तत् यथा જેમકે जैसे, भक्तिः ભક્તિ भक्ति, शीलम् શીલ शील, शौचम् પવિત્રતા पवित्रता, द्वेषः દ્વેષ द्वेष, स्मृतिः સ્મૃતિ स्मृति, मोहः મોહ मोह, त्यागः ત્યાગ त्याग, मात्सर्यम् માત્સર્ય मात्सर्य, शौर्यम् શૌર્ય शौर्य, भयम् ભય भय, क्रोधः ક્રોધ क्रोध, तन्द्रा તન્દ્રા तन्द्रा, उत्साहः ઉત્સાહ उत्साह, तैक्ष्ण्यम् તીક્ષ્ણતા तीक्ष्णता, मार्दवम् માર્દવ मृदुता, गाम्भीर्यम् ગંભીરતા गंभीरता, अनवस्थितत्वम् ચંચળતા चंचलता, इति એ ये, एवमादयः च અને એવા और ऐसे, अन्ये च બીજા दूसरे, ते તે वे, सत्त्वविकाराः સત્ત્વના વિકારો છે सत्त्वके विकार हैं, यान् જેનો जिनको, सत्त्वभेदम् સત્ત્વભેદને सत्त्वभेदके, अधिकृत्य ઉદ્દેશીને अनुसार, उत्तरकालम् પછી आगे, उपदेक्ष्यामः ઉપદેશ કરશું कहेंगे, सत्त्वानि खलु સત્ત્વ सत्त्व, नानाविधानि વિવિધ પ્રકારનાં છે नानाप्रकारके हैं, तानि તે वे, सर्वाणि સર્વ सब, एकपुरुषे એક પુરુષમાં एक पुरुषमें, भवन्ति હોય છે होते हैं, एककालम् च પરંતુ એકજ સમયે परन्तु एक कालमें, न भवन्ति હોતાં નથી नहीं होते, एकम् तु મનુષ્ય એક ગુણવાળો તો मनुष्यको एक गुणवाला तो, प्रायोवृत्त्या ગુણની અધિક વૃત્તિથી गुणकी अधिक वृत्तिसे, आह કહેવાય છે कहते हैं ॥ १३ ॥

13. These are—inclination, character, purity, hate, recollection, infatuation, liberality, envy, valour, fear, anger, torpor, enthusiasm, keenness, softness, profundity, fickleness, and such others; as also the conditions of the mind, which we shall later describe in connection with the analysis of mind. The mind is indeed of diverse dispositions; all these obtain in the same man but not at the same time. When a man is said to be of a particular disposition, he is said to be so by reason of its preponderance.

गर्भस्य समुदायप्रभवत्वसाधनोपसंहारः —

एवमयं नानाविधानामेषां गर्भकराणां भावानां समुदायादभिनिर्वर्तते गर्भः; यथा—कूटागारं नानाद्रव्यसमुदायात्, यथा वा—रथो नानारथाङ्गसमुदायात्; तस्मादेतदवोचाम—मातृजश्चायं गर्भः, पितृजश्च, आत्मजश्च, सात्म्यजश्च, रसजश्च, अस्ति च सत्त्वमौपपादुकमिति (होवाच भगवानात्रेयः) ॥ १४ ॥

यथा જેમ जिस प्रकार, कूटागारम् તંબુ तम्बू, नानाद्रव्यसमुदायात् વિવિધ દ્રવ્યના સમૂહથી બને છે नाना द्रव्योंके मेलसे होता है, यथा वा અથવા જેમ अथवा जैसे, रथः રથ रथ, नानारथाङ्ग- રથના વિવિધ અંગોના नाना अंगोंके, समुदायात् સમુદાયથી બને છે समुदायसे बनता है, एवम् એમ इस प्रकार, एषाम् આ इन, नानाविधानाम् વિવિધ પ્રકારના नाना प्रकारके, गर्भकराणाम् ગર્ભકર गर्भोत्पादक, भावानाम् ભાવોના भावोंके, समुदायात् સમુદાયથી समुदायसे, अयम् આ यह, गर्भः ગર્ભ गर्भ, अभिनिर्वर्तते ઉત્પન્ન થાય છે उत्पन्न होता है, तस्मात् તેથી इस लिए, एतत् આ यह, अवोचाम અમે કહ્યું છે કે हमने कहा है कि, अयम् આ यह, गर्भः ગર્ભ गर्भ, मातृजः च માતૃજ मातृज, पितृजः च પિતૃજ पितृज, आत्मजः च આત્મજ आत्मज, सात्म्यजः च સાત્મ્યજ सात्म्यज, रसजः च અને રસજ છે और रसज है, सत्त्वम् च તથા મન तथा मन, औपपादुकम् આત્માનું બીજા શરીર સાથે ઘટક आत्माको अन्य शरीरके साथ घटक, अस्ति इति છે है, (भगवान् ભગવાન भगवान, आत्रेयः આત્રેયે आत्रेयने, उवाच હ એમ કહ્યું ऐसा कहा) ॥ १४ ॥

१३. °विकाराः–°विषयाः (प.)
,, सत्त्वविकाराः–सत्त्वजा विकाराः (च.छ.)
,, तानि सर्वाण्येकपुरुषे भवन्ति–तान्येकपुरुषे भवन्ति (ख.)
,, प्रायोवृत्त्याऽऽह–प्रायोऽनुवृत्त्याऽऽह (ग.घ.)

१४. औपपादुकम्–उपपादुकम् (ख.च.)

14. In this manner, this embryo comes into existence from the coming together of these various procreative factors just as a tent from the assemblage of various materials, or as a chariot from the combination of various parts of the chariot. Therefore did we assert this that the embryo is mother-born, father-born, spirit-born, concordance-born and nourishment-born. There is over and above the connecting agent, the mind." (Thus declared the sage Atreya).

आत्रेयकृते सिद्धान्ते भरद्वाजस्य दोषारोपः—

भरद्वाज उवाच—यद्ययमेषां नानाविधानां गर्भकराणां भावानां समुदायादभिनिर्वर्तते गर्भः कथमयं सन्धीयते, यदि चापि सन्धीयते कस्मात् समुदायप्रभवः सन् गर्भो मनुष्यविग्रहेण जायते, मनुष्यश्च मनुष्यप्रभव उच्यते; तत्र चेदिष्टमेतद्यस्मान्मनुष्यो मनुष्यप्रभवस्तस्मादेव मनुष्यविग्रहेण जायते, यथा—गौर्गोप्रभवः, यथा—चाश्वोऽश्वप्रभव इति; एवं सति यदुक्तमग्रे समुदयात्मक इति तदयुक्तम्। यदि च मनुष्यो मनुष्यप्रभवः, कस्माज्जडान्धकुब्जमूकवामनमिन्मिनव्यङ्गोन्मत्तकुष्ठिकिलासिभ्यो जाताः पितृसदृशरूपा न भवन्ति। अथात्रापि बुद्धिरेवं स्यात्—स्वेनैवायमात्मा चक्षुषा रूपाणि वेत्ति, श्रोत्रेण शब्दान्, घ्राणेन गन्धान्, रसनेन रसान्, स्पर्शनेन स्पर्शान्, बुद्ध्या बोद्धव्यमित्यनेन हेतुना न जडादिभ्यो जाताः पितृसदृशा भवन्ति। अत्रापि प्रतिज्ञाहानिदोषः स्यात्, एवमुक्ते ह्यात्मा सत्स्विन्द्रियेषु ज्ञः स्यादसत्स्वज्ञः; यत्र चैतदुभयं संभवति ज्ञत्वमज्ञत्वं च, सविकारश्चात्मा। यदि च दर्शनादिभिरात्मा विषयान् वेत्ति, निरिन्द्रियो दर्शनादिविरहादज्ञः स्यात्, अज्ञत्वादकारणम्, अकारणत्वाच्च नात्मेति वाग्वस्तुमात्रमेतद्वचनमनर्थं स्यादिति (होवाच भरद्वाजः) ॥१५॥

१५. पितृसदृशरूपा–पितृसदृशा (ध.)
,, अत्रापि प्रतिज्ञाहानिदोषः स्यात्–अत्रापि प्रतिज्ञादोषः स्यात् (ख.)
,, सविकारश्चात्मा–सविकारप्रकृतिकश्चात्मा (च.ध.)

भरद्वाजः ભરદ્વાજ भरद्वाजने, उवाच બોલ્યા कहा, यदि જો यदि, एषाम् આ इन, नानाविधानाम् વિવિધ પ્રકારના नाना प्रकारके, गर्भकराणाम् ગર્ભકર गर्भकर, भावानाम् ભાવોના भावोंके, समुदायात् સમુદાયથી समुदायसे, अयम् આ यह, गर्भः ગર્ભ गर्भ, अभिनिर्वर्तते ઉત્પન્ન થાય છે उत्पन्न होता है. अयम् તો પછી એ तो फिर यह, कथम् કેવી રીતે कैसे, संधीयते જોડાય છે जुड़ जाता है, यदि च અને જો और यदि, सन्धीयते अपि જોડાય પણ છે जुड़ जाता है, गर्भः તો ગર્ભ तो गर्भ, समुदाय- प्रभवः સમુદાયથી ઉત્પન્ન થતો समुदायसे उत्पन्न, सन् હોવા છતાં हो कर, कस्मात् શાથી किस कारणसे, मनुष्य- विग्रहेण મનુષ્યશરીરે मनुष्यशरीरसे, जायते જન્મે છે उत्पन्न होता है, मनुष्यः च અને મનુષ્ય और मनुष्य, मनुष्यप्रभवः મનુષ્યથી જન્મેલો मनुष्यसे उत्पन्न, उच्यते કહેવાય છે कहा जाता है, तत्र ત્યાં यहां, यस्मात् જેથી जिस कारणसे, मनुष्यः માણસ मनुष्य, मनुष्यप्रभवः માણસથી ઉત્પન્ન થાય છે मनुष्यसे उत्पन्न होता है, तस्मात् તેથી उस कारणसे, एव જ ही, मनुष्य-विग्रहेण તે મનુષ્યસ્વરૂપે वह मनुष्य-शरीरसे, जायते જન્મે છે उत्पन्न होता है, यथा જેમકે जैसे, गौः બળદ बैल, गोप्रभवः બળદથી જન્મે છે बैलसे उत्पन्न होता है, यथा અને જેમકે और जैसे, अश्वः च ઘોડો घोड़ा, अश्वप्रभवः इति ઘોડાથી જન્મે છે घोड़ेसे उत्पन्न होता है, एतत् એ यह, इष्टम् चेत् આપને ઇષ્ટ હોય તો आपको इष्ट हो तो, एवम् सति એવો સ્વીકાર કરતાં ऐसा स्वीकार करने पर, समुदयात्मकः ગર્ભ સમુદાયાત્મક છે गर्भ समुदायात्मक है, इति એમ ऐसा, यत् अग्रे જે અગાઉ जो आगे, उक्तम् કહ્યું છે कहा है, तत् તે वह, अयुक्तम् અસંગત થશે अयुक्त ठहरेगा, यदि च અને જો और यदि, मनुष्यः માણસ मनुष्य, मनुष्यप्रभवः માણસથી ઉત્પન્ન થાય છે તો मनुष्यसे उत्पन्न होता है तो, जड- જડ मूर्ख, अन्ध- અન્ધ अन्ध, कुब्ज- કૂબડો कुबड़े, मूक- મૂંગો मूंगे, वामन ઠીંગણો ठिंगने, मिन्मिन- ગૂંગણો गूंगे, व्यङ्ग- વ્યંગ व्यंग, उन्मत्त- ઉન્મત્ત उन्मत्त (पागल), कुष्ठि- કુષ્ઠરોગી कुष्ठी,

किलासिभ्यः અને કિલાસરોગીથી और किलासरोगीसे, **जाताः** ઉત્પન્ન થયેલા उत्पन्न हुए, **पितृसदृशं-** પિતા જેવાં पिताके सदृश, **रूपाः** રૂપવાળા रूपवाले, **न भवन्ति** નથી થતાં नहीं होते, **अथ अत्र अपि** અહીં પણ यहां भी, **एवं बुद्धिः** આપની એવી માન્યતા आपकी ऐसी समझ, **स्यात्** થશે કે होगी कि, **अयम् आत्मा** આ આત્મા यह आत्मा, **स्वेन एव** પોતાનાં જ अपने ही, **चक्षुषा रूपाणि** ચક્ષુથી રૂપોને चक्षुसे रूपोंको, **श्रोत्रेण शब्दान्** કાનથી શબ્દોને श्रोत्रसे शब्दोंको, **घ्राणेन गन्धान्** ઘ્રાણથી ગંધને घ्राणसे गन्धको, **रसनेन रसान्** રસનેન્દ્રિયથી રસને रसनासे रसोंको, **स्पर्शनेन** સ્પર્શેન્દ્રિયથી स्पर्शइन्द्रियसे, **स्पर्शान्** સ્પર્શને स्पर्शोंको, **बुद्ध्या** અને બુદ્ધિથી और बुद्धिसे, **बोद्धव्यम्** જ્ઞાતવ્ય વસ્તુને ज्ञातव्यको, **वेत्ति** જાણે છે जानता है, **इति अनेन** આ इस, **हेतुना** હેતુથી हेतुसे, **जडादिभ्यः** જડાદિથી जड आदिसे, **जाताः** ઉત્પન્ન થયેલાં સંતાનો उत्पन्न हुई सन्तान, **पितृसदृशाः** પિતા જેવાં पिताके सदृश, **न भवन्ति** હોતાં નથી नहीं होती, **अत्र अपि** અહીં પણ इसमें भी, **प्रतिज्ञाहानि-** પ્રતિજ્ઞાહાનિરૂપ प्रतिज्ञाहानिरूप, **दोषः** દોષ दोष, **स्यात्** થાય છે होता है, **हि** કારણકે क्योंकि, **एवम् उक्ते** એમ કહેતાં ऐसा कहने पर, **आत्मा** આત્મા आत्मा, **इन्द्रियेषु** ઇન્દ્રિયો इन्द्रियोंके, **सत्सु** હોતાં होने पर, **ज्ञः** જ્ઞાનવાન જ્ઞાની, **स्यात्** થશે होगा, **असत्सु** અને નહિ હોતાં और न होने पर, **अज्ञः** અજ્ઞાની થશે अज्ञानी होगा, **यत्र च** વળી જ્યાં फिर जिसमें, **ज्ञत्वम्** જ્ઞત્વ ज्ञानका होना, **अज्ञत्वम् च** અને અજ્ઞત્વ और अज्ञानका होना, **एतत् उभयम्** એ બન્ને इन दोनोंका, **संभवति** સંભવે તો सम्भव हो तो, **आत्मा** તે આત્મા वह आत्मा, **सविकारः च** વિકારવાન થશે विकारवान होगा, **यदि च** અને જો और यदि, **दर्शनादिभिः** ચક્ષુ આદિ દ્વારા चक्षु आदि इन्द्रियोंसे, **आत्मा** આત્મા आत्मा, **विषयान्** વિષયોને विषयोंको, **वेत्ति** જાણે છે जानता है, **निरिन्द्रियः** તો નિરિન્દ્રિય આત્મા तो इन्द्रियरहित आत्मा, **दर्शनादि-** ચક્ષુરાદિના चक्षु आदिके, **विरहात्** અભાવથી अभावसे, **अज्ञः स्यात्** અજ્ઞ થશે अज्ञ होगा, **अज्ञत्वात्** અને અજ્ઞ હોવાથી और अज्ञ होनेसे, **अकारणम्** તે કારણ બની શકતો નથી वह कारण नहीं बन सकता, **अकारणत्वात् च** અને કારણરૂપ ન હોવાથી और अकारण होनेसे, **आत्मा न** તે આત્મા નથી वह आत्मा नहीं है, **इति** એવું ऐसा, **वाग्वस्तुमात्रम्** કેવળ વાણીમાંજ વસ્તુરૂપ वकवादमात्र, **एतत्** આ यह, **वचनम्** વચન वचन, **अनर्थम्** નિરર્થક निरर्थक, **स्यात् इति** છે है, (**भरद्वाजः** ભરદ્વાજ भरद्वाजने, **उवाच ह** એમ બોલ્યાં ऐसा कहा) ॥ १५ ॥

15. At this stage, Bharadwaja said, 'If the the embryo thus arises from the assemblage of various pro-creative factors, how is it integrated? And granted that the integration is effected somehow why does the embryo springing as it does, from a complex, emerge in the shape of man? Now man is said to be the offspring of man. If, then, it is said that in as much as man is sprung of man, he emerges with a man's form, as for instance an ox is the offspring of an ox, or as a horse is the offspring of a horse; if this is the position then what has been said before—that man is of the nature of a conglomeration, becomes untenable. If, moreover, man is man's offspring, then why are those, sprung of the idiotic, blind, hunch-backed, mute, dwarfish, lisping, deformed, insane, those suffering from dermatosis or leprous lesions, unlike the parents? If, in order to explain away this difficulty, the assumption is that the spirit perceives forms by its own vision, sounds by its own audition, odors by its own sense of smell, tastes by its own sense of tastes, the tangible objects by its own sense of

7-(1). A thousand fruits of the emblic myrobalans together with a thousand fruits of long-pepper should be soaked in the alkaline water prepared from the ashes of a young palasa. When the myrobalans have become fully saturated, they should be dried in shade; where-after the myrobalans should be deseeded and ground along with fruits of long pepper into powder. To this should be added honey and ghee, each of four times the measure of the powder, and sugar one fourth the measure of the powder. Placing the whole thing in an earthen jar which has been saturated with ghee, it should be kept underground for a period of six months. On completion of the period, the linctus becomes fit for use. It should be taken in the measure suited to one's digestive capacity. The time of taking is fore-noon, never the afternoon As regards the dietary rules, they are determined by the constitution of the user.

अस्य प्रयोगाद्वर्षशतमजरं वयस्तिष्ठतीति समानं पूर्वेण ॥ ७ ॥

(इत्यामलकावलेहः ।)

अस्य આ इसके, प्रयोगात् પ્રયોગથી प्रयोगसे, वयः આયુષ્ય आयु, अजरम् જરારહિત થઈ वृद्धावस्थासे रहित हो कर, वर्षशतम् સો વર્ષ પર્યન્ત सौ बरस तक, तिष्ठति રહે છે रहती है, इति આ સઘળું यह सब, पूर्वेण પૂર્વોક્ત પ્રયોગના पूर्वोक्त प्रयोगके, समानम् સમાન છે समान है ॥७॥ (इति આ यह, आमलकावलेहः આમલકાવલેહ છે आमलकावलेह है ।)

7. The benefits accruing from the use of this are the same as those mentioned with regard to the last, namely, youthful life for a hundred years etc. Thus has been described 'The Emblic Myrobalan Linctus'.

आमलकचूर्णम्—

आमलकचूर्णाढकमेकविंशतिरात्रमामलकस्वरसपरिपीतं मधुघृताढकाभ्यां द्वाभ्यामेकीकृतमष्टभागपिप्पलीकं शर्कराचूर्णचतुर्भागसंप्रयुक्तं घृतभाजनस्थं प्रावृषि भस्मराशौ निदध्यात्; तद्वर्षान्ते सात्म्यपथ्याशी प्रयोजयेत्;

एकविंशति- એકવીસ एकईस, रात्रम् રાત્રિઓ रात्रि पर्यंत, आमलक-स्वरस- परिपीतम् આમળાના સ્વરસની ભાવના આપેલા आंवलोंके स्वरस पिये हुए, आमलकचूर्णाढकम् ૨૫૬ તોલા આમળાના ચૂર્ણને आंवलोंके एक आढक चूर्णको, द्वाभ्याम् બન્ને दो दो, मधुघृत- મધ તથા ઘીના मधु और घृतके, आढकाभ्याम् આઢકોમાં आढकोंमें, एकीकृतम् એકત્ર કરીને मिला कर, अष्टभाग-

७. अस्य प्रयोगात्—तस्य प्रयोगात् (ख.)

८. आमलकस्वरस°—आमलकसहस्रस्वरस° (ग. घ.)

આઠમે ભાગે ૩૨ તોલા आठवें भागमें, पिप्पलीकम् પીપરનું ચૂર્ણ મેળવીને पिप्पलीका चूर्ण मिला कर, शर्कराचूर्ण- અને સાકરનું ચૂર્ણ और बारीक खांड, चतुर्भाग- ચોથે ભાગે ૬૪ તોલા चोथाई भागमें, संप्रयुक्तम् ભેળવીને मिला कर, घृतभाजनस्थम् અંદર ઘી ચોપડેલા ઘડામાં ભરીને अन्दर घृतसे लिप्त घडेमें रख कर, भस्मराशौ રાખના ઢગલામાં भस्मके ढेरमें, निदध्यात् રાખી મૂકવું रख देवे, वर्षान्ते વર્ષાઋતુ પૂરી થયા પછી वर्षाऋतुके अंतमें, सात्म्य- સાત્મ્ય सात्म्य, पथ्याशी અને પથ્ય ભોજનનું સેવન કરતો और पथ्य आहारको सेवन करनेवाला पुरुष, तत् તેનો इसका, प्रयोजयेत् પ્રયોગ કરે प्रयोग करे;

8-(1). 256 tolas of the powder of emblic myrobalans should be kept soaking in the expressed juice of a thousand emblic myrobalans for a period of twenty-one nights. Mix this with 256 tolas each of honey and ghee, adding one eighth part 32 tolas of the powder of long pepper and one fourth part viz. 64 tolas of powdered sugar. Placing the whole in a pot saturated with ghee, keep the pot in a heap of ashes during the entire period of the rains; at the close of the rainy season, the medicine should be taken, and the homologatory and wholesome dietetic rules observed.

अस्य प्रयोगाद्वर्षशतमजरमायुस्तिष्ठतीति समानं पूर्वेण ॥ ८ ॥

(इत्यामलकचूर्णम्[१])

अस्य આ ચૂર્ણના इस चूर्णके, प्रयोगात् પ્રયોગથી प्रयोगसे आयुः આયુષ્ય आयु, अजरम् વૃદ્ધાવસ્થાથી રહિત થઈ वृद्धावस्थासे रहित हो कर, वर्षशतम् સો વર્ષ પર્યન્ત सौ वर्ष पर्यन्त, तिष्ठति રહે છે रहती है, इति આ બધળું यह सब, पूर्वेण પૂર્વોક્ત પ્રયોગના पूर्वोक्त प्रयोगके, समानम् સમાન છે समान है ॥ ८ ॥ (इति આ यह, आमलकचूर्णम् આમલકચૂર્ણ છે आमलकचूर्ण है।)

8. The benefits accruing from the use of this medicine are a century of youthful life and other results described with reference to the previous preparations. Thus has been described 'The Pulvis of Emblic Myrobalans.'

विडङ्गावलेहः—

विडङ्गतण्डुलचूर्णानामाढकमाढकं[१] पिप्पलीतण्डुलानामध्यर्धाढकं[२] सितोपलायाः सर्पिस्तैलमध्वाढकैः[३] षड्भिरेकीकृतं घृतभाजनस्थं प्रावृषि भस्मराशाविति सर्वं समानं पूर्वेण यावदाशी ॥९॥[४]

(इति विडङ्गावलेहः।)

विडङ्ग- વાવડિંગના वायविडंगके, तण्डुलचूर्णानाम् દાણાનું ચૂર્ણ दानोंका चूर्ण, आढकम् ૨૫૬ તોલા एक आढक, पिप्पलीतण्डुलानाम् પીપરના દાણાનું ચૂર્ણ ૨૫૬ તોલા पीप्पलीके दानोंका चूर्ण एक आढक, सितोपलायाः સાકરનું ચૂર્ણ चीनीका चूर्ण, अध्यर्धाढकम् ૩૮૪ તોલા डेढ आढक, सर्पिः- तथा ગાયનું ઘી तथा गौका घृत, तैल- તલનું તેલ तिलका तैल, मधु- અને મધ દરેકના और मधु प्रत्येकका, आढकैः ૨૫૬ તોલા લઈ एक एक आढक ले कर, एभिः આ इन, षड्भिः ૭ એ દ્રવ્યોને छः द्रव्योंको, एकीकृतम् એકત્ર કરીને एकत्र करके, घृतभाजनस्थम् અંદર ઘી ચોપડેલા પાત્રમાં રાખીને अन्दर घृतसे लिप्त बर्तनमें रख कर, प्रावृषि વર્ષાઋતુના પ્રારંભકાળમાં वर्षाऋतुके प्रारम्भकालमें, भस्मराशौ રાખના ઢગલામાં રાખવું राखके ढेरमें रखना चाहिए, इति આ यह, यावदाशीः ફુલશ્રુતિ

१. चूर्णानामाढकमाढकम्–चूर्णानामाढकम् (ग.)

२. पिप्पलीतण्डुलानाम्–पिप्पलीतण्डुलचूर्णानाम् (ग.)

३. तैलमध्वाढकैः–तैलाब्धाढकैः (ग.)

४. सर्वं समानं पूर्वेण यावदाशीः–समानं पूर्वेण (ग.)

१. इत्यामलकचूर्णम्–आमलकावलेहः (ग.)

પર્યંત फलश्रुति पर्यन्त, सर्वम् સઘળું सब, पूर्वेण પૂર્વોક્ત પ્રયોગના पूर्वोक्त प्रयोगके, समानम् સમાન છે समान है ॥९॥ (इति આ यह विडङ्गावलेहः વિડંગાવલેહ છે विडङ्गावलेह है।)

9. Take 256 tolas each of the powder of the grains of embelia and long pepper; and 384 tolas of sugar candy and 512 tolas each of ghee and til oil and honey, and mixing all these six, place in a ghee-pot. Keep it in a heap of ashes during the rains. The rest of the description including the virtues of the preparation is the same as that related previously. Thus has been described 'The Linctus of Embelia'.

अपर आमलकावलेहः —

यथोक्तगुणानामामलकानां सहस्रमार्द्रपलाशद्रोण्यां सपिधानायां बाष्पमनुद्वमन्त्यामारण्यगोमयाग्निभिरुपस्वेदयेत्, तानि सुस्विन्नशीतान्युद्धृतकुलकान्यापोथ्याढकेन पिप्पलीचूर्णानामाढकेन च विडङ्गतण्डुलचूर्णानामध्यर्धेन चाढकेन शर्करायाः द्वाभ्यां द्वाभ्यामाढकाभ्यां तैलस्य मधुनः सर्पिषश्च संयोज्य शुचौ दृढे घृतभाविते कुम्भे स्थापयेदेकविंशतिरात्रम्, अत ऊर्ध्वं प्रयोगः;

यथोक्तगुणानाम् શાસ્ત્રોક્ત ગુણવાળા शास्त्रोक्त गुणवाले, **आमलकानाम्** **सहस्रम्** એક હજાર આમળાંને एक हजार आंवलोंको, **सपिधानायाम्** ઢાંકણાવાળી ढक्कनसे युक्त, **बाष्पम्** વરાળ भाफ, **अनुद्वमन्त्याम्** બહાર ન નીકળે એવી बाहिर न निकले ऐसी, **आर्द्रपलाश-** લીલા ખાખરાની गीले पलाशकी, **द्रोण्याम्** કોઠીમાં द्रोणीमें, **अरण्य- गोमयाग्निभिः** અડાયાંના અગ્નિ વડે कण्डेकी अग्निसे, **उपस्वेदयेत्** બાફવાં स्विन्न करना चाहिए, **सुस्विन्न-** સારી રીતે બફાઈને भलीप्रकार स्विन्न होने पर, **शीतानि** ઠંડાં થયા પછી ठंडे करके, **उद्धृतकुलकानि** ઠળિયા કાઢી નાખીને बीज निकाल कर, **तानि** તે આમળાંને इन आंवलोंको, **आपोथ्य** ખાંડણિયામાં ખાંડીને कूट कर **पिप्पलीचूर्णानाम्** પીપરનું ચૂર્ણ पिप्पलीके चूर्णका, **आढकेन** **च** २५६ તોલા एक आढक (२५६ तोले), **विडङ्गतण्डुल-** વાવડિંગના દાણાનું विडंगतंडुलके, **चूर्णानाम्** ચૂર્ણ चूर्णका, **आढकेन** २५६ તોલા एक आढक (२५६ तोले), **शर्करायाः** સાકરનું ચૂર્ણ बारीक चीनी, **अध्यर्धेन आढकेन** ३८४ તોલા डेढ आढक (३८४ तोले), **तैलस्य** તેલ तैल, **मधुनः** મધ मधु, **सर्पिषश्च** અને ગાયનું ઘી घृत, **द्वाभ्याम् द्वाभ्याम् आढकाभ्याम्** દરેક ५१२ તોલા प्रत्येक दो दो आढक (५१२ तोले), **संयोज्य** સાથે મેળવીને मिला कर, **शुचौ** સ્વચ્છ स्वच्छ, **दृढे** તથા મજબૂત तथा मजबूत, **घृतभाविते** ઘીથી રીઢા થયેલા घृतसे भावित, **कुम्भे** ઘડામાં घड़ेमें, **एकविंशतिरात्रम्** એકવીસ રાત્રિ પર્યન્ત एकईस रात्रि पर्यंत, **स्थापयेत्** રાખવું रक्खे, **अतः** ત્યાર इसके, **ऊर्ध्वम्** પછી बाद, **प्रयोगः** તેનો પ્રયોગ કરવો इसका प्रयोग करे।

10-(1). Place a thousand fruits of the emblic myrobalans, conforming to the description given earlier, in a vat made of green palasa wood furnished with a lid and sealing the contents hermetically, cook over a fire of cow-dung cakes that have been gathered from the forest. After the myrobalans have been properly softened in the steam and allowed to cool, they should be de-seeded and rubbed. This paste should be mixed with 256 tolas of the powdered long pepper, 256 tolas of powdered grains of embelia, 384 tolas of powdered sugar and 512 tolas each of oil, honey and ghee; and the whole should be placed

१०. अनुद्वमन्त्याम्—अन्तर्धमन्त्याम् (ध.)
,, शर्करायाः—शर्कराचूर्णानाम् (ग. ध.)
,, शर्करायाः द्वाभ्यां द्वाभ्यामाढकाभ्याम्—शर्कराचूर्णाभ्यां द्वाभ्याम् (त.)

in a clean, strong, ghee-saturated earthen vessel and allowed to mature for a period of twenty-one nights. Thereafter it becomes fit for use. Thus has been described 'Another Linctus of Emblic Myrobalans.'

अस्य प्रयोगाद्वर्षशतमजरमायुस्तिष्ठतीति समानं पूर्वेण ॥ १० ॥

(इत्यामलकावलेहोऽपरः ।)

अस्य આના इसके, **प्रयोगात्** પ્રયોગથી प्रयोगसे, **अजरम्** વૃદ્ધાવસ્થાથી રહિત થઈ वृद्धावस्थासे रहित हो कर, **आयुः** આયુષ્ય आयु, **वर्षशतम्** સો વર્ષ પર્યન્ત सौ वर्ष तक, **तिष्ठति** રહે છે रहती है, **इति** આ સઘળું यह सब, **पूर्वेण** પૂર્વોક્ત પ્રયોગના पूर्वोक्त प्रयोगके, **समानम्** સમાન છે समान है ॥ १० ॥ (**इति** આ यह, **अपरः** બીજો दूसरा, **आमलकावलेहः** આમલકાવલેહ છે आमलकावलेह है।)

10. As a result of the use of this recipe, the person lives a hundred years of youthful life as in the case of the previous recipes. Thus has been described 'Another variety of Emblic Myrobalan Linctus.'

नागबलारसायनम्—

धन्वनि कुशास्तीर्णे स्निग्धकृष्णमधुरमृत्तिके सुवर्णवर्णमृत्तिके वा व्यपगतविषश्वापदपवनसलिलाग्निदोषे कर्षणवल्मीकश्मशानचैत्योषरावसथवर्जिते देशे यथर्तुसुखपवनसलिलादित्यसेविते जातान्यनुपहतान्यनध्यारूढान्यबालान्यजीर्णान्यधिगतवीर्याणि शीर्णपुराणपर्णान्यसंजातान्यपर्णानि तपसि तपस्ये वा मासे शुचिः प्रयतः कृतदेवार्चनः स्वस्ति वाचयित्वा द्विजातीन् चले सुमुहूर्ते नागबलामूलान्युद्धरेत्, तेषां सुप्रक्षालितानां त्वक्पिण्डमाम्रमात्रमक्षमात्रं वा श्लक्ष्णपिष्टमालोड्य पयसा प्रातः प्रयोजयेत्, चूर्णीकृतानि वा पिबेत् पयसा, मधुसर्पिर्भ्यां वा संयोज्य भक्षयेत्, जीर्णे च क्षीरसर्पिर्भ्यां शालिषष्टिकमश्नीयात् ।

शुचिः વૈદ્ય પવિત્ર થઈ वैद्य पवित्र हो कर, **प्रयतः** મનને કાબૂમાં રાખી मनको वशमें रख कर, **कृतदेवार्चनः** દેવતાઓનું પૂજન કરી देवताओंका पूजन कर, **द्विजातीन्** બ્રાહ્મણો પાસે ब्राह्मणोंके पास, **स्वस्ति वाचयित्वा** સ્વસ્તિવાચન કરાવી स्वस्तिवाचन कराके, **तपसि** માઘ माघ, **तपस्ये वा** અથવા ફાગણ अथवा फाल्गुन, **मासे** માસમાં मासमें, **चले** ચલ चल, **सुमुहूर्ते** તથા સારા મુહૂર્તમાં तथा शुभ मुहूर्तमें, **धन्वनि** જાંગલ દેશમાં जाङ्गल देशमें, **कुश-आस्तीर्णे** દર્ભોથી ઢંકાયેલા कुशासे आच्छादित, **स्निग्ध-** ચીકણી चीकनी, **कृष्ण-** કાળી काली **मधुर-** અને મધુર और मधुर, **मृत्तिके** માટીવાળા मिट्टीवाली, **सुवर्णवर्ण-** અથવા સુવર્ણ રંગની अथवा सुवर्णके वर्णकी, **मृत्तिके वा** માટીવાળા मिट्टीवाली, **व्यपगत-** તથા જેનાથી દૂર રહેલાં છે जहाँ पर नहीं हैं, **विष-** વિષ विष, **श्वापद-** હિંસ્ર પ્રાણીઓ हिंस्र प्राणी, **पवन-** પવન वायु, **सलिल-** પાણી जल, **अग्निदोषे** तथा અગ્નિના દોષ એવા तथा अग्निदोष ऐसे, **कर्षण-** હળની ખેડ हलका चलना, **वल्मीक-** રાફડો वल्मीक, **श्मशान-** શ્મશાન श्मशान, **चैत्य-** ચૈત્ય (દેવાલય) चैत्य, **ऊषर-** ખારવાળી જમીન ऊसर, **अवसथ-** તથા રહેવાનાં ઘરથી रहनेके मकानसे, **वर्जिते** રહિત रहित, **यथर्तु-** તથા ઋતુને યોગ્ય तथा ऋतुके अनुकूल, **सुख-** સુખકારક सुखदायक, **पवन-** પવન वायु, **सलिल-** પાણી जल, **आदित्य-** અને તડકાથી और तापसे, **सेविते** સેવાયેલા सेवित, **देशे** દેશમાં प्रदेशमें, **जातानि** ઉત્પન્ન થયેલાં उत्पन्न हुई, **अनुपहतानि** જંતુઓ વગેરેથી ઉપઘાત નહિ પામેલાં जिनकी जन्तु आदिसे किसी प्रकार क्षति न हुई हो, **अनध्यारूढानि** મોટાં ઝાડ વગેરેથી નહિ દબાયેલાં जो दूसरे बड़े वृक्षोंसे आक्रान्त न हुई हो, **अबालानि** તરતનાં

११ जातान्युपहतानि—जातान्यनिम्नेऽनुपहतानि (ख.)
,, अधिगतवीर्याणि—अविगतवीर्य्याणि (ड.)
,, जाता...पर्णानि—जातामनुपहतामनध्यारूढामबालामजीर्णामधिगतवीर्यां शीर्णपुराणपर्णामसंजातान्यपर्णा (फ.)
,, असंजातान्यपर्णानि—असंजातफलानि (ड. ध.)

११. नागबलामूलान्युद्धरेत्—नागबलां मूलत उद्धरेत् (क.)

નહિ ઊગેલાં जो बहुत छोटी न हो, अजीर्णानि જીર્ણ નહિ થયેલાં जो जीर्ण न हुई हो, अधिगतवीर्याणि વીર્યથી ભરેલાં जो परिपक्व वीर्यशाली हो, शीर्णपुराणपर्णानि જૂનાં પાંદડાં જેનાં ખરી ગયાં છે એવાં जिनके पुराने पते झड़ गये हों, असंजात- अन्यपर्णानि તથા જેને નવાં પાંદડાં નથી આવ્યાં એવાં और जिनको नये पते न आये हों ऐसी, नागबला- ગંગેટીનાં नागबलाकी, मूलानि મૂળોને जड़ोंको, उद्धरेत् જમીનમાંથી બહાર કાઢવાં जमीनसे उखाड़े, सुप्रक्षालितानाम् સારી રીતે ધોઈ નાખેલાં अच्छी तरह धो कर, तेषाम् ગંગેટીનાં મૂળોની છાલના કલ્કને गंगेरनकी जड़ोंकी छालके कल्कको, आम्रमात्रम् अक्षमात्रम् वा ચાર તોલા અથવા એક તોલા પ્રમાણમાં पल प्रमाण अथवा कर्ष प्रमाणमें, श्लक्ष्ण-पिष्टम् બારીક પીસી बारीक पीस कर, पयसा ગાયના દૂધ સાથે गायके दूधमें, आलोड्य ઘોળીને घोल कर, प्रातः પ્રાતઃકાળમાં प्रातःकाल, प्रयोजयेत् પ્રયોગમાં લેવો प्रयोगमें लेना चाहिए, चूर्णीकृतानि वा અથવા તે ગંગેટીના મૂળની છાલને या गंगेरनकी जड़ोंकी छालका चूर्ण करके, पयसा ગાયના દૂધની સાથે गायके दूधके साथ, पिबेत् પીવી पिये, मधु- અથવા મધ अथवा मधु, सर्पिर्भ्याम् वा અને ઘી और घृतके, संयोज्य સાથે મેળવીને साथ मिला कर, भक्षयेत् ખાવી खाये, जीर्णे च આ ઔષધ પચી જાય ત્યારે इस औषधके जीर्ण हो जाने पर, क्षीर- ગાયનાં દૂધ गायके दूध, सर्पिर्भ्याम् અને ઘીની સાથે और घृतके साथ, शालिषष्टिकम् શાલિ અથવા સાઠી ચોખા शालि अथवा सांठी चावल, अश्नीयात् ખાવા खाये।

11-(1). Collect roots of the gingo fruit plant of the following description and in the following manner. First as regards description:—The plant to be selected must be found growing on dry scrub-land overgrown with sacred grass, in a soil that is sticky, black and sweet to the taste, or in golden-colored loam, in a tract free from poisonous things, cruel animals and the ravages of wind, water and fire, not used for tillage, uncovered with ant-hills and far from a cremation ground, memorial structure, a barren saline patch, or habitation, and enjoying seasonal and pleasant breezes, rains and sunshine. The roots should be undamaged, unsmothered by those of a neighbouring tree, neither too tender nor too old, and fully imbued with potency and of a plant that has shed its old leaves but has not yet put forth fresh ones. Now concerning the time and mode of collection:—Either in the month of Magha or in that of Phalguna, the plant-collector, who has previously purified and consecrated himself and has obtained the blessings of the brahmanas in his expedition, should choosing an auspicious muhurta, pull out the gingo-fruit plant by its roots. After washing the roots thoroughly, their bark should be pounded into smooth paste to form a bolus either of the weight of four tolas or one tola and mixing this in milk, one should make use of the potion early in the morning. Or the drug may be turned into powder and taken with milk; or the powder may be licked up, mixed with honey and ghee. After it has been digested, the person should eat a dish of cooked sali or shashtika rice with milk and ghee.

संवत्सरप्रयोगादस्य वर्षशतमजरं वयस्तिष्ठतीति समानं पूर्वेण ॥ ११ ॥

(इति नागबलारसायनम् ।)

अस्य આના इसके, **संवत्सर-** એક વર્ષ પર્યન્ત एक वर्ष तक, **प्रयोगात्** પ્રયોગથી प्रयोगसे, **वयः** આયુષ્ય आयु, **अजरम्** વૃદ્ધાવસ્થાથી રહિત થઈ वृद्धावस्थासे रहित हो कर, **वर्षशतम्** સો વર્ષ પર્યન્ત सौ वर्ष तक, **तिष्ठति** રહે છે रहती है, **इति** આ સઘળું यह सब, **पूर्वेण** પૂર્વોક્ત પ્રયોગના पूर्वोक्त प्रयोगके, **समानम्** સમાન છે समान है ॥११॥ (**इति** આ यह, **नागबलारसायनम्** નાગબલારસાયન છે नागबलारसायन है)

11. By using this vitalizer for a period of one year, one remains young for a hundred years. The rest of the benefits are the same as those described earlier. Thus has been described 'The Gingo-fruit Vitalizer.'

बलादिरसायनानि—

बलातिबलाचन्दनागुरुधवतिनिशखदिरशिंशपासनस्वरसाः पुनर्नवान्ताश्चौषधयो दश नागबलया व्याख्याताः ।

बला- બલા बला, **अतिबला-** ખપાટ कंघी, **चन्दन-** ચંદન चन्दन, **अगुरु-** અગર अगर, **धव-** ધાવડો धव, **तिनिश-** તણછ तिनिस, **खदिर-** ખેર खैरकत्था, **शिंशपा-** સીસમ सीसम, **असन-** તથા અસન तथा असन, **स्वरसाः** એઓના સ્વરસો इनके स्वरस, **पुनर्नवान्ताः** અને લાલ સાટોડી જેમાં છેલ્લી છે એવી અમૃતા આદિ और गदह पुरना जिनके अन्तमें है ऐसी अमृता आदि, **दश** દશ दस, **ओषधयः** ઓષધિઓનું ओषधियोंका, **नागबलया** ગંગેટીથી गंगेरनसे, **व्याख्याताः** વ્યાખ્યાન થઈ ગયું છે व्याख्यान हो गया है।

१२. तिनिशखदिरशिंशपा°- खदिरमारशिंशपा° (च.)
,, शिंशपासनस्वरसाः शिंशपासनपुनर्नवास्वरसाः स्वरसरूपाः स्युः (च.)
,, दश नागबलया व्याख्याताः—या वयःस्थापना व्याख्यातास्तासां स्वरसा नागबलावत् (त. द. च.)

12-(1). Take the expressed juice of heart-leaved sida, common mallow, sandal wood, aloe wood, oojein, catechu, rose wood, asana, and the expressed juice of the group of ten plants ending with hog's weed. The mode of preparation and administration is the same as that laid down for gingo fruit.

स्वरसानामलाभे त्वयं स्वरसविधिः—चूर्णानामाढकमाढकमुदकस्याहोरात्रस्थितं मृदितपूतं स्वरसवत् प्रयोज्यम् ॥ १२ ॥

स्वरसानाम् સ્વરસોના स्वरसोंके, **अलाभे तु** અભાવામાં अभावमें, **अयम्** આ यह, **स्वरसविधिः** સ્વરસ કરવાની વિધિ છે स्वरस करनेकी विधि है, **चूर्णानाम्** ઓષધિઓનું ચૂર્ણ औषधियोंका चूर्ण, **आढकम्** ૨૫૬ તોલા લઈ एक आढक मात्र ले कर, **उदकस्य आढकम्** ૨૫૬ તોલા પાણીમાં जलके २५६ तोलेमें, **अहोरात्र-** એક અહોરાત્ર પર્યંત एक दिनरात, **स्थितम्** રહેવા દેવું पड़ा रहने दे, **मृदितपूतम्** પછી તેને હાથથી ચોળીને વસ્ત્રથી ગાળીને फिर हाथसे मल कर छान कर, **स्वरसवत्** સ્વરસની માફક स्वरसकी भांति, **प्रयोज्यम्** પ્રયોગમાં લેવું प्रयोगमें लावे ॥ १२ ॥

12 In cases where the fresh-pressed juice of drug is not available, the following procedure should be resorted to as an alternative. Take 256 tolas of the powder of the drug whose expressed juice is required, and keep it soaking in 256 tolas of water for a period of 24 hours; squeezing and straining that water, use it in place of the expressed juice.

भल्लातकक्षीरम्—

भल्लातकान्यनुपहतान्यनामयान्यापूर्णरसप्रमा-

१२. प्रयोज्यम्—प्रयोजयेत् (च.)

णवीर्याणि पक्वजाम्बवप्रकाशानि शुचौ शुक्रे वा मासे संगृह्य यवपल्ले माषपल्ले वा निधापयेत्, तानि चतुर्मासस्थितानि सहसि सहस्ये वा मासे प्रयोक्तुमारभेत शीतस्निग्धमधुरोपस्कृतशरीरः।

शुचौ જેઠ जेठ, **शुक्रे वा** અથવા અષાડ अथवा आषाढ़, **मासे** માસમાં मासमें, **अनुपहतानि** જંતુ વગેરેએ જેને ખાધાં ન હોય એવાં जंतु आदि किसीने खाया न हों ऐसे, **अनामयानि** રોગરહિત रोगरहित, **रस-प्रमाण-वीर्याणि** સંપૂર્ણ રસ, પ્રમાણ અને વીર્યથી યુક્ત संपूर्ण रस, प्रमाण और वीर्यसे सम्पन्न, **पक्व-** પાકેલાં पके हुए, **जाम्बव-** જાંબુના जामुनके, **प्रकाशानि** જેવા વર્ણવાળાં समान वर्णवाले, **भल्लातकानि** ભિલામાંને भिलांवेको, **संगृह्य** લઈને ले कर, **यवपल्ले** જવના ઢગલામાં जौके ढेरमें, **माषपल्ले वा** અથવા અડદના ઢગલામાં अथवा उड़दके ढेरमें, **निधापयेत्** રાખવાં रक्खे **चतुर्मास-** ચાર માસ चार मास, **स्थितानि** રાખ્યા પછી रखनेके बाद, **तानि** તે ભિલામાંઓને इन भिलावोंको, **सहसि** માગશર अगहन, **सहस्ये वा** અથવા પોષ या पौष, **मासे** માસમાં मासमें, **शीत-** શીત शीत, **स्निग्ध-** સ્નિગ્ધ स्निग्ध, **मधुर-** અને મધુર દ્રવ્યોથી और मधुर द्रव्योंसे, **उपस्कृतशरीरः** શરીરને સંસ્કાર આપી शरीरका संस्कार करके, **प्रयोक्तुम्** પ્રયોગ કરવાનો सेवन करना, **आरभेत** આરંભ કરવો प्रारम्भ करे ।

13-(1). Collect either in the month of Jyeshtha or Ashadha a quantity of marking nuts, which are undamaged, undiseased, conforming to the specifications as regards the juice, size and potency and of the color of ripe jambul fruits and store them in a heap of barley-corn or black gram. The nuts should be stored for a period of four months. They may be used in the month of Margasirsha or Pausha in the following manner, the person wishing to take it having prepared his body with cooling, unctuous and sweet articles.

पूर्वं दशभल्लातकान्यापोथ्याष्टगुणेनाम्भसा साधु साधयेत्, तेषां रसमष्टभागावशेषं पूतं सपयस्कं पिबेत् सर्पिषाऽन्तर्मुखमभ्यज्य ।

पूर्वम् પ્રયોગના પ્રારંભમાં प्रयोगके प्रारम्भमें, **दश-** દશ दस, **भल्लातकानि** ભિલામાંને भिलांवेको, **आपोथ्य** ખાંડીને कुचल कर, **अष्टगुणेन** આઠગણા आठगुने, **अम्भसा** પાણી સાથે जलके साथ, **साधु** સારી રીતે अच्छी तरह, **साधयेत्** પકાવવાં पकावे, **तेषाम्** તેનો उनका, **अष्ट-भाग-** આઠમો ભાગ आठवाँ भाग, **अवशेषम्** બાકી રહે ત્યારે बाकी रहे तब, **पूतम्** વસ્ત્રથી ગાળીને छान कर, **सपयस्कम्** ગાયના દૂધની સાથે गायके दूधके साथ, **रसम्** તે રસ वह रस, **सर्पिषा** ગાયનું ઘી गायके घृतसे, **अन्तर्मुखम्** મોઢાની અંદર मुखको अन्दरसे, **अभ्यज्य** ચોપડીને लिप्त करके, **पिबेत्** પી જવો पिये ।

13-(2). First of all taking ten of the marking nuts, and having crushed them in a mortar, boil the pulp well in eight times its quantity of water. When the decoction has boiled down to one eighth of its original quantity, it should be filtered and taken with milk, the mouth being previously smeared inside with ghee.

तान्येकैकभल्लातकोत्कर्षापकर्षेण दश भल्लातकान्यात्रिंशतः प्रयोज्यानि, नातः परमुत्कर्षः। प्रयोगविधानेन सहस्रपर एव भल्लातकप्रयोगः। जीर्णे च ससर्पिषा पयसा शालिषष्टिकाशनमुपचारः, प्रयोगान्ते च द्विस्तावत् पयसैवोपचारः।

दश भल्लातकानि દશ ભિલામાંથી શરૂ કરી **દશ**

१३. यवपल्ले माषपल्ले वा–यवपर्णे माषपर्णे वा (ब.)

१३. रसमष्टभागावशेषं–रसमष्टभागावशिष्टम् (ब.)

„ सहस्रपर एव–सहस्रपरः (ब.)

भिलांवेसे प्रारम्भ कर, तानि एकैक-भल्लातक-उत्कर्ष-अपकर्षेण आत्रिंशतः प्रयोज्यानि अतः परम् उत्कर्षः न તેઓમાં હમેશાં એક એક ભિલામું ત્રીસની સંખ્યા સુધી વધારતા જવું; ત્રીસ ભિલામાંથી વધારેનો પ્રયોગ નિષિદ્ધ છે. પછી એકએક ભિલામું દશની સંખ્યા સુધી ઘટાડતા જવું उनमें प्रतिदिन एक एक भिलांवा तीसकी संख्या तक बढ़ाते जाना चाहिए; तीस भिलांवेसे अधिकका प्रयोग निषिद्ध है। पश्चात् एक एक भिलांवा दसकी संख्या तक घटाते जाना चाहिए, प्रयोगविधानेन આ પ્રકારે ભલ્લાતકનું પ્રયોગવિધાન દર્શાવેલું હોવાથી इस प्रकार भिलांवेकी बतायी हुई प्रयोगविधिके कारण, भल्लातकप्रयोगः ભિલામાંનો પ્રયોગ भिलांवेका प्रयोग, सहस्रपरः एव એક હજાર ભિલામાં સુધી જ કરવો જોઈએ एक हजार भिलांवे तक ही करना चाहिए, जीर्णे च ઉપયોગમાં લીધેલાં ભિલામાં પચી જાય ત્યારે उपयोगमें लाये हुए भिलांवे जीर्ण हो जाने पर, ससर्पिषा ગાયના ઘીથી યુક્ત गायके घृतसे युक्त, पयसा દૂધ સાથે दूधके साथ, शालिषष्टिक- શાળ અથવા સાઠી ચોખાનું शालि और सांठी चावलका, अशनम् ભોજન मोजन, उपचारः આવશ્યક છે आवश्यक है, प्रयोगान्ते च પ્રયોગ પૂરો થયા પછી इस प्रयोगके पूरा होनेके बाद, पयसा एव द्विः तावत् उपचारः થોડા દિવસ સુધી બે વાર દૂધ પીવું આવશ્યક છે कुछ दिन तक दो बार दूध पीना आवश्यक है ।

13-(3). Increase the number of the marking nuts by one each succeeding day, till the total becomes thirty; thereafter decrease the number by one in the same manner till the initial number of ten is reached. This dose should not be exceeded. The maximum dose is thirty and minimum ten. This ascending and descending scale of dosage should be maintained until the total number of marking nuts consumed reaches a thousand. When the daily dose is fully digested, a meal of cooked sali or shashtika rice supplemented with milk and ghee, should be eaten. After the completion of the course, only two meals a day with milk should be taken.

तत्प्रयोगाद्वर्षशतमजरं वयस्तिष्ठतीति समानं पूर्वेण ॥ १३ ॥

(इति भल्लातकक्षीरम् ।)

तत्प्रयोगात् તેઓના પ્રયોગથી उनके प्रयोगसे, वयः આયુષ્ય आयु, अजरम् વૃદ્ધ અવસ્થાથી રહિત થઈ वृद्धावस्थासे रहित हो कर, वर्षशतम् સો વર્ષ પર્યન્ત सौ वर्ष तक, तिष्ठति રહે છે रहती है, इति બાકીનું સઘળું शेष सब, पूर्वेण पूर्वोक्त પ્રયોગની पूर्वोक्त प्रयोगके, समानम् સમાન છે समान है ॥१३॥ (इति આ यह, भल्लातकक्षीरम् ભલ્લાતકક્ષીર છે भल्लातकक्षीर है ।)

13. By the course of this vitalizing drug for a period of one year, one attains the benefits enumerated earlier, such as the retention of youth for a hundred years etc. Thus has been described 'The Marking-nut Milk'.

भल्लातकक्षौद्रम्—

भल्लातकानां जर्जरीकृतानां पिष्टस्वेदनं पूरयित्वा भूमावाकण्ठं निखातस्य स्नेहभावितस्य दृढस्योपरि कुम्भस्यारोप्योडुपेनापिधाय कृष्णमृत्तिकावलिप्तं गोमयाग्निभिरुपस्वेदयेत्; तेषां यः स्वरसः कुम्भं प्रपद्येत, तमष्टभागमधुसंप्रयुक्तं द्विगुणघृतमद्यात्;

जर्जरीकृतानाम् જેઓના નાના નાના ટુકડા કરેલા છે એવાં जिनके छोटे छोटे टुकड़े किये हैं ऐसे, भल्लातकानाम् ભિલામાંઓને भिलांवेको, पिष्टस्वेदनम् તળિયે છિદ્રવાળા ઘડામાં पेंदीमें छिद्रवाले घड़ेमें, पूरयित्वा ભરી भर कर, आकण्ठम् ગળા સુધી गले तक, भूमौ ભૂમિમાં भूमिमें, निखातस्य દાટેલા गाड़े हुए, स्नेहभावितस्य અંદર ઘી ચોપડેલા अन्दर घृतसे लिप्त, दृढस्य મજબૂત मजबूत, कुम्भस्य ઘડાના घड़ेके, उपरि ઉપર ऊपर,

१४. तम्–ततो (त.)

आरोप्य રાખી रख कर, **उडुपेन** છિદ્રવાળા રામપાત્રથી छिद्रवाले शरावसे, **अपिधाय** ઢાંકીને ढंक कर, **कृष्णमृत्तिका-** કાળી માટીથી काली मिट्टीसे, **अवलिप्तम्** લેપ કરી लेप करके, **गोमयाग्निभिः** અડાયાંના અગ્નિ વડે उपलोंकी अग्निसे, **उपस्वेदयेत्** બાફવાં स्वेद देवें, **तेषाम्** તેઓનો उनका, **यः** જે जो, **स्वरसः** સ્વરસ स्वरस, **कुम्भम्** નીચે દાટેલા ઘડામાં नीचे गाड़े हुए घड़ेमें, **प्रपद्येत** પ્રાપ્ત થાય टपके, **तम्** તેને उसको, **अष्टभाग-** આઠમા ભાગના आठवें भागके, **मधु-** મધ સાથે मधुके साथ, **संप्रयुक्तम्** ભેળવીને मिला कर, **द्विगुण- घृतम्** બમણું ઘી નાખી दुगुना घी डालकर, **अश्नात्** ખાવું खावे;

14-(1). Crush a quantity of marking-nuts and place the pulp in a pot with a number of small holes at the bottom and keeping this pot over another which has been saturated with ghee and buried upto its neck in the ground. kindle a circular fire of cow-dung-cakes. The part where the two pots meet should be lined with black clay and a tight fitting lid placed over the upper pot. The essence of the marking-nuts which is then distilled into the lower part should be used, mixed with its eighth part of honey and twice its quantity of ghee.

तत्प्रयोगाद्वर्षशतमजरं वयस्तिष्ठतीति समानं पूर्वेण ॥ १४ ॥

(इति भल्लातकक्षौद्रम्।)

तत्- प्रयोगात् તેના પ્રયોગથી उसके प्रयोगसे, **वयः** આયુષ્ય आयु, **अजरम्** વૃદ્ધાવસ્થાથી રહિત થઈ वृद्धावस्थासे रहित हो कर, **वर्षशतम्** સો વર્ષ પર્યન્ત सौ वर्षतक, **तिष्ठति** ટકી રહે છે रहती है, **इति** આ સઘળું यह सब, **पूर्वेण** પૂર્વોક્ત પ્રયોગના पूर्वोक्त प्रयोगके, **समानम्** સમાન છે समान है ॥१४॥ (**इति** આ यह, **भल्लातकक्षौद्रम्** ભલ્લાતકક્ષૌદ્ર છે भल्लातकक्षौद्र है ।)

14. By the use of this vitalizing drug one remains young for a hundred years, etc., as described earlier. Thus has been described 'The Marking-nut Honey.'

भल्लातकतैलम्—

भल्लातकतैलपात्रं सपयस्कं मधुकेन कल्केनाक्षमात्रेण शतपाकं कुर्यादिति समानं पूर्वेण ॥१५॥

(इति भल्लातकतैलम्।)

सपयस्कम् ગાયના દૂધમાં गायके दूधमें, **भल्लातक-** ભિલામાનું भिलांवेके, **तैल-** તેલ तैलका, **पात्रम्** એક આઢક एक आढक, **अक्षमात्रेण** એક તોલા एक तोले, **मधुकेन** જેઠીમધના मुलहठीके, **कल्केन** કલ્ક સાથે મેળવીને कल्कके साथ मिला कर, **शतपाकम् कुर्यात्** સો વખત પકાવવું सौ पाक करना चाहिए, **इति** બાકીનું સઘળું शेष सब, **पूर्वेण** પૂર્વોક્ત પ્રયોગના पूर्वोक्त प्रयोगके, **समानम्** સમાન છે समान है ॥ १५ ॥ (**इति** આ यह, **भल्लातकतैलम्** ભલ્લાતકતૈલ છે भल्लातकतैल है ।)

15. Take 256 tolas of the oil of the marking-nut prepared in the above way and mixing it with cow's milk and a tola of the paste of liquorice, cook it a hundred times The rest of the details are the same as those mentioned in the case of earlier prescriptions. Thus has been described 'The Marking-nut Oil.'

भल्लातकविधानम्—

भल्लातकसर्पिः, भल्लातकक्षीरं, भल्लातकक्षौद्रं, गुडभल्लातकं, भल्लातकयूषः, भल्लातकतैलं, भल्लातकपललं, भल्लातकसक्तवः, भल्लातकलवणं,

१५. मधुकेन–माधुकेन (च.)
,, भल्लातकतैलपात्रम्–भल्लातकस्नेहपाकस्नेहपात्रम् (च.)
,, मधुकेन कल्केनाक्षमात्रेण–मधुकाक्षमात्रेण (च)
,, शतपाकं कुर्यात्–शतपाकम् (च.)

भल्लातकतर्पणम्, इति भल्लातकविधानमुक्तं भवति ॥ १६ ॥

भल्लातकसर्पिः ભલ્લાતકસર્પિ भल्लातकसर्पि, **भल्लातकक्षीरम्** ભલ્લાતકક્ષીર भल्लातकक्षीर, **भल्लातकक्षौद्रम्** ભલ્લાતકક્ષૌદ્ર भल्लातकक्षौद्र, **गुडभल्लातकम्** ગુડભલ્લાતક गुडभल्लातक, **भल्लातकयूषः** ભલ્લાતકયૂષ भल्लातकयूष, **भल्लातकतैलम्** ભલ્લાતકતૈલ भल्लातकतैल, **भल्लातकपललम्** ભલ્લાતકપલલ भल्लातकपलल, **भल्लातकसक्तवः** ભલ્લાતકસક્તુ भल्लातकसक्तु, **भल्लातकलवणम्** ભલ્લાતકલવણ भल्लातकलवण, **भल्लातकतर्पणम्** અને ભલ્લાતકતર્પણ और भल्लातकतर्पण, **इति** આ પ્રમાણે इस तरह, **भल्लातकविधानम्** ભિલામાંના પ્રયોગોનું વિધાન भिलावोंके प्रयोगका विधान, **उक्तम् भवति** કહ્યું છે कहा है ॥ १६ ॥

16. Marking-nut ghee, marking-nut milk, marking-nut honey, marking-nut gur, marking-nut soup, marking-nut oil, marking-nut paste, marking-nut flour, marking-nut salt and marking-nut demulcent drink; thus have been described the various pharmaceutical preparations of marking-nut.

भल्लातकगुणाः—

भवन्ति चात्र—

भल्लातकानि तीक्ष्णानि पाकीन्यग्निसमानि च ।
भवन्त्यमृतकल्पानि प्रयुक्तानि यथाविधि ॥ १७ ॥

अत्र च આ વિષયમાં इस विषयमें, **भवन्ति** શ્લોકો છે કે श्लोक हैं कि, **भल्लातकानि** ભિલામાં भिलांवे, **तीक्ष्णानि** તીક્ષ્ણ तीक्ष्ण, **पाकीनि** પાક કરવાવાળાં पाक करनेवाले, **अग्निसमानि च** અને અગ્નિસમાન છે और अग्निके समान हैं, **यथाविधि** પરંતુ વિધિપુરઃસર परन्तु विधिपूर्वक, **प्रयुक्तानि** પ્રયોગમાં લીધાં હોય તો प्रयोग करने पर, **अमृतकल्पानि** અમૃતતુલ્ય अमृततुल्य, **भवन्ति** બને છે होते हैं ॥ १७ ॥

Here are verses again—

17. The marking-nut is hot, suppurative and fiery in character. Administered properly it rivals ambrosia itself.

एते दशविधास्त्वेषां प्रयोगाः परिकीर्तिताः ।
रोगप्रकृतिसात्म्यज्ञस्तान् प्रयोगान् प्रकल्पयेत् ॥ १८ ॥

एषाम् આ ભિલામાંઓના इन भिलांवेके, **एते** આ યે, **दशविधाः** દશ પ્રકારના दस प्रकारके, **प्रयोगाः** પ્રયોગો प्रयोग, **परिकीर्तिताः** વર્ણવાઈ ગયા છે बताये गये हैं, **रोग-** રોગ रोग, **प्रकृति-** પ્રકૃતિ प्रकृति, **सात्म्यज्ञः** અને સાત્મ્યને જાણનાર વૈદ્ય और सात्म्यको जाननेवाला वैद्य, **तान्** તે उन, **प्रयोगान्** પ્રયોગોને प्रयोगोंको, **प्रकल्पयेत्** ઉપયોગમાં લેવા उपयोगमें लेवे ॥ १८ ॥

18. The ten modes of its preparations have been described. The physician who is conversant with disease, habitus and homologation should prescribe the suitable preparations.

कफजो न स रोगोऽस्ति न विबन्धोऽस्ति कश्चन ।
यं न भल्लातकं हन्याच्छीघ्रं मेधाग्निवर्धनम् ॥ १९ ॥
(इति भल्लातकविधिः ।)

कफजः કફજન્ય कफजन्य, **सः** એવો કોઈ ऐसा कोई, **रोगः** રોગ रोग, **न अस्ति** નથી नहीं है, **कश्चन** અને એવો કોઈ और ऐसा कोई, **विबन्धः** વિબંધ (સ્રોતોમાં મળો અથવા દોષોનું રોકાઈ જવું) विबंध (स्रोतोंमें मलों अथवा दोषोंका रुक जाना), **न अस्ति** નથી नहीं है, **यम्** જેને जिसको, **भल्लातकम्** ભિલામું भिलांवा, **न हन्यात्** ન હણે नष्ट न करे, **शीघ्रम्** વળી ભિલામું તુરત और भिलांवा तुरंत, **मेधा-** મેધા मेधा, **अग्नि-वर्धनम्** તથા જઠરાગ્નિને વધારનારું છે एवं अग्निको बढानेवाला है ॥ १९ ॥ (**इति** આ यह, **भल्लातकविधिः** ભલ્લાતકવિધિ છે भल्लातकविधि है ।)

19. There is no disease born of kapha or disorder partaking of the nature of constipation, which cannot be cured quickly by the use of

१८. एते दशविधास्त्वेषां—त्रयोदशविधस्तेषां (ग.)

marking-nut, as it is also promotive of intelligence and the gastric fire. Thus ends the prescriptions relating to the Marking-nut.

रसायनसेवाफलम्—

प्राणकामाः पुरा जीर्णाश्च्यवनाद्या महर्षयः ।
रसायनैः शिवैरेतैर्बभूवुरमितायुषः ॥ २० ॥

पुरा પૂર્વે पुराने कालमें, **च्यवनाद्याः** ચ્યવન વગેરે च्यवन आदि, **महर्षयः** મહર્ષિઓ महर्षियों, **जीर्णाः** વૃદ્ધ થયા છતાં પણ वृद्ध होने पर भी, **प्राणकामाः** જીવનની ઇચ્છાવાળા થઈ जीवनके इच्छुक हो कर, **एतैः** આ इन्हीं, **शिवैः** કલ્યાણકારક कल्याणकारक, **रसायनैः** રસાયનોના પ્રયોગથી रसायनोंके प्रयोगसे. **अमितायुषः** અમિત આયુષ્યવાળા अपरिमित आयुवाले, **बभूवुः** થયા હતા हुए थे ॥ २० ॥

20. In the beginning, the great sages such as Chyavana and others, having become aged but being moved by the urge for life, succeeded in prolonging their lives indefinitely by the use of excellent vitalizers.

ब्राह्मं तपो ब्रह्मचर्यमध्यात्मध्यानमेव च ।
दीर्घायुषो यथाकामं संभृत्य त्रिदिवं गताः ॥२१॥

दीर्घायुषः અને તેઓ દીર્ઘાયુષ્યવાળા થઈને और वे दीर्घायु हो कर, **ब्राह्मम् तपः** બ્રહ્મસંબંધી તપ ब्रह्मसम्बन्धी तप, **ब्रह्मचर्यम्** બ્રહ્મચર્ય ब्रह्मचर्य, **अध्यात्म-** તથા અધ્યાત્મ अध्यात्म, **ध्यानम्** ધ્યાનને ध्यानको, **यथाकामम्** સ્વેચ્છાનુસાર यथेष्ट, **संभृत्य** આચરીને करके, **त्रिदिवम्** સ્વર્ગમાં स्वर्गमें, **गताः** ગયા હતા गये थे ॥ २१ ॥

21. These long-lived ones, having prosecuted spiritual austerities, celibacy and meditation of the spirit to their hearts' content, betook themselves to heaven.

तस्मादायुःप्रकर्षार्थं प्राणकामैः सुखार्थिभिः ।
रसायनविधिः सेव्यो विधिवत्सुसमाहितैः ॥ २२ ॥

तस्मात् તેથી इस लिए, **प्राणकामैः** જીવનની ઇચ્છાવાળા जीवनकी इच्छावाले, **सुखार्थिभिः** અને સુખની કામનાવાળા પુરુષોએ और सुखकी कामनावाले पुरुषोंको, **आयुः- प्रकर्षार्थम्** આયુષ્યની વૃદ્ધિ માટે आयुकी वृद्धिके लिए, **सुसमाहितैः** બહુ સાવધાનીથી बहुत एकाग्र चित्तसे, **विधिवत्** વિધિપુરઃસર विधिपूर्वक, **रसायन-विधिः** રસાયનવિધિને रसायनविधिका, **सेव्यः** સેવવો જોઈએ सेवन करना चाहिए ॥ २२ ॥

22. Hence those who are moved by the urge to live and the quest for happiness should, in order to have abundant life, betake themselves with great attention and in the prescribed manner, to the procedure of vitalization.

द्वितीयरसायनपादोक्तविषयाः—

तत्र श्लोकः—

रसायनानां संयोगाः सिद्धा भूतहितैषिणा ।
निर्दिष्टाः प्राणकामीये सप्तत्रिंशन्महर्षिणा ॥२३॥

तत्र તે વિષયમાં उस विषयमें, **श्लोकः** ઉપસંહારનો શ્લોક છે કે उपसंहारका श्लोक है कि, **भूतहितैषिणा** સર્વ પ્રાણીઓનું કલ્યાણ ઇચ્છતા सब प्राणियोंका हित चाहनेवाले, **महर्षिणा** મહર્ષિએ महर्षिने, **प्राणकामीये** આ પ્રાણકામીય નામના બીજા પાદમાં इस प्राणकामीय नामके दूसरे पादमें, **रसायनानाम्** રસાયનોના रसायनोंके, **सप्तत्रिंशत्** સાડત્રીસ सैंतीस, **सिद्धाः** સિદ્ધ सिद्ध, **संयोगाः** પ્રયોગો प्रयोग, **निर्दिष्टाः** કહ્યા છે कह दिये हैं ॥२३॥

Here is the recapitulatory verse—

23. Thirty-seven infallible modes of the application of vitalizers have been set out in this quarter entitled 'The

२१. ब्राह्मं–ध्यानं (ग. घ. ष. फ.)
,, यथाकामं- यथाकालं (थ.)

२३. सप्तत्रिंशन्महर्षिणा–सप्त चैव दशर्षिणा (त. ष. फ)

urge to live' by the sage, the well-wisher of all creatures.

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते चिकित्सास्थाने रसायनाध्याये प्राणकामीयो नाम रसायनपादो द्वितीयः ॥ १-(२)॥

इति આ પ્રમાણે इस प्रकार, **अग्निवेशकृते** અગ્નિવેશે રચેલા अग्निवेशसे बनाये, **चरकप्रतिसंस्कृते तन्त्रे** અને ચરકથી પ્રતિસંસ્કાર પામેલા આ શાસ્ત્રમાં और चरकके द्वारा संस्कृत इस शास्त्रके, **चिकित्सास्थाने** ચિકિત્સાસ્થાન વિષે चिकित्सास्थानमें, **रसायनाध्याये** રસાયનાધ્યાયમાં रसायनाध्यायमें, **प्राणकामीयः** 'પ્રાણકામીય' 'प्राणकामीय', **नाम** નામનો नामका, **द्वितीयः** બીજો दूसरा, **रसायनपादः** રસાયનપાદ સંપૂર્ણ થયો रसायनपाद समाप्त हुआ ॥ १-(२)॥

1-(2). Thus, in the Section on Therapeutics, in the treatise compiled by Agnivesa and revised by Caraka, the second quarter entitled 'The urge to live' of the first chapter on vitalization is completed.

रसायनाध्याये तृतीयः पादः।

રસાયનાધ્યાયમાં ત્રીજો પાદ रसायनाध्यायमें तीसरा पाद

The third quarter of the chapter on Vitalization

करप्रचितीयरसायनपादोपक्रमः —

अथातः करप्रचितीयं रसायनपादं व्याख्यास्यामः ॥१॥

इति ह स्माह भगवानात्रेयः ॥२॥

अथ अतः હવે અહીંથી अब आगे, **करप्रचितीयम्** 'કરપ્રચિતીય' નામના करप्रचितीय' नामके, **रसायनपादम्** ત્રીજા રસાયનપાદનું तीसरे रसायनपादका, **व्याख्यास्यामः** વ્યાખ્યાન કરશું व्याख्यान करेंगे ॥ १ ॥

भगवान् ભગવાન भगवान, **आत्रेयः** આત્રેયે आत्रेयने, **इति ह** આ વિષયમાં નીચે પ્રમાણે જ इस विषयमें निम्न प्रकारसे ही, **आह स्म** કહેલું છે कहा है ॥ २ ॥

1. We shall now expound the third quarter entitled 'Culled with the hand' of the chapter on vitalization.

2. Thus declared the worshipful Atreya.

आमलकरसायनम् —

करप्रचितानां यथोक्तगुणानामामलकानामुद्धृतास्थ्नां शुष्कचूर्णितानां पुनर्माघे फाल्गुने वा मासे त्रिःसप्तकृत्वः स्वरसपरिपीतानां पुनः शुष्कचूर्णीकृतानामाढकमेकं ग्राहयेत्, अथ जीवनीयानां बृंहणीयानां स्तन्यजननानां शुक्रजननानां वयःस्थापनानां षड्विरेचनशताश्रितीयोक्तानामौषधगणानां चन्दनागुरुधवतिनिशखदिरशिंशपासनसाराणां चाणुशः कृत्तानामभयाबिभीतकपिप्पलीवचाचव्यचित्रकविडङ्गानां च समस्तानामाढकमेकं दशगुणेनाम्भसा साधयेत्, तस्मिन्नाढकावशेषे रसे सुपूते तान्यामलकचूर्णानि दत्त्वा गोमयाग्निभिर्वंशविदलशरतेजनाग्निभिर्वा साधयेद्यावदपनयाद्रसस्य, तमनुपदग्धमुपहृत्यायसीषु पात्रीष्वास्तीर्य शोषयेत्, सुशुष्कं तत् कृष्णाजिनस्योपरि दृषदि श्लक्ष्णपिष्टमयःस्थाल्यां निधापयेत् सम्यक्, तच्चूर्णमयश्चूर्णाष्टभागसंप्रयुक्तं मधुसर्पिर्भ्यामग्निबलमभिसमीक्ष्य प्रयोजयेदिति ॥ ३ ॥

करप्रचितानाम् હાથે ચૂંટેલા हाथसे तोडे हुए, **यथोक्तगुणानाम्** પૂર્વોક્ત ગુણવાળાં पूर्वोक्त गुणवाले, **उद्धृतास्थ्नाम्** ઠળિયા કાઢીને बीज निकाले हुए, **शुष्कचूर्णितानाम्** સૂકવ્યા પછી ચૂર્ણ કરેલાં सूखाके

३. स्वरसपरिपीतानां—स्वरसपरिभावितानाम् (ध.)

,, शुक्रजननानां—शुक्रवर्धनानां (ध. च. द.)

,, °शताश्रितीयोक्तानाम्—°शतीयोक्तानाम् (ध. फ.)

,, चाणुशः कृत्तानाम्—चाणुशः क्षिप्तानाम् (ध.)

,, -खण्डशः कृत्तानाम् (ध. फ.)

,, अनुपदग्धमुपहृत्य—अनुपदग्धं रसं महत्यायसीषु (ध.)

,, श्लक्ष्णपिष्टम्—पिष्टम् (ध.)

चूर्ण किये हुए, **त्रिःसप्तकृत्वः** એકવીસ વખત इक्कीस-वार, **स्वरसपरिपीतानाम्** આમળાંના સ્વરસ પાઈ પાઈને आंवलोंके स्वरससे भावित करके, **पुनः** ફરીથી फिरसे, **शुष्कचूर्णीकृतानाम्** સૂકવી ચૂર્ણ કરેલાં सुखाके चूर्ण किये हुए, **आमलकानाम्** આમળાંના आंवलोंका, **एकम् आढकम्** ૨૫૬ તોલા एक आढक (२५६ तोले), **ग्राहयेत्** લેવાં लेवे, **अथ** ત્યાર પછી इसके पीछे, **जीवनीयानाम्** જીવનીય जीवनीय, **बृंहणीयानाम्** બૃંહણીય बृंहणीय, **स्तन्यजननानाम्** સ્તન્યજનન स्तन्यजनन, **शुक्रजननानाम्** શુક્રજનન शुक्रवर्धन, **वयःस्थापनानाम्** અને વયઃસ્થાપન એવી જે और वयःस्थापन ऐसी जो, **षड्विरेचनशताश्रितीय** ‘ષડ્વિરેચનશતાશ્રિતીય નામના અધ્યાયમાં ‘षड्विरेचनशताश्रितीय’ नामके अध्यायमें, **उक्तानाम्** કહેલા कहे गये, **औषधगणानाम्** ઔષધિગણોમાંની ઓષધિઓ એઓના ओषधिगणोंकी ओषधियों उनके, **चन्दन-** તથા શ્વેત ચન્દન चन्दन, **अगुरु-** અગરુ अगरु, **धव-** ધવ धव, **तिनिश-** તિનિશ तिनिश, **खदिर-** ખદિર खदिर, **शिंशपा-** શિંશપા शिंशपा, **असन-** અને અસનના और असनके, **साराणाम्** સારોના सारोंके, **अणुशः कृत्तानाम्** નાના નાના ટુકડા छोटे छोटे टुकड़ों, **अभया-** તથા હરડે तथा हरड़, **बिभीतक-** બહેડાં बहेड़ा, **पिप्पली-** પીપર पिप्पली, **वचा-** વજ वच, **चव्य-** ચવક चवक, **चित्रक-** ચિત્રક चित्रक, **विडङ्गानाम् च** અને વાવડિંગ और वायविड़ंग, **समस्तानाम्** આ સર્વેને મેળવી इन सबको मिला कर, **एकम् आढकम्** ૨૫૬ તોલા પ્રમાણમાં લઈ एक आढक (२५६ तोले) प्रमाणमें ले कर, **दशगुणेन अम्भसा** દશગણા પાણીમાં दसगुने जलमें, **साधयेत्** ઉકાળવાં पकावे, **तस्मिन्** તે જળના उस जलके, **आढकावशेषे** ૨૫૬ તોલા બાકી રહે ત્યારે एक आढक शेष रहने पर, **सुपूते रसे** તે રસને સારી રીતે ગાળી લીધા પછી તેમાં अच्छी तरहसे छान कर उसमें, **तानि** પહેલાં તૈયાર કરેલું पूर्व ही तय्यार किया हुआ, **आमलक-** આમળાંનું आंवलोंका, **चूर्णानि** ચૂર્ણ चूर्ण, **दत्त्वा** મેળવીને मिला कर, **रसस्य** રસ रस, **अपनयात्** સૂકાઈ ન જાય सूख न जाय, **यावत्** ત્યાં સુધી तब तक, **गोमयाग्निभिः वा** તેને અડાયાંના અગ્નિથી उसको उपलोंकी आगसे, **वंशविदल-** અથવા વાંસની ખપાટ बांसकी पट्टियों, **शर-** બરુ सर, **तेजनाग्निभिः वा** અને તેજન નામના તૃણના અગ્નિથી और तेजनकी आगसे, **साधयेत्** પકાવવો पकावे, **अनुपदग्धम् तम्** દાઝવા નહિ દેતાં તેને बिना जले उसको, **उपहृत्य** નીચે ઊતારી नीचे उतार कर, **आयसीषु** લોખંડના लोहेकी, **पात्रीषु** થાળોમાં थालोंमें, **आस्तीर्य** પાથરીને फैलाकर, **शोषयेत्** સૂકવવો सुखावे, **सुशुष्कं तत्** સારી રીતે સૂકાઈ ગયેલા તે રસને अच्छी तरह सूखे हुए उस रसको, **कृष्णाजिनस्य** કાળા મૃગચર્મ काले मृगचर्मके, **उपरि** ઉપર રાખેલી ऊपर रखी हुई, **दृषदि** શિલા ઉપર शिला पर, **श्लक्ष्णपिष्टम्** બારીક પીસીને बारीक पीस कर, **अयःस्थाल्याम्** લોઢાની તપેલીમાં लोहेके पात्रमें, **सम्यक्** સારી રીતે भली भांति, **निधापयेत्** રાખવો रक्खे, **तत् चूर्णम्** તે ચૂર્ણને उस चूर्णमें, **अयश्चूर्णाष्टभागसंयुक्तम्** આઠમે ભાગે લોહચૂર્ણ મેળવીને आठवाँ भाग लोहचूर्ण मिलाकर, **मधुसर्पिर्भ्याम्** મધ અને ગાયના ઘી સાથે मधु और घीके साथ, **अग्निबलम्** જઠરાગ્નિના બલનો अग्निबलको, **अभिसमीक्ष्य** વિચાર કરીને विचार करके, **प्रयोजयेत्** પ્રયોગ કરવો प्रयोग करे ॥ ३ ॥

3. Of emblic myrobalans, agreeing with the description given earlier, and culled with the hand during the Phalguna or the Magha month, de-seeded and dry-pounded. take 256 tolas of powder and macerate it in the expressed juice of fresh emblic myrobalans, repeating the process of maceration twenty-one times. Keep this apart. Now put together the several herbs coming under the five heads of decoctives, namely, life-promoters, roborants, galactagogues, the seminiferous and youth-preservatives described in the chapter entitled ‘The six hundred purgatives’ (chapter IV of Sutra Sthana) and the pith of sandal-wood,

crane tree, cojein, acacia, catechu, blackwood, sissoo tree, asana, as also chebulic myrobalans, beleric myrobalans, long pepper, sweet flag, piper chaba, white-flowered leadwort and embelia. Cut all these up into bits and in taking 256 tolas of them, cook 2560 tolas of water, till the decoction boils down to one tenth the quantity of water i. e. 256 tolas. Straining the decoction, put in it the powder of the emblic myrobalans spoken of at the outset and cook over a fire of dry cow-dung cakes or of bamboo splinters, or the reeds of pen-reed grass, or of tejana weeds till all the water has evaporated, taking care to see that the stuff does not get burnt. Then spreading it on iron pans, dry it. After it is thoroughly dried, grind it into a soft powder in a stone-mortar blaced above the skin of a black deer. Then store it carefully in an iron vessel. This powder mixed with one eighth its quantity of iron-powder, should be given with honey and ghee according to the capacity of digestion.

भवन्ति चात्र—

एतद्रसायनं पूर्वं वसिष्ठः कश्यपोऽङ्गिराः ।
जमदग्निर्भरद्वाजो भृगुरन्ये च तद्विधाः ॥ ४ ॥
प्रयुज्य प्रयता मुक्ताः श्रमव्याधिजराभयात् ।
यावदैच्छंस्तपस्तेपुस्तत्प्रभावान्महाबलाः ॥ ५ ॥

अत्र च આ વિષયમાં इस विषयमें, भवन्ति શ્લોકો છે કે श्लोक हैं कि, पूर्वम् પૂર્વકાલમાં पहिले, वसिष्ठः વસિષ્ઠ वसिष्ठ, कश्यपः કશ્યપ कश्यप, अङ्गिराः અંગિરા अंगिरा, जमदग्निः જમદગ્નિ जमदग्नि, भरद्वाजः ભરદ્વાજ भरद्वाज, भृगुः ભૃગુ भृगु, अन्ये च અને બીજા और अन्य, तद्विधाः તેના જેવા મહર્ષિઓ उनके जैसे महर्षियों, एतत् આ इस, रसायनम् રસાયનનો रसायनका, प्रयुज्य પ્રયોગ કરીને प्रयोग करके, तत्प्रभावात् તેના પ્રભાવથી उसके प्रभावसे, प्रयताः આત્મસંયમવાળા आत्मसंयमवाले, श्रम- તથા શ્રમ तथा श्रम, व्याधि- રોગ व्याधि, जरा- તેમજ વૃદ્ધાવસ્થાના एवं वृद्धावस्थाके भयात् ભયથી भयसे, मुक्ताः મુક્ત मुक्त, महाबलाः અને મહા બળવાળા થઈને और महा बलवान होकर, यावत् જ્યાં સુધી जबतक, ऐच्छन् ઇચ્છા હતી ત્યાં સુધી इच्छा थी तब तक, तेपुः તપ કરતા રહ્યા હતા तप करते रहे थे ॥ ४-५ ॥

Here are verses again—

4-5. Making regular use of this Rasayana long ago, Vasishtha, Kasyapa, Angiras, Jamadagni, Bharadwaja, Bhrigu and other sages like them, being self-controlled, by its virtue freed themselves from the fear of weariness, disease and old age and endowed with great powers, carried on their austerities as long as they desired.

इदं रसायनं चक्रे ब्रह्मा वार्षसहस्रिकम् ।
जराव्याधिप्रशमनं बुद्धीन्द्रियबलप्रदम् ॥ ६ ॥

(इत्यामलकायसं ब्राह्मरसायनम् ।)

वार्षसहस्रिकम् હજાર વર્ષનું આયુષ્ય આપનાર सहस्र वर्षकी आयु देनेवाले, जराव्याधि- તથા જરા અને વ્યાધિઓને तथा जरा और व्याधियोंको, प्रशमनम् શમાવનાર प्रशमन करनेवाले, बुद्धि-इन्द्रिय- અને બુદ્ધિ તથા ઇન્દ્રિયોને और बुद्धि तथा इन्द्रियोंको, प्रशमनम् શમાવનાર प्रशमन करनेवाले, बुद्धि-इन्द्रिय- અને બુદ્ધિ તથા ઇન્દ્રિયોને और बुद्धि तथा इन्द्रियोंको, बलप्रदम् બળને આપનાર बल देनेवाले, इदम् આ इस, रसायनम् રસાયન रसायनको, ब्रह्मा चक्रे બ્રહ્માએ કર્યું હતું

४. भवन्ति चात्र—तत्र श्लोकाः (ष)

ब्रह्माने कहा था ॥ ६ ॥ (इति આ यह, आमलकायसम् ब्राह्मरसायनम् આમલકાયસ બ્રાહ્મ રસાયન છે आमलकायस ब्राह्म रसायन है।)

6. This vitalizing elixir, capable of keeping a man alive for a thousand years, a destroyer of old age and disease, and promoter of the powers of understanding and the senses, was first invented by Brahma, the creator himself. Thus has been described 'The Brahma vitalizer containing emblic Myrobalans and Iron.

तपसा ब्रह्मचर्येण ध्यानेन प्रशमेन च ।
रसायनविधानेन कालयुक्तेन चायुषा ॥ ७ ॥
स्थिता महर्षयः पूर्वं, नहि किञ्चिद्रसायनम् ।
ग्राम्याणामन्यकार्याणां सिध्यत्यप्रयतात्मनाम् ॥८॥

पूर्वम् પહેલાં पुराकालमें, महर्षयः મહર્ષિઓ महर्षियोंने, रसायनविधानेन રસાયનોના વિધાનથી रसायनके प्रयोगसे, तपसा તપ तप, ब्रह्मचर्येण બ્રહ્મચર્ય ब्रह्मचर्य, ध्यानेन ધ્યાન ध्यान, प्रशमेन च પ્રશમ प्रशम, कालयुक्तेन તથા દીર્ઘ કાળના तथा दीर्घकालकी, आयुषा च આયુષ્યથી યુક્ત आयुसे युक्त, स्थिताः રહ્યા હતા रहे थे, ग्राम्याणाम् શહેરોમાં રહેનારા शहरोंमें रहनेवाले, अन्य-कार्याणाम् બીજા વ્યાવહારિક કર્મ કરનારા अन्य व्यावहारिक कर्म करनेवाले, अप्रयतात्मनाम् તથા અસંયમી મનુષ્યોને, एवं असंयमी मनुष्योंको, किञ्चित् કોઈ પણ कोई भी, रसायनम् રસાયન रसायन, न सिध्यति સિદ્ધ થતું જ નથી सफल नहीं होता ॥ ७-८ ॥

7-8. The great sages in early times, living lives consecrated to austerity, celibacy, meditation and peace were able to secure longevity by means of the vitalization procedure, their lives being of indeterminate life-span. To be sure, there is no vitalizing drug or procedure that is efficacious in the case of persons who are worldlings, pre-occupied in other than spiritual or moral endeavour and are not self-controlled.

केवलामलकरसायनम्—

संवत्सरं पयोवृत्तिर्गवां मध्ये वसेत् सदा ।
सावित्रीं मनसा ध्यायन् ब्रह्मचारी यतेन्द्रियः ॥९॥
संवत्सरान्ते पौषीं वा माघीं वा फाल्गुनीं तिथिम् ।
त्र्यहोपवासी शुक्लस्य प्रविश्यामलकीवनम् ॥१०॥
बृहत्फलाढ्यमारुह्य द्रुमं शाखागतं फलम् ।
गृहीत्वा पाणिना तिष्ठेज्जपन् ब्रह्मामृतागमात् ॥११॥
तदा ह्यवश्यममृतं वसत्यामलके क्षणम् ।
शर्करामधुकल्पानि स्नेहवन्ति मृदूनि च ॥ १२॥
भवन्त्यमृतसंयोगात्तानि यावन्ति भक्षयेत् ।
जीवेद्वर्षसहस्राणि तावन्त्यागतयौवनः ॥ १३ ॥
सौहित्यमेषां गत्वा तु भवत्यमरसन्निभः ।
स्वयं चास्योपतिष्ठन्ते श्रीर्वेदा वाक् च रूपिणी ॥१४॥

(इति केवलामलकरसायनम्।)

संवत्सरम् પુરુષે એક વર્ષ પર્યન્ત पुरुष एक वर्ष तक, पयोवृत्तिः દૂધનોજ આહાર કરીને केवल दूध पर निर्वाह करता हुआ, मनसा મનથી मनसे, सावित्रीम् ગાયત્રી મંત્રનું गायत्री मन्त्रका, ध्यायन् ધ્યાન કરતો ध्यान करता हुआ, ब्रह्मचारी બ્રહ્મચર્ય વ્રતનું પાલન કરતો ब्रह्मचर्यव्रतका पालन करता हुआ, यतेन्द्रियः તથા ઇન્દ્રિયોનો નિગ્રહ કરતો तथा इन्द्रियोंका संयम करता हुआ, गवाम् ગાયોના गायोंके, मध्ये મધ્યમાં बीचमें,

७. कालयुक्तेन चायुषा–कालयुक्तेन चायुषः (ध. प.)

८. एतच्छ्लोकानन्तरम्–वर्षसहस्रिकमिदं ब्रह्मा चक्रे रसायनम् ।
जराव्याधिप्रशमनं स्मृतिमेधाकरं परम् ॥
(आमलकायसं ब्राह्मरसायनम्) इति पाठः (ध.) पुस्तके

१०. फाल्गुनीं तिथिम्–फाल्गुनीमपि (ध.)
,, शुक्लस्य–शुक्लस्य (ग. अ. ध. क.)
११. ब्रह्मामृतागमात्–ब्रह्मामृतं क्षणम् (ध.)

सदा હમેશાં हमेशां, **वसेन्** રહેવું रहे, **संवत्सरान्ते** વર્ષ પૂરું થયે वर्षके अन्तमें, **पौषीम्** **वा** પોષ માસની पौष मासकी, **माघीम्** માહ માસની माघ मासकी, **फाल्गुनीम्** **वा** કે ફાગણ માસની अथवा फाल्गुनके, **शुक्लस्य** શુક્લ પક્ષની शुक्ल पक्षकी, **तिथिम्** પૂનમે पूर्णिमाके दिन, **त्र्यहोपवासी** ત્રણ દિવસ ઉપવાસ કરીને तीन दिन उपवास करके, **आमलकीवनम्** આમળાંના વનમાં आमलोंके वनमें, **प्रविश्य** પ્રવેશ કરી प्रवेश करके, **बृहत्फलाढ्यम्** મોટાં ફળવાળાં बड़े फलोंसे भरे हुए, **द्रुमम्** આમળાંના વૃક્ષ ઉપર आंवलेके वृक्ष पर, **आरुह्य** ચઢીને चढ़ कर, **शाखागतम्** ડાળમાં રહેલાં शाखामें लगे हुए, **फलम्** આમળાંને आंवलोंको, **पाणिना** હાથ વડે हाथसे **गृहीत्वा** પકડીને पकड़ कर, **अमृत-** અમૃત अमृतके, **आगमात्** આવે ત્યાં સુધી आने तक, **ब्रह्म** ૐ કારનો प्रणव मंत्रका, **जपन्** જપ કરતો जप करता हुआ, **तिष्ठेत्** રહે रहे, **तदा** **हि** ત્યારે उस समय, **आमलके** આમળામાં आंवलोंमें, **अमृतम्** અમૃત अमृत, **क्षणम्** ક્ષણવાર क्षणभरके लिए, **अवश्यम्** અવશ્ય अवश्य, **वसति** વસે છે आ जाता है, **अमृत-संयोगात्** અમૃતના સંયોગથી આમળાં अमृतके संयोगसे आंवले, **शर्करामधुकल्पानि** સાકર અને મધના જેવાં મીઠાં खांड तथा शहदके समान मधुर, **स्नेहवन्ति** સ્નિગ્ધ स्निग्ध, **मृदूनि** **च** અને મૃદુ और मृदु, **भवन्ति** થઈ જાય છે हो जाते हैं, **तानि** તે આમળાંઓને उन आंवलोंको, **यावन्ति** જેટલી સંખ્યામાં जितनी संख्यामें, **भक्षयेत्** તે ખાય છે वह खाता है, **तावन्ति** તેટલાં उतने ही, **वर्षसहस्राणि** હજાર વર્ષો સુધી सहस्र वर्ष पर्यन्त, **आगतयौवनः** તે જુવાન થઈ वह युवा हो कर, **जीवेत्** જીવે છે जीता है, **एषाम्** **तु** આ આમળાંને इन आंवलोंको, **सौहित्यम्** **गत्वा** **तु** તૃપ્તિપૂર્વક ખાઈને તો तृप्तिपूर्वक खा कर तो, **अमरसन्निभः** તે દેવ સમાન वह देव समान, **भवति** બને છે होता है, **अस्य** **च** અને એની પાસે और उसके पास, **श्रीः** લક્ષ્મી लक्ष्मी, **वेदाः** વેદ वेद, **रूपिणी** **च** અને મૂર્તિમાન और मूर्तिमती; **वाक्** સરસ્વતી सरस्वती, **स्वयम्** **उपतिष्ठन्ते** પોતે હાજર રહે છે स्वयं उपस्थित रहती है ॥ १४ ॥ (**इति** આ यह, **केवलामलकरसायनम्** કેવલામલકરસાયન છે केवलामलकरसायन है।)

9-14. Let a man live continually for a year in the midst of kine, subsisting only on milk-diet and meditating in his mind on 'Savitri', observing celibacy and keeping his senses under control. Thereafter, at the end of the year let him on a full-moon day of either Pausha, Magha or Phalguna month, having fasted for the three preceding days, enter a grove of emblic myrobalans. Getting up on a big tree with a plentiful crop of fruits on its stem, let him, holding in his hand a bunch of fruits, keep meditating on Brahman till ambrosia descends into the fruits. For, of a certainty, ambrosia dwells in the fruits of emblic myrobalans at such a moment and they become, by the presence of ambrosia, sweet to the taste like sugar or honey, unctuous and soft. As many fruits as he eats, so many millenniums does he live, with youth restored. Eating to his fill of such fruits, he becomes like unto the gods in splendour, and of their own accord good fortune, knowledge and the goddess of speech will wait upon him in person. Thus has been described 'The Pure Emblic Myrobalan Vitalizer'.

लोहरसायनम्—

त्रिफलाया रसे मूत्रे गवां क्षारे च लावणे।
क्रमेण चेङ्गुदीक्षारे किंशुकक्षार एव च ॥ १५ ॥
तीक्ष्णायसस्य पत्राणि वह्निवर्णानि साधयेत्।

---

१५. लावणे—नागरे (प.)
१६. सांधयेत्–वापयेत् (ध. ध.)

चतुरङ्गुलदीर्घाणि तिलोत्सेधतनूनि च ॥ १६ ॥
ज्ञात्वा तान्यञ्जनाभानि सूक्ष्मचूर्णानि कारयेत् ।
तानि चूर्णानि मधुना रसेनामलकस्य च ॥ १७ ॥
युक्तानि लेहवत् कुम्भे स्थितानि घृतभाविते ।
संवत्सरं निधेयानि यवपल्ले तथैव च ॥ १८ ॥
दद्यादालोडनं मासे सर्वत्रालोडयन् बुधः ।
संवत्सरात्यये तस्य प्रयोगो मधुसर्पिषा ॥ १९ ॥
प्रातः प्रातर्बलापेक्षी सात्म्यं जीर्णे च भोजनम् ।
एष एव च लौहानां प्रयोगः संप्रकीर्तितः ॥ २० ॥

चतुरङ्गुल-दीर्घाणि ચાર આંગળાં લાંબાં चार अंगुल लंबे, तिलोत्सेध-तनूनि च અને તલના જેટલી ઊંચાઈ-વાળાં तिलके प्रमाणमें मोटे तीक्ष्णायसस्य તીક્ષ્ણ લોહ (ગજવેલ)નાં तीक्ष्ण लोहके, पत्राणि પતરાંને पत्रोंको, वह्नि-वर्णानि અગ્નિસમાન લાલ રંગ થાય ત્યાં સુધી તપાવીને अग्निके समान लाल वर्ण हो तब तक तपा कर, त्रिफलायाः ત્રિફલાના त्रिफलाके, रसे ક્વાથમાં क्काथसें, गवाम् मूत्रे ગાયના મૂત્રમાં गायके मूत्रमें, लावणे क्षारे च માલકાંકણીના ક્ષારોદકમાં मालकंगनीके क्षारोदकमें, इङ्गुदी-क्षारे च ઇંગોરિયાંના ક્ષારોદકમાં हिंगोटके क्षारोदकमें, किंशुक-क्षारे एव च તથા પલાશના ક્ષારોદકમાં तथा पलाशके क्षारोदकमें, साधयेत् બુઝવતા જવું बुझावे, तानि તેઓને उनको, अञ्जन-आभानि કાજળ જેવાં કાળાં कज्जलके समान कृष्ण वर्णके, ज्ञात्वा જાણી जान कर, सूक्ष्म-चूर्णानि તેઓનું સૂક્ષ્મ ચૂર્ણ उनका सूक्ष्म चूर्ण, कारयेत् કરવું करे, तानि તે उन, चूर्णानि ચૂર્ણને चूर्णको, मधुना મધ સાથે मधुके साथ, आमलकस्य અને આમળાંના और आंवलोंके, रसेन રસ સાથે रससे, युक्तानि મેળવીને मिला कर, घृतभाविते અંદર ઘી ચોપડેલા अन्दर घृतसे लिप्त, कुम्भे ઘડામાં घड़ेमें, लेहवत् અવલેહ માફક लेहवत्, स्थितानि રાખીને रख कर, तथा एव यवपल्ले च જવના ઢગલામાં यवराशिमें, संवत्सरम् એક વર્ષ પર્યન્ત एक साल पर्यंत, निधेयानि રાખવું रखे, बुधः ડાહ્યા વૈદ્યે बुद्धिमान वैद्य, सर्वत्र બધું सबको, आलोडयन् હલાવીને हिला कर, मासे મહિને મહિને प्रतिमास, आलोडनम् આલોડન आलोडन, दद्यात् કરવું જોઈએ करना चाहिए, संवत्सरात्यये એક વર્ષ પૂરું થયા પછી एक वर्षके बाद, तस्य તેનો इसका, मधुसर्पिषा મધ અને ગાયના ઘી સાથે मधु और घृतके साथ, प्रयोगः પ્રયોગ प्रयोग, प्रातः प्रातः હમેશાં સવારે प्रतिदिन प्रातः काले, बलापेक्षी જઠરાગ્નિના બલની અપેક્ષાએ કરવો जठराग्निके बलकी अपेक्षासे करे, जीर्णे च ઔષધ પચી જાય ત્યારે औषध जीर्ण होने पर, सात्म्यम् भोजनम् સાત્મ્ય ભોજન કરવું सात्म्य भोजन करना चाहिए, एषः एव च આ यही, लौहानाम् ધાતુઓના धातुओंका, प्रयोगः પ્રયોગ प्रयोग, संप्रकीर्तितः કહ્યો છે कह दिया है ॥ १५-२० ॥

रक्तधात्वाश्रयः રક્ત-ધાતુનો આશ્રય કરીને રહેલો रक्त-धातुमें आश्रित हुआ, सप्रत्यनीकः વિરોધીયુક્ત विरोधियुक्त, दोषः દોષ दोष, प्रायः ઘણું કરીને प्रायः, सततकम् સતત सतत, ज्वरम् જ્વરને ज्वरको, कालवृद्धि- સમયે વધતો अपने कालमें वृद्धि, क्षयात्मकम् અને ઘટતો और क्षयको प्राप्त होनेवाला, कुरुते ઉત્પન્ન કરે છે करता है, सततकः સતત જ્વર सतत ज्वर, अहोरात्रे અહોરાત્ર (૨૪ કલાક)માં अहोरात्रमें, द्वौ कालौ બે વખત दो बार, अनुवर्तते આવે છે आता है ॥ ६१-६२ ॥

61-62. The morbid toxic factors residing mainly in the blood, having opposition from the anti-bodies, cause remittent fever which periodically rising and remitting has two phases of rise of fever in one day.

अन्येद्युष्कज्वरलक्षणम्—

कालप्रकृतिदूष्याणां प्राप्यैवान्यतमाद्बलम् ।
अन्येद्युष्कं ज्वरं दोषो रुद्ध्वा मेदोवहाः सिराः ॥६३॥
सप्रत्यनीको जनयत्येककालमहर्निशि ।

काल- કાલ काल, प्रकृति- પ્રકૃતિ प्रकृति, दूष्याणाम् તથા દૂષ્ય तथा दूष्योंमेंसे, अन्यतमात् એમાંના કોઈ એકથી किसी एक द्वारा, बलम् બળ बल, प्राप्य મેળવીને पा कर, सप्रत्यनीकः વિરોધિયુક્ત विरोधियुक्त, दोषः દોષ दोष, मेदोवहाः મેદને વહન કરનારી मेदोवहा, सिराः સિરાઓને सिराओंको, रुद्ध्वा રોકીને रुद्ध करके, अहर्निशि અહોરાત્રમાં दिनरातमें, एककालम् એક વખત આવતા एकबार आनेवाले, अन्येद्युष्कम् અન્યેદ્યુષ્ક જ્વરને अन्येद्युष्क ज्वरको, जनयति ઉત્પન્ન કરે છે उत्पन्न करता है ॥ ६३½ ॥

63-63½. The toxic factors occluding the fat-carrying channels, being strengthened by any one of the factors viz., season habitus of the patient and susceptibility of body-elements, cause fever which rises only once in the whole day.

६२. सप्रत्यनीकः—सप्रत्यनीकम् (प.)
,, क्षयात्मकम्—क्षयात्मकः (च. त. ध.)

६३. अन्येद्युष्कं ज्वरं दोषो रुद्ध्वा मेदोवहाः सिराः—दोषो मेदोवहा रुद्ध्वा नाडीरन्येद्युष्कं ज्वरम् (क. ख. ध.)
६३½. सप्रत्यनीको जनयति—सप्रत्यनीकः कुरुते (ङ. ध.)
,, जनयत्येककालमहर्निशि—कुरुते एककालमहर्निशि (त.)

तृतीयकचतुर्थकज्वरयोः लक्षणम्—

दोषोऽस्थिमज्जगः कुर्यात्तृतीयकचतुर्थकौ ॥ ६४॥

अस्थिमज्जगः અસ્થિ અને મજ્જામાં રહેલો अस्थि और मज्जागत, **दोषः** દોષ दोष, **तृतीयक-** તૃતીયક तृतीयक, **चतुर्थकौ** અને ચતુર્થક જ્વરને और चतुर्थक ज्वरको. **कुर्यात्** ઉત્પન્ન કરે છે उत्पन्न करता है।

64. The tertian and quartan fevers are caused by toxic factors residing in the bone and marrow

गतिर्द्व्येकान्तराऽन्येद्युर्दोषस्योक्ताऽन्यथा परैः ।
अन्येद्युष्कं ज्वरं कुर्यादपि संश्रित्य शोणितम् ॥६५॥
मांसस्रोतांस्यनुगतो जनयेत्तु तृतीयकम् ।
संश्रितो मेदसो मार्गं दोषश्चापि चतुर्थकम् ॥६६॥

द्वि-एक-अन्तर-अन्येद्युः બે દિવસને આંતરે, એક દિવસને આંતરે અને દરરોજ આવતા જ્વરના चतुर्थक, तृतीयक और अन्येद्युष्कके, **दोषस्य** દોષની दोषकी, **गतिः** ગતિ गति, **परैः** બીજા તંત્રકારોએ अन्य आचार्योंने, **अन्यथा** જુદા પ્રકારની अन्य प्रकारसे, **उक्ता** કહી છે कही है, **दोषः** દોષ दोष, **शोणितम् अपि** રક્તધાતુનો પણ रक्तमें भी, **संश्रित्य** આશ્રય કરીને आश्रित हो कर, **अन्येद्युष्कम्** અન્યેદ્યુષ્ક अन्येद्युष्क, **ज्वरम्** જ્વરને ज्वरको, **कुर्यात्** ઉત્પન્ન કરે છે करता है, **मांसस्रोतांसि** માંસસ્રોતોનો मांसस्रोतोंको, **अनुगतः तु** આશ્રય કરીને प्राप्त हुआ, **तृतीयकम्** તૃતીયક જ્વરને तृतीयक ज्वरको, **मेदसः च** અને મેદના और मेदके, **मार्गम्** માર્ગનો मार्गको, **संश्रितः** આશ્રય કરીને प्राप्त हुआ, **चतुर्थकम्** ચતુર્થક જ્વરને चतुर्थक ज्वरको, **अपि** વળી भी, **जनयेत्** ઉત્પન્ન કરે છે उत्पन्न करता है ॥ ६५-६६ ॥

65-66. The physicians of another medical school hold a different view on this matter. They say that the toxic matter lying in the blood may also give rise to quotidian fever, that the toxic matter lying in the flesh and body-channels may also cause tertian fever and that lying in the path of the adipose tissue may also cause quartan fever.

अन्येद्युष्कः प्रतिदिनं दिनं हित्वा तृतीयकः ।
दिनद्वयं यो विश्रम्य प्रत्येति स चतुर्थकः ॥ ६७॥

प्रतिदिनम् હમેશાં प्रतिदिन, **यः** જે जो, **प्रत्येति** આવે છે आता है, **सः** તે वह, **अन्येद्युष्कः** અન્યેદ્યુષ્ક अन्येद्युष्क, **दिनम्** એક દિવસ एक दिवसको, **हित्वा** છોડીને छोड़कर, **यः प्रत्येति** જે આવે છે जो आता है, **सः** તે वह, **तृतीयकः** તૃતીયક तृतीयक, **दिनद्वयम्** અને બે દિવસ दो दिन, **विश्रम्य** રહીને विराम करके, **यः प्रत्येति** જે આવે છે जो आता है, **सः** તે वह, **चतुर्थकः** ચતુર્થક કહેવાય છે चतुर्थक कहा जाता है ॥ ६७ ॥

67. The quotidian fever recurs every day, the tertian fever with an interval of a day and that is quartan fever which recurs with an interval of two days.

अधिशेते यथा भूमिं बीजं काले च रोहति ।
अधिशेते तथा धातुं दोषः काले च कुप्यति ॥६८॥

यथा જેમ जैसे, **बीजम्** બીજ बीज, **भूमिम्** ભૂમિમાં भूमिमें, **अधिशेते** પડ્યું રહે છે पड़ा रहता है, **काले च** અને સમય આવે ત્યારે और अपने कालमें, **रोहति** ઊગે છે अंकुरित होता है, **तथा** તેમ वैसे, **दोषाः**

६५. अन्येद्युष्कं ज्वरं कुर्यादपि संश्रित्य शोणितम्–रक्तमेवाभिसंसृत्य कुर्यादन्येद्युष्कं ज्वरम् (ख. ध. झ. त)

,, अस्मादनन्तरम्–
नातिप्रकुपितो दोषएककालमहर्निशि ।
इत्यधिकः पाठः (द.) पुस्तके ।

६६. अनुगतो–अनुसृतो (ख.)

,, संश्रितो मेदसो मार्गं–संसृतो मेदसो मार्गं (ध.)

,, संश्रितो मेदसो मार्गं दोषश्चापि चतुर्थकम्–ज्वरं दोषः संसृतो हि मेदोमार्गं चतुर्थकम् (ख. ध.)

६७. हित्वा–क्षिप्त्वा (ध. क)

,, विश्रम्य-विश्राम्य (ख.)

दोषो दोष, धातुम् धातुमां धातुमें, अधिशेते पडयो रहे छे पण रहता है, काले च अने समय आवे त्यारे और अपने कालमें, कुप्यति प्रकुपित थाय छे प्रकुपित होता है ॥ ६८ ॥

68. Just as the seed lies dormant in the soil and germinates in season, in the same manner the toxic matter lies quiescent in the body-element and flares up when the time is ripe.

स वृद्धिं बलकालं च प्राप्य दोषस्तृतीयकम् ।
चतुर्थकं च कुरुते प्रत्यनीकबलक्षयात् ॥ ६९ ॥

सः दोषः ते दोष वह दोष, प्रत्यनीक-बल-क्षयात् विरोधीना बळनो क्षय थवाथी विरोधीके बलका क्षय होनेसे, वृद्धिम् वृद्धि वृद्धि, बलकालम् च अने बलकालने और बलके कालको, प्राप्य पामीने प्राप्त कर, तृतीयकम् तृतीयक ज्वर तृतीयक ज्वर, चतुर्थकम् च अने चतुर्थक ज्वरने और चतुर्थक ज्वरको, कुरुते उत्पन्न करे छे करता है ॥ ६९ ॥

69. Thus the morbific factor gathering strength and biding the propitious time, manifests itself as the tertian or the quartan fever as soon as the disease-resisting power in the body is lowered.

कृत्वा वेगं गतबलाः स्वे स्वे स्थाने व्यवस्थिताः ।
पुनर्विवृद्धाः स्वे काले ज्वरयन्ति नरं मलाः ॥ ७० ॥

वेगम् ज्वरना वेगने वेग, कृत्वा उत्पन्न करीने करके, गतबलाः बळरहित थता निर्बल होने पर, स्वे स्वे पोतपोताना अपने अपने, स्थाने स्थानमां स्थानमें, व्यवस्थिताः भराई रहेला जा कर लीन हुए, मलाः दोषो दोष, स्वे काले पोताना समयमां अपने समयमें, पुनः फरीने फिर, विवृद्धाः वृद्धि पामी बढ़ कर, नरम् मनुष्यने मनुष्यमें, ज्वरयन्ति ज्वरयुक्त करे छे ज्वर उत्पन्न करते हैं ॥ ७० ॥

७०. स्वे स्वे स्थाने—श्लेष्मस्थाने (ग. द. प.)

70. In this manner, the disease-generating factors, having worked themselves out, lapse into quiescence and retire to their respective stations in the body; then mustering up their strength, once again, these toxic elements afflict the patient with fever at their own ripe times.

कफपित्तात् त्रिकग्राही पृष्ठाद्वातकफात्मकः ।
वातपित्ताच्छिरोग्राही त्रिविधः स्यात्तृतीयकः ॥७१॥

तृतीयकः तृतीयक ज्वर तृतीयक ज्वर, त्रिविधः त्रण प्रकारनो तीन प्रकारका, स्यात् थाय छे होता है, त्रिकग्राही जो ते त्रिकमां पीडा करी उत्पन्न थाय छे यदि वह त्रिकमें पीड़ा कर उत्पन्न होता है, कफपित्तात् तो ते कफ-पित्तथी उत्पन्न थाय छे तो वह कफ-पित्तसे उत्पन्न होता है, पृष्ठात् जो ते पीठमां पीडा करी उत्पन्न थाय छे यदि वह पृष्ठमें पीड़ा कर उत्पन्न होता है, वातकफात्मकः तो ते वात-कफथी उत्पन्न थाय छे तो वह वात-कफसे उत्पन्न होता है, शिरोग्राही अने जो शिरमां पीडा करी उत्पन्न थाय छे और यदि सिरमें पीड़ा कर उत्पन्न होता है, वातपित्तात् तो ते वात-पित्तथी उत्पन्न थाय छे तो वह वात-पित्तसे उत्पन्न होता है ॥ ७१ ॥

71. The tertian fever is of three varieties. Thus, if induced by excess of kapha and pitta it afflicts the lumbar region; if of the nature of vata and kapha, it afflicts the back; and if of vata and pitta, it causes the head-ache.

चतुर्थको दर्शयति प्रभावं द्विविधं ज्वरः ।
जङ्घाभ्यां श्लैष्मिकः पूर्वं शिरस्तोऽनिलसंभवः ॥७२॥

चतुर्थकः चतुर्थक चतुर्थक, ज्वरः ज्वर ज्वर, द्विविधम् बे प्रकारना दो प्रकारके, प्रभावम् प्रभावने प्रभावको, दर्शयति दर्शावे छे दिखाता है, श्लैष्मिकः जो ते कफजन्य होय तो यदि वह कफजन्य हो तो, पूर्वम् पहेला

प्रथम, जङ्घाभ्याद् બન્ને પિંડીમાં પીડા કરી ઉત્પન્ન થાય છે दोनों पिण्डलियोंमें पीड़ा कर उत्पन्न होता है, अनिलसंभवः અને જો તે વાતજન્ય હોય તો और यदि वातजन्य हो तो, शिरस्तः પહેલાં શિરમાં પીડા કરી ઉત્પન્ન થાય છે प्रथम सिरमें पीड़ा कर उत्पन्न होता है ॥ ७२ ॥

72. The quartan fever presents two kinds of effects. If characterised by kapha, it causes pain in the shanks first and if induced by vata, it first assails the head.

चतुर्थकविपर्ययलक्षणम्—

विषमज्वर एवान्यश्चतुर्थकविपर्ययः ।
त्रिविधो धातुरेकैको द्विधातुस्थः करोति यम् ॥७३॥

द्विधातुस्थः અસ્થિ તથા મજ્જા એ બે ધાતુમાં રહેલો अस्थि तथा मज्जा इन दो धातुओंमें आश्रित, त्रिविधः ત્રણ પ્રકારનો वात आदि तीन प्रकारका, धातुः ધાતુ અર્થાત્ વાત પિત્ત તથા કફ ધાતુ अर्थात् वात पित्त तथा कफ, एकैकः એક એક एक एक, यम् જેને जिसे, करोति ઉત્પન્ન કરે છે उत्पन्न करता है, अन्यः તે બીજો वह दूसरा, चतुर्थक- विपर्ययः ચતુર્થકવિપર્યય નામનો જ્વર चतुर्थकविपर्यय नामक ज्वर, विषमज्वरः एव વિષમજ્વર જ છે विषमज्वर ही है ॥ ७३ ॥

73. There is another kind of irregular fever which is none other than the quartan fever reversed. It is brought on by any one of the three morbid humors residing in the two body-elements (bone and bone-marrow).

विषमज्वराणां सन्निपातजत्वम्—

प्रायशः सन्निपातेन दृष्टः पञ्चविधो ज्वरः ।
सन्निपाते तु यो भूयान् स दोषः परिकीर्तितः ॥७४॥

पञ्चविधः પાંચ પ્રકારનો पांच प्रकारका, ज्वरः જ્વર ज्वर, प्रायशः પ્રાયશઃ प्रायः, सन्निपातेन સન્નિપાતથી सन्निपातसे, दृष्टः જોવામાં આવે છે देखा जाता है, सन्निपाते तु સન્નિપાતમાં તો परन्तु सन्निपातमें, यः भूयान् જે સહુથી વધારે પ્રમાણમાં હોય છે जो सबसे प्रबल होता है, सः दोषः તેને દોષ वह दोष, परिकीर्तितः કહેવામાં આવે છે कहा जाता है ॥ ७४ ॥

74. All these five types of fevers are generally seen to result from tridiscordance of humors. Each fever is named after the particularly predominant humor.

ऋत्वादिबलाबलात्ज्वरकालस्यान्यथात्वम्—

ऋत्वहोरात्रदोषाणां मनसश्च बलाबलात् ।
कालमर्थवशाच्चैव ज्वरस्तं तं प्रपद्यते ॥७५॥

ऋतु-अहोरात्र-दोषाणाम् ઋતુ, અહોરાત્ર તથા દોષો ऋतु, अहोरात्र तथा दोषों, मनसः च અને મનના और मनके, बलाबलात् બળાબળથી बलाबलसे, अर्थवशात् च एव તેમજ કર્મવશતાથી પણ एवं दैववशात् भी, ज्वरः જ્વર ज्वर, तम् तम् તે તે उस उस, कालम् કાળને कालको, प्रपद्यते પ્રાપ્ત થાય છે प्राप्त होता है ॥ ७५ ॥

75. It is to the strength or weakness of season, day, night and the morbid humors, as well as of the mind, and in pursuance of the effects of past actions, that a given fever owes its periodicity.

रसादिसप्तधातुगतज्वराणां लक्षणानि—

गुरुत्वं दैन्यमुद्वेगः सदनं छर्द्यरोचकौ ।
रसस्थिते बहिस्तापः साङ्गमर्दो विजृम्भणम् ॥७६॥

रसस्थिते જ્યારે જ્વર રસ- ધાતુનો આશ્રય કરે છે ત્યારે जब ज्वर रस- धातुमें आश्रित होता है तब, गुरुत्वम् શરીરનું ભારેપણું गुरुता, दैन्यम् દીનતા दीनता, उद्वेगः ઉદ્વેગ उद्वेग, सदनम् શિથિલતા

७५. ऋतु—स तु (ग.)
७६. दैन्यम्—शीतम् (ग. द. प.)

शिथिलता, छर्दि अरोचकौ ઉલટી, અરોચક છર્દિ, अरुचि, साङ्गमर्दः અંગોનાં ભાંગવાં સહિત अंगों टूटनेके साथ, बहिस्तापः બહારનો સંતાપ बाहरका संताप, विजृम्भणम् અને બગાસાં આ લક્ષણો થાય છે और जृम्भा ये लक्षण होते हैं ॥ ७६ ॥

76. Of the fever that has its habitat in the body nutrient fluid, the following are the symptoms—heaviness, depression of spirits, anxiety, asthenia, vomiting, anorexia, external burning, lassitude and fits of yawning.

रक्तोष्णाः पिडकास्तृष्णा सरक्तं ष्ठीवनं मुहुः ।
दाहरागभ्रममदप्रलापा रक्तसंस्थिते ॥ ७७ ॥

रक्त-संस्थिते જ્યારે જ્વર રક્તધાતુનો આશ્રય કરે છે ત્યારે जब ज्वर रक्तमें आश्रित होता है तब, रक्तोष्णाः લાલ તથા ગરમ लाल तथा उष्ण, पिडकाः ફોડકીઓ फुंसियाँ, तृष्णा તૃષ્ણા प्यास, सरक्तम् લોહીસહિત खूनसहित, मुहुः વારંવાર बारबार, ष्ठीवनम् થૂંકવું थूकका आना, दाह- દાહ जलन, राग- લાલાશ देहका लाल वर्ण होना, भ्रम- ભ્રમ चक्कर, मद- મદ मद, प्रलापाः અને પ્રલાપ થાય છે और प्रलाप होते हैं ॥ ७७ ॥

77. Of the fever with its habitat in the blood the following are the symptoms—red and hot rashes, thirst, the frequent spitting of blood, burning, redness, giddiness, intoxication and raving.

अन्तर्दाहः सतृण्मोहः सग्लानिः सृष्टविट्कता ।
दौर्गन्ध्यं गात्रविक्षेपो ज्वरे मांसस्थिते भवेत् ॥७८॥

ज्वरे मांस-स्थिते જ્યારે જ્વર માંસધાતુનો આશ્રય કરે છે ત્યારે जब ज्वर मांसधातुमें आश्रित होता है तब, सग्लानिः ગ્લાનિસહિત ग्लानिके साथ, सतृण्मोहः તૃષા તથા મોહસહિત प्यास तथा मोहके साथ, अन्तर्दाहः અન્તર્દાહ अन्तर्दाह, सृष्टविट्कता મળનું આવવું मलप्रवृत्ति, दौर्गन्ध्यम् દુર્ગન્ધતા दौर्गन्ध्य, गात्रविक्षेपः અને ગાત્રોને આમ તેમ ફેંકવાં और गात्रविक्षेप, भवेत् થાય છે होते हैं ॥ ७८ ॥

78. Of the fever with its habitat in the flesh, the following are the symptoms—internal burning, thirst, stupefaction, depression, looseness of stools, fetor and convulsion of limbs.

स्वेदस्तीव्रा पिपासा च प्रलापो वम्यभीक्ष्णशः ।
स्वगन्धस्यासहत्वं च मेदःस्थे ग्लान्यरोचकौ ॥७९॥

मेदःस्थे જ્યારે જ્વર મેદધાતુનો આશ્રય કરે છે ત્યારે जब ज्वर मेदधातुमें आश्रित होता है तब, तीव्रा पिपासा પુષ્કળ તરસ तीव्र प्यास, प्रलापः પ્રલાપ प्रलाप, अभीक्ष्णशः વારંવાર बारबार, वमी च ઉલટી वमनका आना, स्वगन्धस्य પોતાના જ ગંધની अपने शरीरकी गन्धको, असहत्वम् અસહનશીલતા न सहना, ग्लानि-अरोचकौ च ગ્લાનિ અને અરુચિ થાય છે ग्लानि और अरुचि होते हैं ॥ ७९ ॥

79. Of the fever with its habitat in the fat, the following are the symptoms—perspiration, violent thirst, raving, frequent vomiting, disgust for one's own body-odour, depression and anorexia.

विरेकवमने चोभे सास्थिभेदं प्रकूजनम् ।
विक्षेपणं च गात्राणां श्वासश्चास्थिगते ज्वरे ॥८०॥

ज्वरे अस्थिगते જ્યારે જ્વર અસ્થિધાતુનો આશ્રય કરે છે ત્યારે जब ज्वर अस्थिधातुमें आश्रित होता है तब, उभे च બેઉ दोनों, विरेकवमने વિરેચન તથા વમન दस्त तथा वमन, सास्थिभेदम् હાડકાંઓમાં પીડાસહિત अस्थिभेदके साथ, प्रकूजनम् પ્રકૂજન

७७. रक्तोष्णाः–रक्तोत्थाः (ब. प.)
७८. अन्तर्दाहः सतृण्मोहः–अन्तर्दाहोऽधिकस्तृष्णा (क. ब. ड.)
,, सग्लानिः सृष्टविट्कता–ग्लानिसंसृष्टविट्कता (प.)
७९. स्वगन्धस्यासहत्वं–सगन्धस्यासहत्वं (प.)

(કંઠથી વ્યથાને સૂચવનાર અવ્યક્ત શબ્દોનું કરવું) प्रकूजन (कण्ठसे व्यथासूचक अव्यक्त शब्द करना), गात्राणाम् च ગાત્રોનું गात्रोंका, विक्षेपणम् ફેંકવું विक्षेप, श्वासः च અને શ્વાસ થાય છે और श्वास होते हैं ॥ ८० ॥

80. Of the fever that has gone down to the bones, the following are the symptoms—combined fits of vomiting and purging, the feeling as if the bones have been broken, groaning, convulsion of the limbs and dyspnea.

हिक्का श्वासस्तथा कासस्तमसश्चातिदर्शनम् ।
मर्मच्छेदो बहिः शैत्यं दाहोऽन्तश्चैव मज्जगे ॥८१॥

मज्जगे જ્યારે જ્વર મજ્જા ધાતુનો આશ્રય કરે છે ત્યારે जब ज्वर मज्जाधातुमें आश्रित होता है तब, हिक्का હેડકી हिक्का, श्वासः શ્વાસ श्वास, तथा कासः ખાંસી कास, तमसः अतिदर्शनम् च આંખો પાસે ઘણા અંધકારનું દેખાવું आंखोंके आगे अंधेरेका अधिक देखना, मर्मच्छेदः મર્મોમાં છેદ જેવી પીડા मर्मोंमें छेदवत् पीड़ा, बहिः शैत्यम् બહાર શીતલતા बाहिर शैत्य, अन्तः અને અંદર और भीतर, दाहः च एव દાહ થાય છે दाह होते हैं ॥ ८१ ॥

81. Of the fever with its habitat in the bone-marrow, the following are the symptoms—hiccup, dyspnea, cough, extreme faintness, feeling as though the vital parts had been cleft asunder, external chilliness and internal burning.

शुक्रस्थानगतः शुक्रमोक्षं कृत्वा विनाश्य च ।
प्राणं वाय्वग्निसोमैश्च सार्धं गच्छत्यसौ विभुः ॥८२॥

असौ આ यह, विभुः રસ આદિ ધાતુમાં વ્યાપનારો જ્વર रस आदि धातुओंमें व्याप्त होनेवाला ज्वर, शुक्रस्थानगतः જ્યારે શુક્રસ્થાનમાં પ્રાપ્ત થાય છે ત્યારે તે जब शुक्रस्थानमें प्राप्त होता है तब वह, शुक्रमोक्षम् વીર્યસ્રાવ शुक्रमोक्ष, कृत्वा કરીને करके, प्राणम् च અને પ્રાણવાયુનો और प्राणोंको, विनाश्य નાશ કરીને विनष्ट कर, वायु-अग्नि-सोमैः च વાયુ, અગ્નિ અને સોમની वायु, अग्नि और सोमके, सार्धम् સાથે साथ, गच्छति જાય છે चला जाता है ॥ ८२ ॥

82 If fever, capable of pervading everywhere, has penetrated to the secretory element in the body, then causing the expulsion of vital secretions and destroying the life-breaths, it departs together with the elements of air, fire and water in the body.

रसरक्ताश्रितः साध्यो मेदोमांसगतश्च यः ।
अस्थिमज्जगतः कृच्छ्रः शुक्रस्थो नैव सिद्ध्यति ॥८३॥

यः જે જ્વર जो ज्वर, रस-रक्त-आश्रितः રસ અને રક્તમાં રહેલો હોય છે रस और रक्तमें आश्रित होता है, मेदः-मांस-गतः च તથા મેદ અને માંસમાં રહેલો હોય છે तथा मेद और मांसगत होता है, (सः) साध्यः તે સાધ્ય છે वह साध्य है, अस्थि-मज्ज-गतः અસ્થિ તથા મજ્જામાં રહેલો જ્વર अस्थि तथा मज्जामें आश्रित ज्वर, कृच्छ्रः કષ્ટસાધ્ય છે कृच्छ्रसाध्य है, शुक्रस्थः અને શુક્રધાતુમાં રહેલો જ્વર તો और शुक्रस्थित ज्वर तो, न सिद्ध्यति एव અસાધ્ય જ છે असाध्य ही है ॥ ८३ ॥

83. The fever, that cleaves to the body-nutrient fluid and the blood, is curable; so also the fever that cleaves to the fat and the flesh elements; while the fever that attacks the bone and the bone-marrow is difficult of cure. As regards the fever that has penetrated to the secretory element, it does not admit of cure.

---

८२. शुक्रस्थानगतः—शुक्रस्थानगते (ध.)
,, प्राणं वाय्वग्नि—प्राणवाय्वग्नि (ध.)

द्वन्द्वजज्वरलक्षणम् —

हेतुभिर्लक्षणैश्चोक्तः पूर्वमष्टविधो ज्वरः ।
समासेनोपदिष्टस्य व्यासतः शृणु लक्षणम् ॥८४॥

पूर्वम् પહેલાં (નિદાન સ્થાનમાં) पहले, हेतुभिः હેતુઓ हेतु, लक्षणैः च અને લક્ષણોથી और लक्षणोंसे, ज्वरः જ્વર ज्वर, अष्टविधः આઠ પ્રકારનો आठ प्रकारका, उक्तः કહ્યો છે कह दिया है, समासेन સંક્ષેપમાં संक्षेपमें, उपदिष्टस्य કહેલા તે જ્વરનાં कहे गये उस ज्वरके, लक्षणम् લક્ષણો लक्षण, व्यासतः વિસ્તારથી विस्तारसे, शृणु સાંભળો सुनो ॥ ८४ ॥

84. Of the eight varieties of fever which were described earlier in the section on Pathology with reference to their causes and symptoms, listen now to a fuller description of what was then referred to in brief viz., the fevers arising from the discordance of two humors.

शिरोरुक् पर्वणां भेदो दाहो रोम्णां प्रहर्षणम् ।
कण्ठास्यशोषो वमथुस्तृष्णा मूर्च्छा भ्रमोऽरुचिः ८५
स्वप्ननाशोऽतिवाग्जृम्भा वातपित्तज्वराकृतिः ।

शिरोरुक् માથામાં પીડા शिरमें दर्द, पर्वणाम् भेदः પર્વભેદ पर्वोंका टूटना, दाहः દાહ दाह, रोम्णाम् રુંવાડાંઓનું रोमोंका, प्रहर्षणम् ઊભું થવું हर्ष, कण्ठ-आस्य-शोषः ગળામાં તથા મોઢામાં શોષ कण्ठ तथा मुखका सूखना, वमथुः ઉલટી वमन, तृष्णा તૃષા प्यास, मूर्च्छा મૂર્છા मूर्च्छा, भ्रमः ભ્રમ चक्कर, अरुचिः અરુચિ अरुचि, स्वप्ननाशः નિદ્રાનો નાશ निद्रानाश, अतिवाक् બહુ બોલવું प्रलाप, जृम्भा અને બગાસાં और जम्भाई, वातपित्त- એ વાત અને પિત્તથી ये वातपित्तात्मक, ज्वराकृतिः જ્વરનાં લક્ષણો છે ज्वरके लक्षण हैं ॥८५½॥

85-85½. Of the fever arising from the discordance of vata and pitta, the symptoms are—head-ache, breaking pain in the joints, burning, horripilation, dryness of the throat and mouth, vomiting, thirst, fainting, giddiness, anorexia, insomnia, excessive talk and yawning.

शीतको गौरवं तन्द्रा स्तैमित्यं पर्वणां च रुक् ॥८६॥
शिरोग्रहः प्रतिश्यायः कासः स्वेदाप्रवर्तनम् ।
सन्तापो मध्यवेगश्च वातश्लेष्मज्वराकृतिः ॥८७॥

शीतकः ટાઢ લાગવી शीत लगना, गौरवम् શરીરનું ભારેપણું गुरुता, तन्द्रा તન્દ્રા तन्द्रा, स्तैमित्यम् ભીના વસ્ત્રથી લપેટાયા જેવો અનુભવ आर्द्र वस्त्रसे आच्छादनका अनुभव, पर्वणाम् પર્વોમાં पर्वोंमें, रुक् च પીડા दर्द, शिरोग्रहः માથાનું ઝલાઈ જવું शिरका जकड़ा जाना, प्रतिश्यायः સળેખમ जुकाम, कासः ખાંસી खांसी, स्वेद-अप्रवर्तनम् પરસેવાનું ન આવવું पसीनेका न आना, संतापः સંતાપ सन्ताप, मध्यवेगः च અને મધ્યમ પ્રકારનો વેગ और मध्य वेग, वात-श्लेष्म- એ વાત અને કફથી वात-कफात्मक, ज्वराकृतिः થયેલા જ્વરનાં લક્ષણ છે ज्वरके लक्षण हैं ॥ ८६-८७ ॥

86-87. Of the fever arising from vata and kapha, the following are the symptoms—chilliness, heaviness, torpor, rigidity, breaking pain in the joints, head-ache, coryza, cough, anhidrosis and moderate temperature.

मुहुर्दाहो मुहुः शीतं स्वेदस्तम्भो मुहुर्मुहुः ।
मोहः कासोऽरुचिस्तृष्णा श्लेष्मपित्तप्रवर्तनम् ॥८८॥
लिप्ततिक्तास्यता तन्द्रा श्लेष्मपित्तज्वराकृतिः ।
इत्येते द्वन्द्वजाः प्रोक्ताः

मुहुः दाहः વારંવાર દાહ बारबार दाह, मुहुः शीतम् વારંવાર શીતનું હોવું और क्षण क्षणमें शीत लगना, मुहुः मुहुः स्वेदस्तम्भः વારંવાર પરસેવો ન આવવો

---

८५. शिरोरुक् पर्वणां भेदो दाहो रोम्णां प्रहर्षणम्–रोमहर्षश्च दाहश्च पर्वभेदः शिरोरुजा (च. भ.)
,, ,, ,, ,, ,, –रोमहर्षश्च दाहश्च पर्वभेदः शिरोरुजा (ग.)
,, अरुचिः–अरतिः (ग.)

८८. स्वेदस्तम्भो–स्वेदः स्तम्भः (ग.)

बारबार पसीनेका रुक जाना, मोहः मूर्च्छा मोह, कासः કાસ कास, अरुचिः અરુચિ अरुचि, तृष्णा તૃષા प्यास, श्लेष्म-पित्त- કફ અને પિત્તનું कफ और पित्तका, प्रवर्तनम् નીકળવું निकलना, लिप्त-तिक्त-आस्यता મુખનું લેપાયેલાપણું અને કડવાપણું मुखका लिप्त और कडुआ होना, तन्द्रा તન્દ્રા तन्द्रा, श्लेष्म-पित्त- એ કફ અને પિત્તથી वे श्लेष्मपित्तात्मक, ज्वराकृतिः થયેલા જ્વરનાં લક્ષણ છે ज्वरके लक्षण हैं, इति આ પ્રમાણે इस प्रकार, एते આ યે, द्वन्द्वजाः દ્વંદ્વજ જ્વર द्वंद्वज ज्वर, प्रोक्ताः કહેવામાં આવ્યા છે कहे गये हैं ॥ ८८½ ॥

88-88½. Of the fever arising from the discordance of kapha and pitta, the following are the symptoms—frequent stoppage of perspiration, stupefaction, cough, anorexia, thirst, discharge of phlegm and bile, furred condition and bitter taste of the mouth and somnolence. Thus the fevers born of the bi-discordance have been described.

त्रयोदशविधसन्निपातज्वराणां लक्षणम्—

सन्निपातज उच्यते ॥८९॥
सन्निपातज्वरस्योर्ध्वं त्रयोदशविधस्य हि ।
प्राक्सूत्रितस्य वक्ष्यामि लक्षणं वै पृथक् पृथक् ॥९०॥

सन्निपातजः હવે ત્રણે દોષો એકઠા થવાથી થનારો જ્વર अब सन्निपातजन्य ज्वर, उच्यते કહેવામાં આવે છે कहा जाता है, त्रयोदश-विधस्य તેર પ્રકારના तेरह प्रकारके, प्राक् सूत्रितस्य પહેલાં સૂત્રરૂપે કહેલા प्रथम सूत्ररूपमें कहे गये, सन्निपातज्वरस्य हि સન્નિપાતજ્વરનાં सन्निपातज्वरके, ऊर्ध्वम् હવે પછી अब आगे, पृथक् पृथक् જુદાં જુદાં पृथक् पृथक्, लक्षणम् લક્ષણો लक्षण, वक्ष्यामि કહીશ कहूंगा ॥ ८९-९० ॥

89-90. The fever born of the tridiscordance will now be described. From now onward we shall describe the individual symptoms of each of the thirteen varieties of fever arising from the triple or total discordance, which varieties were out-lined earlier in the section on General Principles.

भ्रमः पिपासा दाहश्च गौरवं शिरसोऽतिरुक् ।
वातपित्तोल्बणे विद्याल्लिङ्गं मन्दकफे ज्वरे ॥९१॥

वातपित्त-उल्बणे વાત તથા પિત્તની પ્રધાનતાવાળા वातपित्तप्रधान मन्दकफे તથા કફની મંદતાવાળા और मन्दकफ, ज्वरे સન્નિપાતજ્વરમાં सन्निपातज्वरमें, भ्रमः ભ્રમ भ्रम, पिपासा તૃષા प्यास, दाहः દાહ दाह, गौरवम् શરીરનું ભારેપણું गुरुता, शिरसः અને માથાની और सिरमें, अतिरुक् च અત્યંત વેદના अत्यन्त दर्द, लिङ्गम् એ લક્ષણો इन लक्षणोंको, विद्यात् જાણવાં जाने ॥ ९१ ॥

91. In the fever arising from the condition of the tridiscordance wherein the vata and pitta show severe, and kapha moderate aggravation, the symptoms are—giddiness, thirst, burning, heaviness and severe head-ache.

शैत्यं कासोऽरुचिस्तन्द्रापिपासादाहरुग्व्यथाः ।
वातश्लेष्मोल्बणे व्याधौ लिङ्गं पित्तावरे विदुः ॥९२॥

वात- श्लेष्म-उल्बणे વાત અને કફની પ્રધાનતાવાળા वातकफप्रधान, पित्तावरे व्याधौ અને પિત્તની હીનતાવાળા और हीनपित्त, व्याधौ સંનિપાત જ્વરમાં सन्निपातज्वरमें, शैत्यम् ટાઢ शीत, कासः ખાંસી कास, अरुचिः અરુચિ अरुचि, तन्द्रा- તન્દ્રા तन्द्रा, पिपासा- પિપાસા प्यास, दाह- દાહ दाह, रुक्- પીડા रुजा, व्यथाः અને વ્યથા એ और व्यथा इन लिङ्गम् લક્ષણ लक्षणोंको, विदुः વૈદ્યો જાણે છે वैद्यों जानते हैं ॥ ९२ ॥

92. In the fever wherein the discordance of the vata and kapha is severe and that of the pitta less marked, the symptoms observed are—chilliness, cough, anorexia, torpor, thirst, burning, aches and pain.

छर्दिः शैत्यं मुहुर्दाहस्तृष्णा मोहोऽस्थिवेदना ।
मन्दवाते व्यवस्यन्ति लिङ्गं पित्तकफोल्बणे ॥९३॥

पित्त-कफ-उल्बणे પિત્ત અને કફની પ્રધાનતાવાળા पित्तकफप्रधान, मन्दवाते અને વાતની મન્દતાવાળા સન્નિપાતજ્વરમાં और मन्दवात सन्निपातज्वरमें, छर्दिः ઉલટી વમન, शैत्यम् ઠંડી शैत्य, मुहुः दाहः વારંવાર દાહ बारबार दाह, तृष्णा તૃષા प्यास, मोहः મોહ मोह, अस्थिवेदना અને અસ્થિવેદના એ और अस्थिवेदना इन, लिङ्गम् લક્ષણોને लक्षणोंको, व्यवस्यन्ति वैद्यो નિર્ણય કરે છે वैद्य मानते हैं ॥ ९३ ॥

93. In the fever wherein the discordance of the pitta and the kapha is severe and that of vata moderate, the symptoms observed are—vomiting, chilliness, alternating fits of burning, thirst, stupefaction and aches in the bones.

सन्ध्यस्थिशिरसः शूलं प्रलापो गौरवं भ्रमः ।
वातोल्बणे स्याद् द्व्यनुगे तृष्णा कण्ठास्यशुष्कता ॥९४॥

वातोल्बणे વાતની પ્રધાનતાવાળા वातप्रधान, द्व्यनुगे અને કફ તથા પિત્તની ગૌણતાવાળા સન્નિપાતજ્વરમાં और कफपित्त दोनोंकी गौणतावाले सन्निपातज्वरमें, सन्धि-अस्थि-शिरसः સાંધાઓ, હાડકાં અને માથામાં सन्धियों, अस्थि और शिरमें, शूलम् શૂલ शूल, प्रलापः પ્રલાપ प्रलाप, गौरवम् ગુરુતા गुरुता, भ्रमः ભ્રમ भ्रम, तृष्णा તૃષા प्यास, कण्ठ-आस्य-शुष्कता તથા કંઠ અને મુખનો શોષ એ तथा गले और मुंहका सूखजाना ये, स्यात् લક્ષણો છે लक्षण हैं ॥ ९४ ॥

94. In the fever wherein the discordance of the vata is great and that of the other two less marked, the symptoms observed are—piercing pains in the joints, bones and the head, raving, heaviness, giddiness, thirst and dryness of the throat and mouth.

रक्तविण्मूत्रता दाहः स्वेदस्तृड् बलसंक्षयः ।
मूर्च्छा चेति त्रिदोषे स्याल्लिङ्गं पित्ते गरीयसि ॥९५॥

पित्ते गरीयसि પિત્તની પ્રધાનતા અને વાત તથા કફની ગૌણતાવાળા पित्तकी प्रधानता और वात तथा कफकी गौणतावाले, त्रिदोषे સન્નિપાતજ્વરમાં सन्निपातज्वरमें, रक्तविट्-मूत्रता મળ અને મૂત્રનું લાલપણું मल-मूत्रका लाल होना, दाहः દાહ दाह, स्वेदः સ્વેદ पसीना, तृट् તૃષા प्यास, बलसंक्षयः બલનો ક્ષય बलसंक्षय, मूर्च्छा च અને મૂર્ચ્છા और मूर्च्छा, इति એ ये, लिङ्गम् લક્ષણ लक्षण, स्यात् છે हैं ॥ ९५ ॥

95. In the fever of the triple discordance wherein the pitta is comparatively severe, the symptoms observed are—sticky stools and urine, burning, perspiration, thirst, decline of strength and fainting.

आलस्यारुचिहृल्लासदाहवम्यरतिभ्रमैः ।
कफोल्बणं सन्निपातं तन्द्राकासेन चादिशेत् ॥९६॥

कफ- उल्बणम् કફની પ્રધાનતાવાળા અને વાત તથા પિત્તની ગૌણતાવાળા कफप्रधान तथा मन्दवातपित्त, सन्निपातम् સન્નિપાતજ્વરને सन्निपातज्वरको, आलस्य- આલસ્ય आलस्य, अरुचि- અરુચિ अरुचि, हृल्लास- મોળ मितली, दाह- દાહ दाह, वमि- વમન वमन, अरति- બેચેની अरति, भ्रमैः ભ્રમ चक्कर, तन्द्रा- તન્દ્રા तन्द्रा, कासेन च અને કાસથી और खांसीसे, आदिशेत् જાણવો જોઈએ जानना चाहिए ॥ ९६ ॥

96. In the fever of the tridiscordance wherein the kapha is more provoked than the other two, the following should be known as the symptoms—weariness, anorexia, nausea, burning, vomiting, apathy, giddiness, torpor and cough.

९४. कण्ठास्यशुष्कता—कण्ठास्यशोषता (च.)

९६. दाहवम्यरतिभ्रमैः—दाहतृष्णावमिभ्रमैः (ड. त.)

प्रतिश्या छर्दिरालस्यं तन्द्राऽरुच्यग्निमार्दवम् ।
हीनवाते पित्तमध्ये लिङ्गं श्लेष्माधिके मतम् ॥९७॥

हीनवाते વાયુની ન્યૂનતાવાળા हीनवात, पित्तमध्ये પિત્તની મધ્યમતાવાળા मध्यपित्त, श्लेष्माधिके અને કફની અધિકતાવાળા સન્નિપાત જ્વરમાં और श्लेष्माधिक सन्निपात ज्वरमें, प्रतिश्या સળેખમ प्रतिश्याय, छर्दिः ઉલટી वमन, आलस्यम् આલસ્ય आलस्य, तन्द्रा- તન્દ્રા तन्द्रा, अरुचि- અરુચિ अरुचि, अग्निमार्दवम् અને અગ્નિનું મંદપણું और अग्निमान्द्य, लिङ्गम् આ લક્ષણ ये लक्षण, मतम् માન્યાં છે माने गये हैं ॥ ९७ ॥

97. In the fever wherein the discordance of kapha is severe, of pitta moderate and of vata slight, the following are considered to be the symptoms—coryza, vomiting, weariness, torpor, anorexia and dullness of the gastric fire

हारिद्रमूत्रनेत्रत्वं दाहस्तृष्णा भ्रमोऽरुचिः ।
हीनवाते मध्यकफे लिङ्गं पित्ताधिके मतम् ॥९८॥

हीनवाते વાતની ન્યૂનતાવાળા हीनवात, मध्यकफे કફની મધ્યમતાવાળા मध्यकफ, पित्ताधिके અને પિત્તની અધિકતાવાળા સન્નિપાત જ્વરમાં और पित्ताधिक सन्निपात ज्वरमें, हारिद्र-मूत्र-नेत्रत्वम् મૂત્ર અને નેત્રો હળદરના રંગના હોવાં मूत्र और नेत्रका पीला होना, दाहः દાહ दाह, तृष्णा તૃષા प्यास, भ्रमः ભ્રમ भ्रम, अरुचिः અને અરુચિ और अरुचि, लिङ्गम् એ લક્ષણ ये लक्षण, मतम् માન્યાં છે माने गये हैं ॥ ९८ ॥

98. In the fever wherein the discordance of pitta is great, of kapha moderate and of vata slight, the symptoms are considered to be yellowish urine and eyes, burning, thirst, giddiness and anorexia.

शिरोरुग्वेपथुः श्वासः प्रलापश्छर्द्यरोचकौ ।
हीनपित्ते मध्यकफे लिङ्गं स्यान्मारुताधिके ॥९९॥

हीनपित्ते પિત્તની ન્યૂનતાવાળા हीनपित्त, मध्यकफे કફની મધ્યમતાવાળા मध्यकफ, वाताधिके અને વાયુની અધિકતાવાળા સન્નિપાત જ્વરમાં और वाताधिक सन्निपात ज्वरमें, शिरोरुक् માથામાં પીડા शिरदर्द, वेपथुः ધ્રુજારી कम्पन, श्वासः શ્વાસ श्वास, प्रलापः પ્રલાપ प्रलाप, छर्दि- વમન छर्दि, अरोचकौ અને અરુચિ और अरुचि, लिङ्गम् એ લક્ષણ ये लक्षण, स्यात् થાય છે होते हैं ॥ ९९ ॥

99. In the fever wherein the discordance of vata is great, of kapha moderate, and of pitta slight, the following are the symptoms—headache, tremors, dyspnea, raving, vomiting and anorexia.

शीतको गौरवं तन्द्रा प्रलापोऽस्थिशिरोऽतिरुक् ।
हीनपित्ते वातमध्ये लिङ्गं श्लेष्माधिके विदुः ॥१००॥

हीनपित्ते પિત્તની ન્યૂનતાવાળા हीनपित्त, वातमध्ये વાતની મધ્યમતાવાળા मध्यवात, श्लेष्माधिके અને કફની અધિકતાવાળા સન્નિપાત જ્વરમાં और श्लेष्माधिक सन्निपात ज्वरमें, शीतकः ટાઢ शैत्य, गौरवम् શરીરનું ભારેપણું गौरव, तन्द्रा તન્દ્રા तन्द्रा, प्रलापः પ્રલાપ प्रलाप, अस्थि-शिरः- તથા હાડકાં અને માથામાં तथा अस्थि और सिरमें, अतिरुक् અતિપીડા अतिवेदना, लिङ्गम् એ લક્ષણ इन लक्षण, विदुः વૈદ્યો જાણે છે वैद्य जानते हैं ॥ १०० ॥

100. In the fever wherein the discordance of kapha is great, of vata moderate and of pitta slight, the following are known to be the symptoms—chilliness, heaviness, torpor, raving and severe pain in head and bones.

---

९७. अरुचि–वमि (प.)
९८. लिङ्गं–चिह्नं (ड.)
९९. रोचकौ–रोचकाः (च.)
,, स्यान्मारुताधिके–वाताधिके मतम् (क. ष.)

श्वासः कासः प्रतिश्यायो मुखशोषोऽतिपार्श्वरुक् ।
कफहीने पित्तमध्ये लिङ्गं वाताधिके मतम् ॥१०१॥

कफहीने કફની ન્યૂનતાવાળા हीनकफ, **पित्त- मध्ये** પિત્તની મધ્યમતાવાળા पित्तमध्यम, **वाताधिके** અને વાયુની અધિકતાવાળા **સન્નિપાતજ્વરમાં** और वाताधिक सन्निपातज्वरमें, **श्वासः** શ્વાસ श्वास, **कासः** કાસ कास, **प्रतिश्यायः** પ્રતિશ્યાય प्रतिश्याय, **मुखशोषः** મુખશોષ मुखशोष, **अतिपार्श्वरुक्** અને પડખામાં અત્યંત પીડા और पार्श्वोंमें अत्यंत पीडा, **लिङ्गम्** એ લક્ષણો ये लक्षण, **मतम्** માન્યાં છે माने गये हैं ॥ १०१ ॥

101. In the fever wherein the discordance of the vata is great, of the pitta moderate, and of the kapha slight, the following are considered to be the symptoms—dyspnea, cough, coryza, dryness of the mouth and severe pain in the sides.

वर्चोभेदोऽग्निदौर्बल्यं तृष्णा दाहोऽरुचिर्भ्रमः ।
कफहीने वातमध्ये लिङ्गं पित्ताधिके विदुः ॥ १०२॥

कफहीने કફની ન્યૂનતાવાળા हीनकफ, **वातमध्ये** વાતની મધ્યમતાવાળા मध्यवात, **पित्ताधिके** અને પિત્તની અધિકતાવાળા સન્નિપાતજ્વરમાં और पित्ताधिक सन्निपातज्वरमें, **वर्चोभेदः** મળભેદ मलभेद, **अग्निदौर्बल्यम्** અગ્નિની દુર્બળતા अग्निकी दुर्बलता, **तृष्णा** તૃષા प्यास, **दाहः** દાહ दाह, **अरुचिः** અરુચિ अरुचि, **भ्रमः** અને ભ્રમ और चक्कर, **लिङ्गम्** એ લક્ષણો इन लक्षणोंको, **विदुः** વૈદ્યો જાણે છે वैद्य जानते हैं ॥ १०२ ॥

102. In the fever wherein the discordance of the pitta is great, of the vata is moderate and of the kapha slight, the following symptoms are observed—loose stools, weakness of the gastric fire, thirst, burning, anorexia and giddiness.

सन्निपातज्वरस्य सामान्यलक्षणम्—

सन्निपातज्वरस्योर्ध्वमतो वक्ष्यामि लक्षणम् ।
क्षणे दाहः क्षणे शीतमस्थिसन्धिशिरोरुजा ॥१०३॥
सास्रावे कलुषे रक्ते निर्भुग्ने चापि दर्शने ।
सस्वनौ सरुजौ कर्णौ कण्ठः शूकैरिवावृतः ॥१०४॥
तन्द्रा मोहः प्रलापश्च कासः श्वासोऽरुचिर्भ्रमः ।
परिदग्धा खरस्पर्शा जिह्वा स्रस्ताङ्गता परम्॥ १०५॥
ष्ठीवनं रक्तपित्तस्य कफेनोन्मिश्रितस्य च ।
शिरसो लोठनं तृष्णा निद्रानाशो हृदि व्यथा ॥१०६॥
स्वेदमूत्रपुरीषाणां चिराद्दर्शनमल्पशः ।
कृशत्वं नातिगात्राणां प्रततं कण्ठकूजनम् ॥१०७॥
कोठानां श्यावरक्तानां मण्डलानां च दर्शनम् ।
मूकत्वं स्रोतसां पाको गुरुत्वमुदरस्य च ॥१०८॥
चिरात् पाकश्च दोषाणां सन्निपातज्वराकृतिः ।

अतः ऊर्ध्वम् હવે પછી इसके आगे, **सन्निपात-ज्वरस्य** સન્નિપાતજ્વરનાં सन्निपातज्वरके, **लक्षणम्** લક્ષણ लक्षण, **वक्ष्यामि** કહીશ कहूंगा, **क्षणे दाहः** ઘડીભર દાહ થાય क्षणमें दाह, **क्षणे शीतम्** ઘડીભર ટાઢ લાગે क्षणमें शीत, **अस्थि-सन्धि-शिरः-रुजा** હાડકાંઓ, સાંધાઓ અને શિરમાં પીડા हड्डियों, संधियों और शिरमें दर्द, **सास्रावे** આંસુથી ભરાયેલ अश्रुपूर्ण, **कलुषे** મલિન कलुषित, **रक्ते** લાલ लाल, **निर्भुग्ने च अपि** તથા વાંકી और टेढे हुए, **दर्शने** આંખો नेत्र, **सस्वनौ** અવાજસહિત शब्द, **सरुजौ** અને પીડા સહિત एवं पीड़ा जिनमें हों ऐसे **कर्णौ** કાન कान, **शूकैः** શૂક शूकोंसे, **आवृतः इव** જાણે ભરાઈ ગયા હોય એવો आवृतकी तरह प्रतीत होता हुआ, **कण्ठः** કંઠ गला, **तन्द्रा** તન્દ્રા तन्द्रा, **मोहः** મૂર્ચ્છા मोह, **प्रलापः च** પ્રલાપ प्रलाप, **कासः** ખાંસી कास, **श्वासः** શ્વાસ श्वास, **अरुचिः** અરુચિ अरुचि, **भ्रमः** ભ્રમ भ्रम, **परिदग्धा** ચોતરફ દાઝી ગયેલા જેવી चारों ओर दग्धके सदृश पीलीकाली, **खर-स्पर्शा** અને ખરસટ और खर स्पर्शवाली, **जिह्वा** જીભ

१०२. वर्चोभेदो–पर्वभेदो (च. द. ध.)
,, वर्चोभेदोऽग्निदौर्बल्यं–पर्वभेदोऽग्निमान्द्यं च (ध.)

१०४. निर्भुग्ने–निर्भग्ने (ग)
,, चापि दर्शने–चापि लोचने (ध. च. फ.)
१०८. मूकत्वं–पूतित्वम् (प.)

जिह्वा, परम् તથા અત્યંત अतीव, स्रस्ताङ्गता અંગોની શિથિલતા शरीरका शिथिल होना, कफेन કફની સાથે कफसे, उन्मिश्रितस्य મિશ્રિત मिश्रित, रक्तपित्तस्य રક્ત અને પિત્તનું रक्त तथा पित्तका, ष्ठीवनम् થૂંકવું थूंकना, शिरसः માથાનું शिरका, लोठनम् આમ તેમ ફેરવવું इधर उधर पटकना, तृष्णा તૃષા प्यास, निद्रानाशः નિદ્રાનાશ निद्रानाश, हृदि અને હૃદયમાં हृदयमें, व्यथा વ્યથા व्यथा, स्वेद-मूत्र-पुरीषाणाम् પરસેવા, મૂત્ર અને મળનું पसीना, मूत्र और मलका, अल्पशः થોડા પ્રમાણમાં अल्प मात्रामें, चिरात् અને લાંબે સમયે और देरसे, दर्शनम् દેખાવું दिखाई देना, गात्राणाम् ગાત્રો अंगोंका, न अति कृशत्वम् અતિ કૃશ ન થવાં अतिकृश न होना, प्रततम् નિરતર निरंतर, कण्ठकूजनम् ગળામાંથી અવાજ નીકળવો कण्ठका कूजन, श्यावरक्तानाम् કાળાશ લેતા લાલ રંગના श्याव और रक्त वर्णके, कोठानाम् કોઠ कोठ, मण्डलानाम् च અને ચકામાં एवं चकत्तोंका, दर्शनम् દેખાવાં दिखाई देना, मूकत्वम् મૂંગાપણું मूकता, स्रोतसाम् સ્રોતોનું स्रोतोंका, पाकः પાકવું पक जाना, उदरस्य च અને પેટનું उदरका, गुरुत्वम् ભારેપણું भारी होना, दोषाणाम् તથા દોષોનો दोषोंका, चिरात् पाकः च લાંબે કાળે પાક देरसे पकना, सन्निपात- ज्वराकृतिः આ સર્વ સન્નિપાત-જ્વરનાં લક્ષણ છે ये सब सन्निपातज्वरके लक्षण हैं ॥ १०३-१०८½ ॥

103-108½. We shall now describe the characteristics of fever wherein the discordance of the three humors is equally severe. Sudden alternation of burning and cold aches in the bones, joints and the head; eyes watering, dull, injected with blood and twisted awry; pain and buzzing noise in the ears; sensation in the throat as if pricked on all sides by thorns; torpor, stupefaction, raving, cough, dyspnea, anorexia, giddiness, tongue scorched as though by fire and rough to the touch; utter lassitude of the limbs, spitting of blood or bile mixed with phlegm, restless tossing of the head, thirst, loss of sleep, pain in the chest, delayed and scanty discharge of perspiration, urine and stools, slight emaciation of the limbs, continuous stertorous sounds in the throat, emergence of circular wheels or rashes of dark-red color, inaudibility of voice, inflammation of the body-channels, heaviness of the stomach and delayed maturing of the morbid humors—these are the manifestations of the fever of tridiscordance type.

सन्निपातज्वरस्य साध्यासाध्यलक्षणम्—

दोषे विबद्धे नष्टेऽग्नौ सर्वसंपूर्णलक्षणः ॥१०९॥
सन्निपातज्वरोऽसाध्यः कृच्छ्रसाध्यस्त्वतोऽन्यथा ।

दोषे विबद्धे મળની કબજિયાત હોય दोषका विबंध होने पर, अग्नौ च અને અગ્નિનો और जठराग्निके, नष्टे નાશ થાય ત્યારે नष्ट होने पर, सर्वसंपूर्णलक्षणः સઘળાં અને પૂરાં લક્ષણવાળો सब और सम्पूर्ण बलवाले लक्षणोंसे युक्त, सन्निपातज्वरः સન્નિપાતજ્વર सन्निपातज्वर, असाध्यः અસાધ્ય છે असाध्य है, अतः अन्यथा આનાથી વિપરીત इससे विपरीत, तु कृच्छ्रसाध्यः કષ્ટસાધ્ય છે कृच्छ्रसाध्य है ॥ १०९½ ॥

109-109½. The fever born of tridiscordance, if marked by the retention of impurities and loss of the digestive fire and attended with all its symptoms, is impossible of cure. If otherwise, it may, with difficulty, be brought under control.

संसर्गसन्निपातजज्वराणामतिदेशेन लक्षणकथनम्—

निदाने त्रिविधा प्रोक्ता या पृथग्जज्वराकृतिः ॥११०॥
संसर्गसन्निपातानां तया चोक्तं स्वलक्षणम् ।

११०½. तथा–तथा (च.)

निदाने જ્વરનિદાનમાં ज्वरनिदानमें, या જે जो, त्रिविधा ત્રણ પ્રકારનાં तीन प्रकारके, पृथग्ज જુદા જુદા દોષથી ઉત્પન્ન થયેલ पृथक् पृथक् दोषजन्य, ज्वराकृतिः જ્વરનાં લક્ષણો ज्वरके लक्षण, प्रोक्ता કહ્યાં છે कहे हैं, तया च તેઓથી उनसे, संसर्ग- દ્વન્દ્વજ જ્વરોનાં द्वन्द्वज ज्वरके, सन्निपातानाम् અને સન્નિપાતજ જ્વરોનાં और सन्निपातज ज्वरके, स्वलक्षणम् પોતાનાં લક્ષણો अपने लक्षण, उक्तम् કહેવાઈ ગયાં છે कह दिये हैं ॥ ११०½ ॥

110-110½. The three-fold division of fever arising from the discordance of one or the other of the humors has been delineated in the section on Pathology, in view of which have also been described in greater detail the pathognomic symptoms of the fevers born of tri and bi-discordances of the humors.

आगन्तुज्वरभेदाः —

आगन्तुरष्टमो यस्तु स निर्दिष्टश्चतुर्विधः ॥१११॥
अभिघाताभिषङ्गाभ्यामभिचाराभिशापतः ।

यः तु જે जो, अष्टमः આઠમો आठवाँ, आगन्तुः આગન્તુક જ્વર છે आगन्तुक ज्वर है, सः તે वह, अभिघात- અભિઘાત अभिघात, अभिषङ्गाभ्याम् અભિષંગ अभिषंग, अभिचार- અભિચાર अभिचार, अभिशापतः અને અભિશાપથી और अभिशापसे, चतुर्विधः ચાર પ્રકારનો चार प्रकारका, निर्दिष्टः દર્શાવ્યો છે बताया गया है ॥ १११½ ॥

111-111½. The eighth variety of fever, which arises from external factors, is classified into four kinds. Thus the exogenous fever is brought on by trauma, possession by evil spirits, black magic and imprecation.

अभिघातज्वरलक्षणम्—

शस्त्रलोष्टकशाकाष्ठमुष्ट्यरत्नितलद्विजैः ॥११२॥
तद्विधैश्च हते गात्रे ज्वरः स्यादभिघातजः ।

शस्त्र- શસ્ત્ર शस्त्र, लोष्ट- માટીનું ઢેફું मिट्टीका ढेला, कशा- ચાબુક चाबुक, काष्ठ- લાકડી लकडी, मुष्टि- मुट्ठी घूंसा, अरत्नितल- હાથનું તળું (થપાટ) चपेटा, द्विजैः तथा દાંતો એઓથી तथा दांत इनसे, तद्विधैः च અને તેવી જાતનાં અન્ય સાધનોથી और इनके सदृश अन्य हेतुओंसे, गात्रे ગાત્રમાં अंगको, हते આઘાત થતાં चोट लगने पर, ज्वरः જ્વર ज्वर, स्यात् ઉત્પન્ન થાય છે होता है ॥ ११२½ ॥

112-112½. The traumatic fever is that which occurs as the result of the body being injured by weapons, brick-bats, whips, sticks, clenched fists, palms of the hands, teeth or by such other external agencies.

तत्राभिघातजे वायुः प्रायो रक्तं प्रदूषयन् ॥११३॥
सव्यथाशोफवैवर्ण्यं करोति सरुजं ज्वरम् ।

तत्र તે उस, अभिघातजे અભિઘાતથી થયેલા જ્વરમાં अभिघातज ज्वरमें, प्रायः ઘણે ભાગે प्रायशः, वायुः વાયુ वायु, रक्तम् રક્તને रक्तको, प्रदूषयन् દૂષિત કરીને दूषित करके, सव्यथा- વ્યથા व्यथा, शोफ- સોજા सूजन, वैवर्ण्यम् તથા વિવર્ણતાસહિત और विवर्णता-युक्त, सरुजम् અને પીડાયુકત और पीडासहित, ज्वरम् જ્વરને ज्वरको, करोति ઉત્પન્ન કરે છે उत्पन्न करता है ॥ ११३½ ॥

113-113½. In the traumatic fever, it is the vata, that generally vitiating the blood gives rise to the fever accompanied by aches and pain, swelling and change of color.

अभिषङ्गज्वरलक्षणम्—

कामशोकभयक्रोधैरभिषक्तस्य यो ज्वरः ॥११४॥
सोऽभिषङ्गज्वरो ज्ञेयो यश्च भूताभिषङ्गजः ।

काम- કામ काम, शोक શોક शोक, भय- ભય भय, क्रोधैः અને ક્રોધથી और क्रोध इनसे, अभिषक्तस्य પીડિત થયેલા મનુષ્યને पीड़ित पुरुषको, यः જે जो, ज्वरः જ્વર આવે છે ज्वर आता है, यः च અને જે और जो, भूताभिषङ्गजः ભૂતના આવેશથી થયેલો હોય છે भूतबाधासे आनेवाला है, सः તેને उसको, अभिषङ्गज्वरः અભિષંગજ્વર अभिषंगज्वर, ज्ञेयः જાણવો जानना चाहिए ॥ ११४½ ॥

114-114½. That variety of fever which is seen in persons who are seized with desire, grief fear or anger, as well as that which appears in persons who are seized by the spirits is to be known as fever born of 'seizure'.

कामशोकभयाद्वायुः, क्रोधात् पित्तं, त्रयो मलाः ११५
भूताभिषङ्गात् कुप्यन्ति भूतसामान्यलक्षणाः ।
भूताधिकारे व्याख्यातं तदष्टविधलक्षणम् ॥११६॥

काम-शोक-भयात् કામ, શોક અને ભયથી काम, शोक और भय इनसे, वायुः વાયુ वायु, क्रोधात् ક્રોધથી क्रोधसे, पित्तम् પિત્ત पित्त, भूताभिषङ्गात् તથા ભૂતોના આવેશથી एवं भूताभिषंगसे, भूत-सामान्य-लक्षणाः ભૂતોના જેવાં લક્ષણ ધરાવતા भूत जैसे लक्षणवाले, त्रयः मलाः ત્રણે દોષો तीनों दोष, कुप्यन्ति પ્રકોપ પામે છે प्रकुपित होते हैं, तत् તે उस, अष्टविध- लक्षणम् આઠ પ્રકારના ભૂતાભિષંગનું લક્ષણ अष्टविध भूताभिषङ्गका लक्षण, भूताधिकारे ભૂતાધિકારમાં भूताधिकारमें, व्याख्यातम् કહ્યું છે कहा गया है ॥ ११५-११६ ॥

115-116. If the invasion is by desire, grief or fear, it is the vata that gets provoked; if by anger, it is the pitta; and if by the genii it is any of the three humors corresponding to the nature of the particular genius. This last, evincing eight kinds of characteristics has been fully described in the topic dealing with spirit-possession.

विषवृक्षानिलस्पर्शात्तथाऽन्यैर्विषसंभवैः ।
अभिषक्तस्य चाप्याहुर्ज्वरमेकेऽभिषङ्गजम् ॥११७॥

विषवृक्ष-अनिल स्पर्शात् વિષવૃક્ષના વાયુના સ્પર્શથી विषवृक्षकी हवाके स्पर्शसे, तथा તથા तथा, अन्यैः અન્ય अन्य, विषसंभवैः વિષવાળા પદાર્થોનો विषयुक्त वस्तुओंका, अभिषक्तस्य સંબંધ થવાથી પુરુષને संबन्ध होनेसे पुरुषको, ज्वरम् જે જ્વર આવે છે તેને जो ज्वर आता है उसको, अपि પણ भी एके કેટલાક આચાર્યો कई आचार्य, अभिष जम् અભિષંગજ જ્વર अभिषंगजन्य ज्वर, आहुः કહે છે कहते हैं ॥ ११७ ॥

117. Some physicians belonging to another school of thought maintain that even that fever which is seen in a person suffering from the effects of contact with poisonous plants of air or with other poisonous things, is also another variety of seizure fever.

अभिचाराभिशापजयोर्लक्षणम्—

चिकित्सया विषघ्न्यैव स शमं लभते नरः ।
अभिचाराभिशापाभ्यां सिद्धानां यः प्रवर्तते ॥११८॥
सन्निपातज्वरो घोरः स विज्ञेयः सुदुःसहः ।
सन्निपातज्वरस्योक्तं लिङ्गं यत्तस्य तत् स्मृतम् ११९

सः તે वह, नरः પુરુષ पुरुष, विषघ्न्या વિષને હણનારી विषघ्न, एव જ ही, चिकित्सया ચિકિત્સા વડે चिकित्सासे, शमम् શાન્તિને शान्ति, लभते પ્રાપ્ત કરે છે पाता है, सिद्धानाम् સિદ્ધ પુરુષોના सिद्ध ऋषि मुनियोंके, अभिचार- અભિચાર अभिचार, अभिशापाभ्याम् અને અભિશાપથી तथा अभिशापसे, यः જે जो, घोरः ભયંકર भयंकर, सन्निपातज्वरः સન્નિપાતજ્વર सन्निपातज्वर, प्रवर्तते થાય છે होता है, सः તેને उसे, सुदुःसहः અત્યંત દુઃસહ अत्यन्त दुःसह, विज्ञेयः જાણવો समझना चाहिए, सन्निपातज्वरस्य सन्निपात-

११७. वृक्ष—सृष्ट (प.)
११८. स शमं—प्रशमं (ब.)
,, ज्वरः—नरः (द.)

જ્વરનું सन्निपातज्वरका, यत् लिङ्गम् જે લક્ષણ જો લક્ષણ, उक्तम् પહેલાં કહ્યું છે पूर्वमें कहा है, तत् તેને वह, तस्य તેનું उसका, स्मृतम् લક્ષણ જાણવું लक्षण माना गया है ॥ ११८-११९ ॥

118-119. Accordingly, in their opinion, a patient afflicted with this kind of fever obtains relief by treatment with antidotes. That fever which is induced by black-magic or imprecation by Siddhas is characterised by the discordance of all the three humors, is very severe in nature and is most unbearable.

चित्तेन्द्रियशरीराणामर्तयोऽन्याश्च नैकशः ।
प्रयोगं त्वभिचारस्य दृष्ट्वा शापस्य चैव हि ॥१२०॥
स्वयं श्रुत्वाऽनुमानेन लक्ष्यते प्रशमेन वा ।
वैविध्यादभिचारस्य शापस्य च तदात्मके ॥१२१॥
यथाकर्मप्रयोगेण लक्षणं स्यात् पृथग्विधम् ।

चित्त- ચિત્ત चित्त, इन्द्रिय- ઇન્દ્રિય इन्द्रिय, शरीराणाम् તથા શરીરની तथा शरीरकी, अन्याः બીજી दूसरी, अर्तयः च પીડાઓ पीडायें, न एकशः અનેક પ્રકારની હોય છે તેઓને अनेक प्रकारकी होती हैं उनको, अभिचारस्य અભિચારના अभिचारके, शापस्य च एव અને શાપના एवं शापके, प्रयोगम् तु પ્રયોગને प्रयोगको, स्वयम् પોતે स्वयं, दृष्ट्वा જોઈને देख कर, श्रुत्वा સાંભળીને सुन कर, अनुमानेन તેમજ અનુમાનદ્વારા एवं अनुमानसे, प्रशमेन वा અથવા પ્રશમન વડે अथवा प्रशमनसे, लक्ष्यते हि અભિચારજ તથા અભિશાપજ જ્વરનું લક્ષણ જાણી શકાય છે अभिचारज तथा अभिशापज ज्वरका लक्षण जाना जाता है; अभिचारस्य અભિચારની अभिचारकी, शापस्य च અને અભિશાપની और अभिशापकी, वैविध्यात् વિવિધતાને લઈ विविधताके कारण, तदात्मके તેનાથી થયેલા જ્વરમાં उनसे उत्पन्न हुए ज्वरमें, यथा- कर्म- प्रयोगेण તે તે કર્મના પ્રયોગને અનુસરીને उस उस कर्मके प्रयोगके अनुसार, पृथग्विधम् જુદા જુદા પ્રકારનાં भिन्न भिन्न प्रकारके, लक्षणम् લક્ષણો लक्षण, स्यात् હોય છે होते हैं ॥ १२०-१२१½ ॥

120-121½. It should, however, be distiuguished from other fevers coming under this categories of triple discordance by noting the precise character of the pain afflicting the mind, the senses and the body as well as diverse other symptoms of ill-being evinced by the patient, by personal experience of the *modus operandi* of black magic and curse, by what one has heard from authoritative sources concerning such things and also by the method of inference from the application of therapeutic tests. Since black magic and imprecation are of diverse modes, the fevers resulting from their employment are also diverse and are distinguished by symptoms corresponding to the particular mode.

कामशोकभयक्रोधभूतावेश-विषज-ज्वराणां लक्षणम्—

ध्याननिःश्वासबहुलं लिङ्गं कामज्वरे स्मृतम् ॥१२२॥
शोकजे बाष्पबहुलं त्रासप्रायं भयज्वरे ।
क्रोधजे बहुसंरम्भं भूतावेशे त्वमानुषम् ॥ १२३॥
मूर्च्छामोहमदग्लानिभूयिष्ठं विषसंभवे ।

कामज्वरे કામજ્વરમાં कामज्वरमें, ध्याननिःश्वासबहुलम् બહુ ચિન્તા અને નિઃશ્વાસ बहुत चिन्ता तथा उच्छ्वास, लिङ्गम् એ લક્ષણ ये लक्षण, स्मृतम् કહેલા છે कहे गये हैं, शोकजे શોકજ જ્વરમાં शोकज ज्वरमें, बाष्पबहुलम् બહુ આંસુ बहुत अश्रु, भयज्वरे ભયજ્વરમાં भयज्वरमें, त्रासप्रायम् બહુ ભય बहुत त्रास, क्रोधजे ક્રોધજ્વરમાં क्रोधज्वरमें, बहुसंरम्भम् બહુ કોપ बहुत कोप, भूतावेशे तु ભૂતાભિષંગજ્વરમાં भूतावेशज्वरमें, अमानुषम् અમાનુષ ક્રિયાઓ છે अमानुष

---

१२१. लक्ष्यते—लक्षयेत् (च.)

क्रियायें, विषसंभवे અને વિષજ્વરમાં और विषज्वरमें, मूर्च्छा-मोह-मदग्लानि-भूयिष्ठम् બહુ મૂર્ચ્છા, મોહ, મદ અને ગ્લાનિ એ લક્ષણ કહેલાં છે बहुत मूर्च्छा, मोह, मद और थकान ये लक्षण कहे गये हैं ॥ १२२-१२३½ ॥

122-123½ In the fever of desire the symptom is obsession with constant sighing; the fever born of grief is marked by constant lachrymation; the fever born of fear by constant dread; the fever born of anger by much exasperation; the fever resulting from spirit-possession by super-human behaviour and the fever born of poisoning by much fainting, stupefaction, intoxication and depression.

केषाञ्चिदेषां लिङ्गानां संतापो जायते पुरः ॥१२४॥
पश्चात्तुल्यं तु केषाञ्चिदेषु कामज्वरादिषु ।

एषु कामज्वरादिषु આ કામજ્વર વગેરેમાં इन कामज्वर आदिमें, केषाञ्चित् કેટલાએક પુરુષોને किन्हीं पुरुषोंको, एषाम् આ इन, लिङ्गानाम् લક્ષણોની लक्षणोंके, पुरः પહેલાં पूर्व, पश्चात् કેટલાએક પુરુષોને પછી किन्हींको पीछे, केषाञ्चित् तु અને કેટલાએકને તો और किन्हींको तो, तुल्यम् સાથે સાથે साथ साथ, संतापः સંતાપ सन्ताप, जायते ઉત્પન્ન થાય છે उत्पन्न होता है ॥ १२४½ ॥

124-124½. In some patients afflicted with the fever due to desire and the rest, the rise of temperature precedes the other symptoms; in some others the rise of temperature follows the other symptoms; while in some the rise of temperature and other symptoms appear simultaneously.

कामादिजानामुद्दिष्टं ज्वराणां यद्विशेषणम् ॥१२५॥
कामादिजानां रोगाणामन्येषामपि तत् स्मृतम् ।

कामादिजानाम् કામ વગેરેથી થતા कामादिजनित, ज्वराणाम् જ્વરોનું ज्वरोंका, यत् જે जो, विशेषणम् લક્ષણ लक्षण, उद्दिष्टम् કહેલું છે कहा गया है, तत् તે वह, कामादिजानाम् કામ વગેરેથી થતા कामादिजनित, अन्येषाम् અન્ય अन्य, रोगाणाम् अपि રોગોનું પણ रोगोंका भी, स्मृतम् માનેલ છે माना गया है ॥ १२५½ ॥

125-125½. Some again of the symptoms which have been assigned to this or that in this relation of fevers beginning with that born of desire, are also seen in connection with other diseases born of same cause.

आगन्तुज्वरेषु दोषादिविचारः —

मनस्यभिहते पूर्वं कामाद्यैर्न तथा बलम् ॥१२६॥
ज्वरः प्राप्नोति वाताद्यैर्देहो यावन्न दुष्यति ।

कामाद्यैः કામ વગેરેથી कामादिकसे, मनसि મન मनके, अभिहते દૂષિત થયા છતાં दूषित होने पर, यावत् જ્યાં સુધી जब तक वाताद्यैः વાત વગેરે દોષોથી वातादि दोषोंसे, देहः દેહ देह, न दुष्यति દૂષિત થતો નથી दूषित नहीं होता, तावत् ત્યાં સુધી तब तक, ज्वरः જ્વર ज्वर, पूर्वम् પ્રથમ प्रथम, तथा તેટલો उतना, बलम् न प्राप्नोति બળવાળો થતો નથી बलवान नहीं होता ॥ १२६½ ॥

126-126½. Even after the mind has become afflicted with disease etc., the fever does not become virulent so long as the body is free from vitiation by the morbific humors, vata etc

देहे चाभिह(द्रु)ते पूर्वं वाताद्यैर्न तथा बलम् ॥१२७॥
ज्वरः प्राप्नोति कामाद्यैर्मनो यावन्न दुष्यति ।

वाताद्यैः વાયુ વગેરે દોષોથી वातादि दोषोंसे, देहे च દેહ देहके, अभिह(द्रु)ते દૂષિત થયા છતાં दूषित होने पर, यावत् જ્યાં સુધી जब तक, मनः મન मन,

१२६. अभिहते—अभिद्रुते (त.)
,, कामाद्यैः—वाताद्यैः (ध.)

कामाद्यैः કામ વગેરેથી कामादिकोंसे **न दुष्यति** દૂષિત થતું **नथी** नहीं दूषित होता, **तावत्** ત્યાં સુધી तब तक, **ज्वरः** જ્વર ज्वर, **पूर्वम्** પ્રથમ प्रथम, **तथा** તેટલા उतने, **बलम्** બળને बलको, **न प्राप्नोति** પ્રાપ્ત કરતો **નથી** नहीं प्राप्त होता ॥ १२७½ ॥

127-127½. And conversely, so long as the mind is unvitiated by desire etc., the fever fails to gather strength even if the body has been assailed by the morbific humors.

आगन्तोर्निजाद्भेदको धर्मः —

ते पूर्वं केवलाः पश्चान्निजैर्व्यामिश्रलक्षणाः ॥१२८॥
हेत्वौषधविशिष्टाश्च भवन्त्यागन्तवो ज्वराः ।

ते તે वे, **आगन्तवः** આગન્તુ आगन्तु, **ज्वराः** જ્વરો ज्वर, **पूर्वम्** પહેલાં प्रथम, **केवलाः** કેવળ केवल, **पश्चात्** અને પછી बादमें, **निजैः** નિજ દોષના निज दोषोंके, **व्यामिश्रलक्षणाः** લક્ષણોથી યુક્ત लक्षणोंसे मिश्रित, **हेतु-औषध-विशिष्टाः च** અને હેતુ તેમજ ઔષધોપચારમાં ભિન્નતાવાળા और हेतु एवं औषधमें भिन्नतावाले, **भवन्ति** હોય છે होते हैं ॥ १२८½ ॥

128-128½. These exogenous fevers are at the onset marked only by their own specific symptoms; thereafter they develop other and mixed symptoms. Moreover all these fevers being exogenous, differ from the other endogenous types of fevers as regards both their causation and medication.

ज्वरसंप्राप्तिः —

संसृष्टाः सन्निपतिताः पृथग्वा कुपिता मलाः ॥१२९॥
रसाख्यं धातुमन्वेत्य पक्तिं स्थानान्निरस्य च ।
स्वेन तेनोष्मणा चैव कृत्वा देहोष्मणो बलम् ॥१३०॥
स्रोतांसि रुद्ध्वा संप्राप्ताः केवलं देहमुल्बणाः ।
संतापमधिकं देहे जनयन्ति नरस्तदा ॥१३१॥
भवत्यत्युष्णसर्वाङ्गो ज्वरितस्तेन चोच्यते ।

संसृष्टाः બબ્બે દોષોનો સંસર્ગ થઈને द्वन्द्वरूपसे, **पृथक् वा** અથવા જુદા જુદા या अलग अलग, **कुपिताः** પ્રકોપ પામેલા कुपित हुए, **मलाः** દોષો दोष, **रसाख्यम्** રસ નામના रसनामक, **धातुम्** ધાતુને धातुको, **अन्वेत्य** પ્રાપ્ત થઈને पा कर, **स्थानात् च** જઠરસ્થાનમાંથી और पक्तिस्थानसे, **पक्तिम्** જઠરાગ્નિને जठराग्निको, **निरस्य** બહાર કાઢીને बाहिर निकाल कर, **स्वेन एव च** પોતાની निजकी, **तेन** તે उस, **ऊष्मणा** ગરમી વડે गरमीसे, **देहोष्मणः** દેહની ગરમીનું देहकी गरमीका, **बलम् कृत्वा** બળ વધારીને बल बढ़ा कर, **स्रोतांसि** સ્રોતોને स्रोतोंको, **रुद्ध्वा** રોકીને रुक कर, **उल्बणाः** પ્રબળ થઈ उल्बण हो कर, **केवलम्** તથા સમસ્ત तथा सम्पूर्ण, **देहम् संप्राप्ताः** દેહમાં ફરી વળી देहमें फैल कर, **देहे** દેહમાં शरीरमें, **अधिकम्** અધિક अधिक, **सन्तापम्** સંતાપ (ઉષ્ણતા) सन्ताप, **जनयन्ति** ઉત્પન્ન કરે છે पैदा करते हैं, **तदा** ત્યારે तब, **नरः** પુરુષ पुरुष, **अत्युष्ण-सर्वाङ्गः** સર્વ અંગોમાં અતિ ઉષ્ણ अत्यन्त उष्ण शरीरवाला, **भवति** થાય છે हो जाता है, **तेन च** અને તેથી और उसीसे, **ज्वरितः** જ્વરવાળો ज्वरवाला, **उच्यते** કહેવાય છે कहा जाता है ॥ १२९-१३१½ ॥

129-131½. The humors getting provoked, either singly, dually or totally (i. e. all the three of them) invade first the body-element called the 'rasa', the body nutrient fluid, and displacing the gastric fire, augment the normal heat of the body by their own morbid heat conjoined to the heat of the displaced gastric fire; and thereafter obstructing the body-channels, finally run riot through the whole body, thus engendering excessive heat in the body. As the result, the patient, at this time, becomes exceedingly heated in all the parts of his body, and is consequently spoken of as being fevered.

---

१३०. पक्तिं स्थानात्—पक्तिस्थानात् (च.)

१३०½. रुद्ध्वा—बद्ध्वा (क.)

ज्वरे स्वेदाप्रवृत्तिहेतुः —

स्रोतसां संनिरुद्धत्वात् स्वेदं ना नाधिगच्छति १३२
स्वस्थानात् प्रच्युते चाग्नौ प्रायशस्तरुणे ज्वरे ।

स्रोतसाम् સ્રોતો स्रोतोंके, **संनिरुद्धत्वात्** રોકાઈ જવાથી रुक जानेसे, **अग्नौ च** અને અગ્નિ और अग्निके, **स्वस्थानात्** પોતાના સ્થાનથી ભ્રષ્ટ થવાથી अपने स्थानसे च्युत हो जानेसे, **तरुणे ज्वरे** તરતમાં ઉત્પન્ન થયેલા જ્વરમાં तरुण ज्वरमें, **ना** પુરુષને पुरुषको, **प्रायशः** ઘણું કરીને प्रायशः, **स्वेदम्** પરસેવો स्वेद, **न अधिगच्छति** આવતો નથી नहीं आता ॥ १३२½ ॥

132-132½. On account of the body-channels being obstructed and the gastric fire displaced, the sweat does not generally emerge to the skin-surface during the early stage of the fever.

आमज्वरलक्षणम्—

अरुचिश्चाविपाकश्च गुरुत्वमुदरस्य च ॥१३३॥
हृदयस्याविशुद्धिश्च तन्द्रा चालस्यमेव च ।
ज्वरोऽविसर्गी बलवान् दोषाणामप्रवर्तनम् ॥१३४॥
लालाप्रसेको हृल्लासः क्षुन्नाशो विरसं मुखम् ।

वृद्धः वधेला बढ़े हुए, क्लेदः च क्लेद क्ले :, मे : च ।द मेद, कफः च तथा कफ तथा कफ, प्र ेह- हे :ः प्रमे ना हेतुओ छे प्रमेहके हेतु हैं, तस्मा ्र ते ी इस लिए, प्रसमीक्ष्य समजीने समझकर, क पित्तं पु कफ ्तजन्य कफपित्तज, मेहेषु प्रमेहमां मेहों ।, वै न वैद्य ैद्यको, पूर्वम् पहेलां पहिले, अपतर्पणानि ः पतर्प णु अपत र्पण, कार्याणि करवुं करना चाहिए ॥ ५१ ।

51. The physician, knowin ; th it th increase of body-fluid, ; dipo e tis ue and kapha is the cause f u:i- na y disorders, should adminis er t e pr cedure of depletion at the ve y ou set in the treatment of rina y di orders caused by kapha an pit a.

वातं णमेहचिकित्सा—

> या वातमेहान् प्रति पूर्वमुक्ता
> वातोल्बणानां विहिता क्रिया ा ।
> वायुर्हि मेहेष्वतिकर्शितानां
> कुप्यत्यसाध्यान् प्रति नास्ति चि न्ता ॥ ५२॥

वातमेहान् वातप्रमेहो वातप्रमेहोंके, प्रति प्रत्ये नी लिए या क्रिया जे चिकित्सा जो चिकित्सा, पू म् पहे ां पूर्व उक्ता कही छे कही है, सा ते वह, वात ल्बणान म् वात ल्बण प्रमेहोनी पण वातोल्बण प्रमेहोंके लिए ी, विहि ता कहेली छे विहित है, हि कारणके क्यों कि मेहे प्रमेहोमां मेहोंमें, अतिकर्शितानाम् ति श मनु ष्योने अतिकृश हुए मनुष्योंकी, वायुः ायु वायु, कुप् ति कुपित थाय छे कुपित होती है, असाध्या न् असा ध्यना असाध्यके, प्रति विषयमां लिए ते चि ता वि ार विचार, न अस्ति करवामां आवतो थी हीं किय जाता ॥ ५२ ॥

52. Treatment that has be n pr viously prescribed in the rina y di orders of vata type i a so in icated in urinary disorder w h pr voked vata as complication. t is in the extremely debilitated sub ects of urinary disorders that vata becomes provoked and it is needless to worry about irremediable conditions.

प्रमेहनिदानसेवननिषेधः —

> यैर्हेतुभिर्ये प्रभवन्ति मेहा-
> स्तेषु प्रमेहेषु न ते निषेव्याः ।
> हेतोरसेवा विहिता यथैव
> जातस्य रोगस्य भवेच्चिकित्सा ॥५३॥

यैः जे जिन, हेतुभिः कारणोथी कारणोंसे, ये मेहाः जे प्रमेहो जो प्रमेह, प्रभवन्ति उत्पन्न थाय छे उत्पन्न होते हैं, तेषु ते उन, प्रमेहेषु प्रमेहोमां प्रमेहोंमें, ते तेओनुं वे, न निषेव्याः सेवन न करवुं सेवनीय नहीं है, यथा एव जेम जैसे ही, हेतोः हेतुनुं हेतुओंका, असेवा असेवन त्याग, विहिता रोगथी बचवा माटे कह्युं छे रोगसे बचनेके लिए कहा है, जातस्य तेम ते उत्पन्न थयेल वैसे ही कह उत्पन्न हुए, रोगस्य रोगनी रोगकी, चिकित्सा चिकित्सा पण चिकित्सा भी, भवेत् थाय छे होती है ॥ ५३ ॥

53. Those which have been identified as causative factors in a given case of urinary disorder should be avoided in that particular case. Just as the avoidance of morbific factors ensures the prevention of disease, so also it constitutes the cure of disease which has already arisen.

प्रमेहरक्तपित्तयोर्विशेषनिर्णयः —

> हारिद्रवर्णं रुधिरं च मूत्रं
> विना प्रमेहस्य हि पूर्वरूपैः ।
> यो मूत्रयेत्तं न वदेत् प्रमेहं
> रक्तस्य पित्तस्य हि स प्रकोपः ॥५४॥

प्रमेहस्य प्रमेहनां प्रमेहके, पूर्वरूपैः हि पूर्वरूप पूर्वरूपोंके, विना विना बिना ही, यः जे जो पुरुष, हारिद्रवर्णम् हळदरना रंग जेवो हलदुवर्ण, रुधिरम् तथा लाल तथा रक्तवर्ण, मूत्रम् पेशाब मूत्रका, मूत्रयेत्

करतो होय त्याग करे, तम् तेने उसको, प्रमेहम् प्रमेह प्रमेह, न वदेत् न कहेवो न कहे, स हि ते तो वह तो, रक्तस्य पित्तस्य रक्तपित्तनो रक्तपित्तका, प्रकोपः प्रकोप छे प्रकोप है ॥ ५४ ॥

54. In a case where a patient passes yellow or red-coloured urine, without showing the premonitory symptoms of urinary disorder, the morbid condition should not be diagnosed as a case of urinary disorder, for it is really a condition of hemothermia.

मधुमेहस्य विशेषनिर्णयः —

दृष्ट्वा प्रमेहं मधुरं सपिच्छं
मधूपमं स्याद् द्विविधो विचारः ।
क्षीणेषु दोषेष्वनिलात्मकः स्यात्
संतर्पणाद्वा कफसंभवः स्यात् ॥५५॥

प्रमेहम् प्रमेहने प्रमेहको, मधुरम् मधुर मधुर, सपिच्छम् पिच्छिल पिच्छायुक्त, मधूपमम् अने मधना जेवो और मधुके सदृश, दृष्ट्वा जोईने देखकर, द्विविधः बे प्रकारनो दो प्रकारका, विचारः विचार विचार, स्यात् थाय छे होता है, दोषेषु क्षीणेषु दोषो क्षीण थतां दोषोंके क्षीण होने पर, अनिलात्मकः प्रमेह वातात्मक प्रमेह वातात्मक, स्यात् होई शके छे हो सकता है, संतर्पणात् वा अथवा संतर्पणथी या संतर्पणके कारण, कफसंभवः कफजन्य कफजनित, स्यात् होई शके छे हो सकता है ॥ ५५ ॥

55. In a case where the urine is found to be sweet, slimy and honey-like, the condition may admit of two different diagnoses. If the body elements are found to be in a depleted condition, the case should be diagnosed as coming under the vata type; if on the contrary, the case reveals a plethoric condition, then it should be diagnosed as belonging to the kapha type.

प्रमेहाणां साध्यासाध्यविचारः —

सपूर्वरूपाः कफपित्तमेहाः
क्रमेण ये वातकृताश्च मेहाः ।
साध्या न ते, पित्तकृतास्तु याप्याः,
साध्यास्तु मेदो यदि न प्रदुष्टम् ॥५६॥

सपूर्वरूपाः पूर्वरूपसहित पूर्वरूपसहित, कफपित्तमेहाः कफपित्तप्रमेहो कफपित्तप्रमेह, क्रमेण तथा क्रमथी और क्रमसे, वातकृताः च वातजन्य वातजनित, ये जे जो, मेहाः प्रमेहो छे मेह हैं, ते साध्याः न तेओ साध्य नथी वे साध्य नहीं हैं, पित्तकृताः तु पित्तजन्य पित्तजनित तो, याप्याः याप्य छे याप्य हैं, यदि परंतु जो परन्तु यदि, मेदः मेद मेद, न प्रदुष्टम् दूषित न होय तो प्रदुष्ट नहीं हो तो, साध्याः तु तेओ साध्य छे वे साध्य हैं ॥ ५६ ॥

56. The kapha and pitta types of urinary disorders if preceded by their respective premonitory symptoms, and those urinary disorders which have gradually culminated into the vata type, are not curable. The urinary disorders due to pitta are generally palliable only; but if the fat element has not been impaired, they admit of cuartive treatment.

कुलजप्रमेहस्यासाध्यत्वम्—

जातः प्रमेही मधुमेहिनो वा
न साध्य उक्तः स हि बीजदोषात् ।

५५. स्याद् द्विविधो विचारः – स्याद्विविधोपचारः (ख. ङ.)
,, अनिलात्मकः स्यात् – अनिलात्मकाः स्युः (ब.)
,, कफसंभवः स्यात् – कफसंभवाः स्युः (ब.)

५७. मधुमेहिनो वा – मधुमेहिनां वा (प.)
,, ,, – मधुमेहिनां यः (प.)

ये चापि केचित् कुलजा विकारा
भवन्ति तांश्च प्रवदन्त्यसाध्यान् ॥५७॥

मधुमेहिनः वा અથવા મધુમેહવાળા પિતાથી अथवा मधुमेहवाले पितासे, जातः જન્મેલો उत्पन्न, प्रमेही પ્રમેહનો રોગી प्रमेही, साध्यः न उक्तः સાધ્ય કહ્યો નથી साध्य नहीं कहा गया है, हि सः बीजदोषात् કારણ કે તે બીજદોષથી થયેલો હોય છે क्योंकि वह बीजदोषके कारण हुआ है, ये च अपि અને જે પણ और भी जो, केचित् કોઈ कोई, विकाराः વિકાર विकार, कुलजाः કુલપરંપરાથી कुलज, भवन्ति થાય છે होते हैं, तान् च તેઓને उन्हें भी, असाध्यान् અસાધ્ય असाध्य, प्रवदन्ति કહે છે कहते हैं ॥ ५७ ॥

57. Persons with congenital urinary disorder or those born of diabetic parents are incurable owing to germoplasmic morbidity. Similarly those affected with hereditary taint are considered incurable.

प्रमेहपिडकाचिकित्सा—

प्रमेहिणां याः पिडका मयोक्ता
रोगाधिकारे पृथगेव सप्त ।
ताः शल्यविद्भिः कुशलैश्चिकित्स्याः
शस्त्रेण संशोधनरोपणैश्च ॥५८॥

रोगाधिकारे રોગાધિકારમાં रोगाधिकारमें, मया મેં मैंने, प्रमेहिणाम् પ્રમેહના રોગીઓની प्रमेहियोंकी, याः જે जो, पृथक् एव જુદી જ अलग ही, सप्त સાત सात, पिडकाः પિડકાઓ पिडकायें, उक्ताः કહી છે कही हैं, ताः તેની उनकी, कुशलैः કુશળ कुशल, शल्यविद्भिः શલ્યતન્ત્રના જાણનારાઓએ शल्यतंत्रज्ञों, शस्त्रेण શસ્ત્રથી शस्त्रसे, संशोधन- સંશોધનથી संशोधनसे, रोपणैः च અને રોપણથી और रोपणसे, चिकित्स्याः ચિકિત્સા કરવી જોઈએ चिकित्सा करनी चाहिए ॥ ५८ ॥

58. The seven inflammatory conditions described by me separately in the chapter on nomenclature of diseases (1-17) are to be treated by expert surgeons by operative, antiseptic, cleansing and healing procedures.

५८. प्रमेहिणां–प्रमेहिणः

अध्यायोक्तार्थसंग्रहः —

तत्र श्लोकाः—

हेतुर्दोषो दूष्यं मेहानां साध्यता न रूपं च ।
मेही द्विविधस्त्रिविधं भिषग्जितमतिक्षपणदोषः ॥५९॥
आद्या यवान्नविकृतिर्मन्था मेहापहाः कषायाश्च ।
तैलघृतलेहयोगा भक्ष्याः प्रवरासवाः सिद्धाः ॥६०॥
व्यायामविधिर्विविधः स्नानान्युद्वर्तनानि गन्धाश्च ।
मेहानां प्रशमार्थं चिकित्सिते दिष्टमेतावत् ॥६१॥

तत्र તે વિષયમાં उस विषयमें, श्लोकाः ઉપસંહારના શ્લોકો છે કે उपसंहारके श्लोक हैं कि, मेहानाम् પ્રમેહોના प्रमेहोंके, हेतुः નિદાન निदान, दोषः દોષ दोष, दूष्यम् દૂષ્ય दूष्य, साध्यता न रूपम् च સાધ્યતા, અસાધ્યતા તથા લક્ષણ साध्यता, असाध्यता तथा लक्षण, द्विविधः બે પ્રકારનો दो प्रकारका, मेही પ્રમેહી प्रमेही, त्रिविधम् ત્રણ પ્રકારનું तीन प्रकारका, भिषग्जितम् ઔષધ औषध, अतिक्षपणदोषः અતિ કર્ષણનો દોષ अति कर्षणका दोष, आद्याः જમવાના भक्षणीय, यवान्नविकृतिः જવના પદાર્થો जौके विकार, मन्थाः મન્થ मन्थ, मेहापहाः મેહને દૂર કરનારા मेहनाशक, कषायाः च કષાયો कषाय, तैल- તેલ तैल, घृत- ઘૃત घृत, लेह- તથા અવલેહના तथा लेहके, योगाः યોગો योग, भक्ष्याः બીજા ભક્ષ્ય પદાર્થો अन्य भक्ष्य पदार्थों, सिद्धाः સિદ્ધ निश्चितफलदायक, प्रवराः ઉત્તમ श्रेष्ठ, आसवाः આસવો आसव, विविधः અનેક પ્રકારની विविध प्रकारकी, व्यायामविधिः વ્યાયામની વિધિ व्यायामकी विधि, स्नानानि સ્નાન स्नान, उद्वर्तनानि

५९. साध्यता न रूपं च–साध्यतामरूपंच (ध.)
,, द्विविधस्त्रिविधं–द्विविधो द्विविधं (ध. फ.)
,, अतिक्षपणदोषः – तल्लक्षणं च (ह. द.)
,, ,, – लक्षणं तस्य (त.)
६१. दिष्टमेतावत्–दृष्टमेतावत् (क. ध.)

ઉદ્વર્તન उद्वर्तन, गन्धाः च અને ગંધદ્રવ્યોનું અનુલેપન और गन्धद्रव्योंका अनुलेपन, एतावत् આટલું इतना, મેહાનાઞ્ પ્રમેહની प्रमेहोंके, प्रशमार्थम् શાંતિ માટે प्रशमनके लिए, चिकित्सिते આ પ્રમેહ-ચિકિત્સિત અધ્યાયમાં इस प्रमेहचिकित्सित अध्यायमें दिष्टम् કહ્યું છે कहा है ॥ ५९-६१ ॥

Here are the recapitulatory verses—

59-61. The causes, the morbid humor, the susceptible body-elements in urinary disorders, their curability, the resemblances of urine, the two types of patients, the three modes of treatment, the disadvantages of over-depletion, the eatables prepared of barley, the demulcent drinks, decoctions curative of urinary disorders, oils, ghees and linctures, articles of diet, the most effective medicated wines, the various courses of exercise, baths, massages, fragrant applications —all these are described for the cure of urinary disorders in the chapter on 'Therapeutics of Urinary Disorders.'

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते चिकित्सास्थाने प्रमेहचिकित्सितं नाम षष्ठोऽध्यायः ॥ ६ ॥

इति આ પ્રમાણે इस प्रकार, अग्निवेशकृते અગ્નિવેશે રચેલા अग्निवेशसे बनाये, चरकप्रतिसंस्कृते तन्त्रे અને ચરકથી પ્રતિસંસ્કાર પામેલા આ શાસ્ત્રમાં और चरकके द्वारा संस्कृत इस शास्त्रके, चिकित्सास्थाने ચિકિત્સાસ્થાન વિષે चिकित्सास्थानमें, प्रमेहचिकित्सितम् 'પ્રમેહચિકિત્સિત' 'प्रमेहचिकित्सित', नाम નામનો नामका, षष्ठः છઠ્ઠો छट्टा, अध्यायः અધ્યાય સંપૂર્ણ થયો अध्याय समाप्त हुआ ॥ ६ ॥

6. Thus in the Section on Therapeutics in the treatise compiled by Agnivesa and revised by Caraka the sixth chapter entitled 'The therapeutics of the anomalies of the urinary secretion' is completed.

सप्तमोऽध्यायः ।

સાતમો અધ્યાય　अध्याय सातवाँ

Chapter VII

कुष्ठचिकित्सितोपक्रमः—

अथातः कुष्ठचिकित्सितं व्याख्यास्यामः ॥१॥

इति ह स्माह भगवानात्रेयः ॥२॥

अथ अतः હવે અહીંથી अब आगे, कुष्ठचिकित्सितम् 'કુષ્ઠચિકિત્સિત' નામના અધ્યાયનું 'कुष्ठचिकित्सित' नामके अध्यायका, व्याख्यास्यामः વ્યાખ્યાન કરશું व्याख्यान करेंगे ॥ १ ॥

भगवान् ભગવાન भगवान, आत्रेयः આત્રેયે आत्रेयने, इति ह આ વિષયમાં નીચે પ્રમાણે જ इस विषयमें निम्न प्रकारसे ही, आह स्म કહેલું છે कहा है ॥२॥

1. We shall now expound the chapter entitled "The therapeutics of Dermatosis".

2. Thus declared the worshipful Atreya.

हेतुं द्रव्यं लिङ्गं कुष्ठानामाश्रयं प्रशमनं च ।
शृण्वग्निवेश ! सम्यग्विशेषतः स्पर्शनघ्नानाम् ॥३॥

अग्निवेश હે અગ્નિવેશ ! हे अग्निवेश ! विशेषतः વિશેષે કરીને विशेषतः स्पर्शनघ्नानाम् ત્વચાનો નાશ કરનારા त्वचाको नष्ट करनेवाले, कुष्ठानाम् કુષ્ઠોના कुष्ठोंके. हेतुम् કારણ हेतु लिङ्गम् લક્ષણ लक्षण, द्रव्यम् દ્રવ્ય द्रव्य, आश्रयम् આધાર आधार. प्रशमनम् च તથા પ્રશમન और प्रशमन सम्यक् સારી રીતે अच्छी तरहसे, शृणु સાંભળો सुनो ॥ ३ ॥

3. O Agnivesa, listen attentively to an exposition of the causes, the

३. हेतुं द्रव्यं लिङ्गं-हेतुं लिङ्गं विविध (ख. ग.)
„　　„　-हेतुमिर्विविधं (घ)

susceptible body-elements, the symptoms, predominant morbid humors, the resorts and treatment of dermatosis with special reference to conditions where the skin is destroyed.

कुष्ठानां निदानम्—

विरोधीन्यन्नपानानि द्रवस्निग्धगुरूणि च ।
भजतामागतां छर्दिं वेगांश्चान्यान्प्रतिघ्नताम् ॥४॥
व्यायाममतिसंतापमतिभुक्त्वोपसेविनाम् ।
शीतोष्णलङ्घनाहारान् क्रमं मुक्त्वा निषेविणाम् ॥५॥
घर्मश्रमभयार्तानां द्रुतं शीताम्बुसेविनाम्
अजीर्णाध्यशिनां चैव पञ्चकर्मापचारिणाम् ॥६॥
नवान्नदधिमत्स्यातिलवणाम्लनिषेविणाम् ।
माषमूलकपिष्टान्नतिलक्षीरगुडाशिनाम् ॥७॥
व्यवायं चाप्यजीर्णेऽन्ने निद्रां च भजतां दिवा ।
विप्रान् गुरून् घर्षयतां पापं कर्म च कुर्वताम् ॥८॥
वातादयस्त्रयो दुष्टास्त्वग्रक्तं मांसमम्बु च ।
दूषयन्ति स कुष्ठानां सप्तको द्रव्यसंग्रहः ॥९॥
अतः कुष्ठानि जायन्ते सप्त चैकादशैव च ।
न चैकदोषजं किञ्चित् कुष्ठं समुपलभ्यते ॥१०॥

विरोधीनि વિરોધી विरुद्ध, द्रव- દ્રવ द्रव, स्निग्ध- સ્નિગ્ધ स्निग्ध, गुरूणि च અને ગુરુ और गुरु, अन्नपानानि અન્નપાનનું अन्नपानको, भजताम् સેવન કરનારાઓના सेवन करनेवालोंके, आगताम् આવવા માટે તૈયાર થયેલી उपस्थित छर्दिम् ઉલટી वमन, अन्यान् તથા બીજા तथा अन्य, वेगान् च વેગોને वेगोंको, प्रतिघ्नताम् રોકનારાઓના रोकनेवालोंके, अतिभुक्त्वा અધિક ભોજન કરીને अति भोजन कर, व्यायामम् વ્યાયામ व्यायाम, अतिसंतापम् તથા અતિ સંતાપનું तथा अत्यन्त संतापका, उपसेविनाम् સેવન કરનારાઓના सेवन करनेवालोंके, क्रमम् ક્રમનો क्रमको, मुक्त्वा ત્યાગ કરીને छोड़ कर, शीत- શીત शीत, उष्ण- ઉષ્ણ उष्ण, लङ्घन- લંઘન लङ्घन, आहारान् તથા આહારનું और आहारको, निषेविणाम् સેવન કરનારાઓના सेवन करनेवालोंके, घर्म- ગરમી धूप, श्रम- શ્રમ श्रम, भय- તથા ભયથી और भयसे, आर्तानाम् પીડિત હોઈને पीडित हो कर, द्रुतम् તુરત तुरन्त, शीत- શીતલ शीतल, अम्बु- જળનું जल, सेविनाम् સેવન કરનારાઓના सेवन करनेवालोंके, अजीर्ण- अध्यशिनाम् અજીર્ણ પર ભક્ષણ કરનારાઓના अजीर्ण होने पर भोजन करने वालोंके, पञ्चकर्म-अपचारिणाम् च एव પંચકર્મનો યથાવિધિ પ્રયોગ નહિ કરનારાઓના पंचकर्मका यथाविधि प्रयोग नहीं करनेवालोंके, नव- નવાં नये, अन्न- ધાન્ય अन्न, दधि- દહીં दही, मत्स्य- માછલાં मत्स्य, अतिलवण- અતિ ખારા अत्यन्त लवण, अम्ल- તથા અતિ ખાટા પદાર્થોનું तथा अत्यन्त अम्ल पदार्थोंको, निषेविणाम् સેવન કરનારાઓના सेवन करनेवालोंके, माष- અડદ उड़द, मूलक- મૂળા मूली, पिष्टान्न- પિષ્ટાન્ન पिष्टान्न, तिल- તલ तिल, क्षीर- દૂધ दूध, गुड- અને ગોળનું और गुड़को, अशिनाम् અતિ ભક્ષણ કરનારાઓના अत्यन्त खानेवालोंके, अन्ने અન્નનું अन्नके, अजीर्णे च अपि પાચન ન થયું હોય તોપણ अजीर्ण होने पर भी, व्यवायम् મૈથુન કરનારાઓના मैथुन करनेवालोंके, दिवा તથા દિવસની तथा दिनमें, निद्राम् च નિદ્રા निद्राको, भजताम् કરનારાઓના सेवन करनेवालोंके, विप्रान् બ્રાહ્મણોનું विप्र, गुरून् અને વડિલોનું और गुरुजनोंका, घर्षयताम् અપમાન કરનારાઓના अपमान करनेवालोंके, पापम् તથા પાપ तथा पाप, कर्म च કર્મનું कर्म, कुर्वताम् આચરણ કરનારાઓના करनेवालोंके, वातादयः વાતાદિ वातादि, त्रयः ત્રણે દોષો तीनों दोष, दुष्टाः દૂષિત થઈ दूषित होकर, रक्तम् રક્ત रक्त, मांसम् માંસ मांस, अम्बु च અને જલને और जलको, दूषयन्ति દૂષિત કરે છે दूषित करते हैं, सः તે वह, कुष्ठानाम् કુષ્ઠોના कुष्ठोंके, सप्तकः द्रव्य- संग्रहः સાત દ્રવ્યોના સમુદાયનો સંગ્રહ છે सात द्रव्योंके समुदायका संग्रह हैं, अतः એનાથી इनसे, सप्त च સાત सात, एकादश एव च તથા અગિયાર ग्यारह, कुष्ठानि કુષ્ઠો कुष्ठ, जायन्ते ઉત્પન્ન

५. अतिभुक्त्वोपसेविनाम्—अतिभुक्त्वा निषेविणाम् (क.ख.ग.च.)
७. पिष्टान्न—निष्टान्न (ग.)
८. पापं कर्म च कुर्वताम्—पापं वा कर्म कुर्वताम् (ग.)
१०. अतः—ततः (ग.)

थाय छे उत्पन्न होते हैं, किञ्चित् च કોઈ પણ कोई भी, कुष्ठम् કુષ્ઠ कुष्ठ, एकदोषजम् એક દોષથી ઉત્પન્ન થયેલ एकदोषज, न समुपलभ्यते જણાતો નથી नहीं मिलता॥४-१०॥

4-10. The constant use of mutually incompatible eats and drinks or liquid, unctuous and heavy articles of diet, the suppression of the generated urge for vomiting or other calls of nature, indulgence in exercise or exposure to heat after a surfeit-meal, irregular indulgence in cold or hot food or fasting or over-eating, using of cold water suddenly after being afflicted with heat, fatigue or fear, indulgence in pre-digestion meals, wrongful administration of the five purificatory procedures, habitual use of new grain, curds, or fish, excessive use of salt, or acid articles or of black- gram, raddish, pasted articles, til, milk and gur, sex-act, before the ingested food is digested, day sleep, the persecution of wise men and elders and the committing of sinful acts—by these factors all the three humors—vata, pitta and kapha, which have become morbid, vitiate the skin, blood, flesh and the body-fluid. This is the complex of the seven body-elements affected in dermatosis. As a result of such affection, eighteen types of dermatoses are produced. Dermatosis is never the result of the discordance of only a single humor.

कुष्ठानां पूर्वरूपम्—

स्पर्शाज्ञत्वमतिस्वेदो न वा वैवर्ण्यमुन्नतिः।

११. स्पर्शाज्ञत्वमतिस्वेदो–स्पर्शाऽन्यथात्वं स्वेदोऽति (च. पा.)

कोठानां लोमहर्षश्च कण्डूस्तोदः श्रमः क्लमः ॥११॥
व्रणानामधिकं शूलं शीघ्रोत्पत्तिश्चिरस्थितिः।
दाहः सुप्ताङ्गता चेति कुष्ठलक्षणमग्रजम् ॥१२॥

स्पर्शाज्ञत्वम् સ્પર્શનું જ્ઞાન ન થવું स्पर्शज्ञानका न होना, अतिस्वेदः અધિક પરસેવો अत्यंत स्वेद, न वा અથવા પરસેવાનો અભાવ या स्वेदका अभाव, वैवर्ण्यम् રંગ બદલાવો वैवर्ण्य, कोठानाम् કોઠ कोठोंका, उन्नतिः ઉપડી આવવાં उभर आना, लोमहर्षः રુંવાડાં ઊભાં થવાં रोमहर्ष, कण्डूः ખજવાળ खुजली, तोदः પીડા तोद, श्रमः શ્રમ श्रम, क्लमः ક્લમ क्लम, व्रणानाम् વ્રણોમાં व्रणोमें, अधिकम् અધિક अधिक, शूलम् શૂલ शूल, शीघ्रोत्पत्तिः જલદી વ્રણ થઈ આવવાં व्रणोंकी शीघ्र उत्पत्ति, चिरस्थितिः તથા લાંબો વખત રહેવાં और चिरकाल पर्यन्त स्थिति, दाहः બળતરા दाह, सुप्ताङ्गता च અને અંગોમાં સુપ્તિ तथा अंगोमें सुप्ति, इति એ ये, अग्रजम् कुष्ठलक्षणम् કુષ્ઠનાં પૂર્વરૂપ છે कुष्ठोंके पूर्वरूप हैं ॥ ११-१२ ॥

11-12. Anesthesia, hyperhidrosis, anhidrosis, discoloration, eruption of rashes, horripilation, pruritus, pricking pain, fatigue, exhaustion, excessive pain in, rapid formation and chronicity of ulcers, burning sensation, numbness in the limbs—these are the premonitory symptoms of dermatosis.

अष्टादश कुष्ठनामानि—

अत ऊर्ध्वमष्टादशानां कुष्ठानां कपालोदुम्बरमण्डलर्ष्यजिह्वपुण्डरीकसिध्मकाकणकैककुष्ठचर्माख्यकिटिमविपादिकालसकदद्रुचर्मदलपामाविस्फोटकशतारुर्विचर्चिकानां लक्षणान्युपदेक्ष्यामः ॥१३॥

अतः ऊर्ध्वम् હવે પછી अब आगे, कपाल- કપાલ कपाल, उदुम्बर- ઉદુંબર उदुम्बर, मण्डल- મંડલ

१२. दाहः सुप्ताङ्गता चेति–सुप्तत्वमङ्गे दाहश्च (च. ष.)
,, ,, –मूढसुप्ताङ्गता चेति (प.)
१३. चर्माख्य–चर्म (त.)

मण्डल, ऋष्यजिह्व- ઋષ્યજિહ્વ ऋष्यजिह्व, पुण्डरीक- પુંડરીક पुण्डरीक, सिध्म- સિધ્મ सिध्म, काकणक- કાકણક काकणक, एककुष्ठ એકકુષ્ઠ एककुष्ठ, चर्माख्य- ચર્માખ્ય चर्माख्य, किटिम- કિટિમ किटिम, विपादिका- વિપાદિકા विपादिका, अलसक- અલસક अलसक, दद्रु- દદ્રુ दद्रु, चर्मदल- ચર્મદલ चर्मदल, पामा- પામા पामा, विस्फोटक- વિસ્ફોટક विस्फोटक, शतारुः શતારુ शतारु, विचर्चिकानाम् અને વિચર્ચિકા और विचर्चिका, अष्टादशानाम् એ અઢાર इन अठारह, कुष्ठानाम् કુષ્ઠોનાં कुष्ठोंके, लक्षणानि લક્ષણોને लक्षणोंको, उपदेक्ष्यामः ઉપદેશ કરશું बतायेंगे ॥ १३ ॥

13. Hereafter, I shall describe the signs and symptoms of the eighteen kinds of dermatosis namely, Kapala, Udumbara, Mandala, Rishyajihva, Pundarika, Sidhma, Kakanaka, Ekakushtha, Charma, Kitima, Vipadika, Alasaka, Dadru, Charmadala, Pama, Visphotaka, Sataru and Vicharchika.

कपालकुष्ठस्य लक्षणम्—

कृष्णारुणकपालाभं यद्रूक्षं परुषं तनु ।
कापालं तोदबहुलं तत्कुष्ठं विषमं स्मृतम् ॥१४॥

यत् જે जो, कृष्णारुण- કાળા લાલ काले लाल, कपालाभम् ઠીબડા જેવો खपड़ेके जैसा, रूक्षम् રૂક્ષ रूक्ष, परुषम् કઠોર परुष, तनु પાતળો तनु, तोदबहुलम् બહુ પીડાવાળો तोदबहुल, विषमम् અને કષ્ટસાધ્ય હોય છે और कष्टसाध्य होता है, तत् कुष्ठम् તે કુષ્ઠ वह कुष्ठ, कपालम् કપાલકુષ્ઠ कापालकुष्ठ, स्मृतम् કહેવાય છે कहा जाता है ॥ १४ ॥

14. The dermatosis, which is dark-red in color like the broken piece of an earthen pot, which is dry, hard, thin, very painful and irregular in shape, is named the Kapala' dermatosis.

उदुम्बरकुष्ठस्य लक्षणम्—

दाहकण्डूरुजारागपरीतं लोमपिञ्जरम् ।
उदुम्बरफलाभासं कुष्ठमौदुम्बरं विदुः ॥१५॥

दाह- कण्डू- દાહ, ખજવાળ दाह, कण्डू, रुजा- પીડા रुजा, राग- તથા રંગથી तथा रंगसे, परीतम् યુક્ત युक्त, लोमपिञ्जरम् રૂંવાડાંથી પિંગળા વર્ણના रोमोंसे कपिलवर्ण, उदुम्बरफलाभासम् અને ઉમરડાના ફળ જેવા और गूलरके फलके तुल्य, कुष्ठम् કુષ્ઠને कुष्ठ, औदुम्बरम् ઔદુંબર औदुम्बर, विदुः માને છે मानते हैं ॥ १५ ॥

15. The dermatosis which is accompanied with burning, pruritus, pain and redness, which is covered with tawny hair and which resembles the gular fig in color is named the 'Udumbara' dermatosis.

मण्डलस्य लक्षणम् —

श्वेतं रक्तं स्थिरं स्त्यानं स्निग्धमुत्सन्नमण्डलम् ।
कृच्छ्रमन्योन्यसंसक्तं कुष्ठं मण्डलमुच्यते ॥१६॥

श्वेतम् શ્વેત सफेद, रक्तम् રક્ત लाल, स्थिरम् સ્થિર स्थिर, स्त्यानम् ઘાટો स्त्यान, स्निग्धम् સ્નિગ્ધ स्निग्ध, उत्सन्न- ઊપડી આવેલા उभरे हुए, मण्डलम् મંડળવાળો चकत्तोंवाला, कृच्छ्रम् કષ્ટસાધ્ય कष्टसाध्य, अन्योऽन्य- અને પરસ્પર एक दूसरेसे, संसक्तम् મળેલો संसक्त, कुष्ठम् કુષ્ઠ कुष्ठ, मण्डलम् મંડળકુષ્ઠ मण्डल-कुष्ठ, उच्यते કહેવાય છે कहा जाता है ॥ १६ ॥

16. The dermatosis which is whitish reddish, localised, piled up, glossy, elevated at the edges and overlaps one another, is named the 'Mandala' dermatosis and is formidable in nature.

१४. यद्रूक्षं–यदुष्णं (प.)
,, कापालं–कपालं (ब. झ.)

१५. दाहकण्डूरुजाराग–कण्डूविदाहरुग्राग (ख. ब. झ.)
,, विदुः – वदेत् (च. थ.)

ऋष्यजिह्वस्य लक्षणम्—

कर्कशं रक्तपर्यन्तमन्तःश्यावं सवेदनम् ।
यदृष्यजिह्वासंस्थानमृष्यजिह्वं तदुच्यते ॥१७॥

यत् જે जो, कर्कशम् કઠોર कर्कश, रक्तपर्यन्तम् લાલ છેડાવાળો लालरंगके किनारोंवाला, अन्तःश्यावम् મધ્યમાં કાળો बीचमें श्यावरंगका, सवेदनम् વેદનાવાળો वेदनायुक्त, ऋष्य-जिह्वा-संस्थानम् ઋષ્ય હરિણની જીભના જેવા આકારવાળો હોય ऋष्यकी जीभके आकारवाला हो, तत् ते वह, ऋष्यजिह्वम् ઋષ્યજિહ્વ ऋष्यजिह्व, उच्यते કહેવાય છે कहाता है ॥ १७ ॥

17. The dermatosis which is hard, red in the margins and dark in the centre, painful and has resemblance in form to the tongue of a musk-deer, is named the 'Rishyajihva' dermatosis.

पुण्डरीकस्य लक्षणम्—

सश्वेतं रक्तपर्यन्तं पुण्डरीकदलोपमम् ।
सोत्सेधं च सदाहं च पुण्डरीकं तदुच्यते ॥१८॥

यत् જે जो, सश्वेतम् શ્વેત श्वेत, रक्तपर्यन्तम् तथा લાલ છેડાવાળો तथा लाल किनारेवाला, पुण्डरीक-दलोपमम् કમળની પાંખડી જેવો पुण्डरीकके पत्रके समान, सोत्सेधम् च ઊંચાઈવાળો उत्सेधयुक्त, सदाहम् च અને દાહયુક્ત હોય और दाहयुक्त हो, तत् ते वह, पुण्डरीकम् પુંડરીક पुण्डरीक, उच्यते કહેવાય છે कहाता है ॥ १८ ॥

18. The dermatosis which is whitish, with red margins, which resembles the petal of a white lotus, which is elevated and accompanied with burning, is named the 'Pundarika' dermatosis.

सिध्मस्य लक्षणम्—

श्वेतं ताम्रं तनु च यद्रजो घृष्टं विमुञ्चति ।
अलाबूपुष्पवर्णं तत् सिध्मं प्रायेण चोरसि ॥१९॥

यत् જે जो, श्वेतम् શ્વેત श्वेत, ताम्रम् રક્ત लाल, तनु तथा પાતળો तथा पतला है, घृष्टम् च ઘસવાથી मलने पर, रजः રજ रज, विमुञ्चति ખેરે છે गिरता है, अलाबू-पुष्पवर्णम् કડવી તુંબડીના પુષ્પ સમાન રંગવાળો છે तितलौकीके पुष्पके समान रंगवाला है, प्रायेण અને ઘણું ખરું और प्रायः, उरसि च છાતી ઉપર થાય છે छाती पर होता है, तत् ते वह, सिध्मम् સિધ્મ કુષ્ઠ કહેવાય છે सिध्मकुष्ठ कहाता है ॥ १९ ॥

19. The dermatosis which is white or coppery, thin, which gives out fine dust when rubbed, which is of the color of the flower of the bottle gourd and which generally makes its appearance on the chest is named the 'Sidhma' dermatosis.

काकणस्य लक्षणम्—

यत् काकणन्तिकावर्णमपाकं तीव्रवेदनम् ।
त्रिदोषलिङ्गं तत् कुष्ठं काकणं नैव सिध्यति ॥२०॥

इति सप्तमहाकुष्ठानि ।

यत् જે जो, काकणन्तिका- ચણોઠીના જેવા रतिके समान, वर्णम् રંગવાળો रंगवाला, अपाकम् પાક રહિત न पकनेवाला, तीव्रवेदनम् તીવ્ર વેદનાવાળો तीव्र वेदनावाला, त्रिदोषलिङ्गम् અને ત્રણે દોષના લક્ષણોવાળો और तीनों दोषोंके लक्षणोंवाला है, तत् ते वह, काकणम् कुष्ठम् કાકણક કુષ્ઠ કહેવાય છે काकणक कुष्ठ कहाता है, न सिध्यति एव તે મટતોજ નથી वह ठीक होताही नहीं ॥ २० ॥ इति આ યે, सप्त- સાત सात, महाकुष्ठानि મહાકુષ્ઠ છે महाकुष्ठ हैं ।

१७. ऋष्यजिह्वं—ऋक्षजिह्वं (ध.)

१८. सदाहं—सरागं (क. ध. च. छं. द. प.)

,, तदुच्यते—प्रचक्षते (क. च.)

१९. यद्रजो घृष्टं विमुञ्चति—यद् घृष्टमुद्गिरते रजः (च. ध.)

,, अलाबूपुष्पवर्णं तत्—अलाबुपुष्पवर्णाभम् (ध.)

२०. अपाकं—सपाकं (प.)

20. The dermatosis which resembles in color the jequirity seed, which is not suppurating or acutely painful, and which displays the full developed symptoms of tridiscordance is named the 'Kakana' dermatosis. It is incurable. Thus have been described the seven major varieties of dermatosis.

एककुष्ठस्य लक्षणम्, चर्मकुष्ठस्य लक्षणम्—

अस्वेदनं महावास्तु यन्मत्स्यशकलोपमम् ।
तदेककुष्ठं, चर्माख्यं बहलं हस्तिचर्मवत् ॥२१॥

यत् अस्वेदनम् જે પરસેવા વિનાનો जो स्वेद-रहित, महावास्तु ઘણા પ્રદેશમાં રહેલો बहुत प्रदेशमें व्यापनेवाला, मत्स्यशकलोपमम् તથા માછલીના ભીંગડા જેવો હોય तथा मत्स्यके छिलकेके समान है, तत् તે वह, एककुष्ठम् એકકુષ્ઠ કહેવાય છે एककुष्ठ कहाता है, यत् च અને જે વળી और जो, बहलम् જાડો છે मोटा है, हस्तिचर्मवत् તથા હાથીની ચામડી જેવો હોય तथा हाथीके चमड़ीके समान है, तत् તે वह, चर्माख्यम् ચર્મકુષ્ઠ કહેવાય છે चर्मकुष्ठ कहाता है ॥ २१ ॥

21. That is named the 'Ekakushtha' dermatosis, which does not sweat, which is extensive in size and which resembles in form the scale of the fish. That is 'Charma-kushtha' dermatosis where the skin is thick like the elephant's skin.

किटिमस्य लक्षणम्, विपादिकाया लक्षणम्—

श्यावं किणखरस्पर्शं परुषं किटिमं स्मृतम् ।
वैपादिकं पाणिपादस्फुटनं तीव्रवेदनम् ॥२२॥

(यत् જે जो,) श्यावम् કાળો श्याव रंगवाला किणखरस्पर्शम् ચાઠાના જેવા ખરબચડા સ્પર્શવાળો किणके सदृश खरदरा स्पर्शवाला, परुषम् તથા કઠિન છે तथा परुष है, (तत् તે वह,) किटिमम् કિટિમકુષ્ઠ किटिमकुष्ठ, स्मृतम् કહેવાય છે कहाता है, तीव्रवेदनम् તીવ્રવેદનાયુક્ત तीव्रवेदनायुक्त, पाणिपादस्फुटनम् હાથ-પગનું ફાટવું हाथपैरोंका फूटना, वैपादिकम् વૈપાદિકકુષ્ઠ કહેવાય છે वैपादिककुष्ठ कहाता है ॥ २२ ॥

22. That is named the 'Kitima' dermatosis which is dark in color, rough to the touch like a scar and hard. That is known as the 'Vipadika' dermatosis where there are fissures in hands and feet attended with acute pain.

अलसकस्य लक्षणम्, दद्रोर्लक्षणम्—

कण्डूमद्भिः सरागैश्च गण्डैरलसकं चितम् ।
सकण्डूरागपिडकं दद्रुमण्डलमुद्गतम् ॥२३॥

सरागैः च જે રંગવાળા जो रक्तिमा लिये हुए कण्डूमद्भिः અને ખજવાળવાળા और कंडूयुक्त, गण्डैः च ફોડકાઓથી गण्डोंसे, चितम् વ્યાપ્ત હોય છે व्याप्त होता है, अलसकम् તે અલસકકુષ્ઠ કહેવાય છે वह अलसककुष्ठ कहाता है, सकण्डू-राग-पिडकम् ખજવાળ, રંગ અને ફોડકીવાળો कंडू, लाली और पिड़काओंवाला, उद्गतम् ઉપડી આવેલ उभरा हुआ, मण्डलम् મંડળ मण्डल, दद्रुः દદ્રુકુષ્ઠ કહેવાય છે दद्रुकुष्ठ कहाता है ॥ २३ ॥

23. That is known as the 'Alasaka' dermatosis which is full of itching and red papules. That is known as the 'Dadru' dermatosis which is accompanied with itching, redness and pimples. It is circular in shape and elevated.

२२. किटिमम्—किटिभम् (ध.)
,, पाणिपादस्फुटनम्—करे पादे स्फोटनम् (ख. त.)

२३. चितम्—स्मृतम् (ख.)

चर्मदलस्य लक्षणम्—

रक्तं सकण्डु सस्फोटं सरुग्दलति चापि यत् ।
तच्चर्मदलमाख्यातं संस्पर्शासहमुच्यते ॥२४॥

यत् च અને જે और जो, सकण्डु ખજવાળયુક્ત कण्डूयुक्त, सस्फोटम् ફોડકાયુક્ત स्फोटयुक्त, सरुक् પીડાવાળું रुजायुक्त, रक्तम् તથા લાલ હોય છે તથા लाल होता है, दलति अपि અને ચીરાઈ જાય છે और विदीर्ण हो जाता है, तत् चर्मदलम् તે ચર્મદલકુષ્ઠ वह चर्मदल कुष्ठ आख्यातम् કહેવાય છે कहाता है, संस्पर्शासहम् તે સ્પર્શ સહન ન કરી શકે એવો वह स्पर्शासह, उच्यते કહેવાય છે कहा जाता है ॥२४॥

24. That is known as the 'Charmadala' dermatosis which is red, itching, attended with eruption, painful and which breaks open and is tender to touch.

पामाया लक्षणम्, विस्फोटकानां लक्षणम्—

पामा श्वेतारुणश्यावाः कण्डूलाः पिडका भृशम् ।
स्फोटाः श्वेतारुणाभासो विस्फोटाः स्युस्तनुत्वचः ॥२५॥

भृशम् ઘણી खूब, कण्डूलाः ખજવાળવાળી खुजलीसे युक्त, श्वेतारुणश्यावाः શ્વેત, રક્ત અને શ્યામ श्वेत, लाल और नीली, पिडकाः ફોડલીઓ पिडकायें, पामाः પામાકુષ્ઠ કહેવાય છે पामाकुष्ठ कहाती हैं, श्वेतारुणाभासः શ્વેત તથા રક્ત રંગના श्वेत तथा लाल रंगवाले, तनुत्वचः અને પાતળી ચામડીવાળા पतली त्वचावाले, स्फोटाः ફોડકાઓ स्फोट, विस्फोटाः વિસ્ફોટકુષ્ઠ विस्फोटकुष्ठ, स्युः કહેવાય છે कहाते हैं ॥ २५ ॥

25. That is known as the 'Pama' dermatosis which has whitish, dark and red papules with severe itching. That is known as the 'Visphota' dermatosis, which has white and red papules and thin skin.

शतारुषो लक्षणम्, विचर्चिकाया लक्षणम्—

रक्तं श्यावं सदाहार्ति शतारुः स्याद्बहुव्रणम् ।
सकण्डूः पिडका श्यावा बहुस्रावा विचर्चिका ॥
इत्येकादश क्षुद्रकुष्ठानि ॥२६॥

रक्तम् श्यावम् જે લાલ કાળો जो लाल श्याम रंगवाला, सदाहार्ति બળતરા તથા પીડાવાળો दाह तथा पीड़ायुक्त, बहुव्रणम् અને ઘણા વ્રણવાળો और बहुत व्रणोंवाला, स्यात् હોય છે होता है, शतारुः તે શતારુકુષ્ઠ કહેવાય છે वह शतारु-कुष्ठ कहाता है, सकण्डूः ખજવાળવાળી कंडूयुक्त, श्यावा શ્યામ श्याम, बहुस्रावा અને બહુ સ્રાવવાળી और बहुत स्राववाली, पिडका પિડકા पिडका, विचर्चिका વિચર્ચિકા કુષ્ઠ કહેવાય છે विचर्चिका कुष्ठ कहाती है, इति આ ये, एकादश અગિયાર ग्यारह, क्षुद्रकुष्ठानि ક્ષુદ્રકુષ્ઠ क्षुद्रकुष्ठ हैं ॥ २६ ॥

26. This is known as the 'Sataru' dermatosis which is red and dark, which causes burning-pain and has many fissures. 'Vicharchika' dermatosis is that which has itching eruptions, which is dark and has profuse discharge. Thus have been described the eleven minor varieties of dermatosis.

दोषाधिक्यवशात् कुष्ठविशेषोत्पत्तिः—

वातेऽधिकतरे कुष्ठं कापालं मण्डलं कफे ।
पित्ते त्वौदुम्बरं विद्यात् काकणं तु त्रिदोषजम् ॥२७॥

वाते अधिकतरे વાત અત્યંત અધિક થતાં वातके अत्यन्त अधिक होने पर, कापालम् कुष्ठम् કપાલકુષ્ઠ થાય છે कपालकुष्ठ होता है, कफे કફ અત્યંત અધિક થતાં कफके अत्यन्त अधिक होने पर, मण्डलम् મંડલકુષ્ઠ થાય છે मंडलकुष्ठ होता है, पित्ते तु અને પિત્ત અત્યન્ત અધિક થતાં पित्तके अत्यन्त अधिक होने पर,

२४. रक्तं सकण्डु सस्फोटं सरुग्दलति चापि यत्—रक्तं सशूलं कण्डूमत् सस्फोटं यद् दलत्यपि (च. ध.)
,, चापि यत् —चाप्यथः (ध.)
२५. स्फोटाः श्वेतारुणाभासो—श्वेताः श्यावारुणाभासा (ख. व. ड. म.)
,, ,, —श्वेताः श्यावारुणाभासः (ग. प.)

औदुम्बरम् ઔદુમ્બર કુષ્ઠ થાય છે औदुम्बर कुष्ठ होता है, त्रिदोषजम् तु તેમજ જે ત્રણે દોષથી ઉત્પન્ન થાય છે; एवं जो तीनों दोषोंसे उत्पन्न होता है, काकणम् તે કાકણક કુષ્ઠ છે वह काकणक कुष्ठ है, विद्यात् એમ જાણવું ऐसा समझे ॥ २७ ॥

27. If the provocation of vata is in preponderance, there occurs 'Kapala' dermatosis; if kapha, there results 'Mandala' dermatosis; if pitta, then 'Udumbara' dermatosis; and if all three are equally provoked, then there occurs 'Kakana' dermatosis.

वातपित्ते श्लेष्मपित्ते वातश्लेष्मणि चाधिके ।
ऋष्यजिह्वं पुण्डरीकं सिध्मकुष्ठं च जायते ॥२८॥

वातपित्ते વાતપિત્ત वातपित्तके, अधिके અધિક હોતાં अधिक होने पर, ऋष्यजिह्वम् ઋષ્યજિહ્વકુષ્ઠ ऋष्यजिह्वकुष्ठ, श्लेष्मपित्ते કફપિત્ત અધિક હોતાં कफपित्त अधिक होने पर, पुण्डरीकम् પુંડરીકકુષ્ઠ पुण्डरीककुष्ठ, वातश्लेष्मणि च અને વાતકફ અધિક હોતાં और वातकफके अधिक होने पर, सिध्मकुष्ठम् च સિધ્મકુષ્ઠ सिध्मकुष्ठ, जायते ઉત્પન્ન થાય છે उत्पन्न होता है ॥ २८ ॥

28. In bi-predominance of vata-cum-pitta, kapha-cum-pitta and vat-cum-kapha, there occurs 'Rishya-jihva', 'Pundarika' and 'Sidhma' dermatosis respectively.

चर्माख्यमेककुष्ठं च किटिमं सविपादिकम् ।
कुष्ठं चालसकं ज्ञेयं प्रायो वातकफाधिकम् ॥२९॥

चर्माख्यम् ચર્મકુષ્ઠ चर्मकुष्ठ, एककुष्ठम् એક કુષ્ઠ एककुष्ठ, सविपादिकम् વિપાદિકાકુષ્ઠસહિત विपादिका-कुष्ठसहित, किटिमम् च કિટિમકુષ્ઠ किटिमकुष्ठ, अल-सकम् कुष्ठम् च અને અલસકકુષ્ઠને और अलसक कुष्ठको, प्रायः ઘણું ખરું प्रायः, वातकफाधिकम् વાતકફની અધિકતાવાળા वातकफकी अधिकतावाले, ज्ञेयम् જાણવા जाने ॥ २९ ॥

29. The 'charma' 'ekakustha' 'kitima', 'vipadika' and 'alasaka' are resulting from the preponderance of vata- cum- kapha.

पामा शतारुर्विस्फोटं दद्रूश्चर्मदलं तथा ।
पित्तश्लेष्माधिकं प्रायः कफप्राया विचर्चिका ॥३०॥

पामा પામાકુષ્ઠ पामाकुष्ठ, शतारुः શતારુકુષ્ઠ शतारुकुष्ठ, विस्फोटम् વિસ્ફોટકકુષ્ઠ विस्फोटककुष्ठ, दद्रुः દદ્રુકુષ્ઠ दद्रुकुष्ठ, तथा તથા तथा, चर्मदलम् ચર્મદલકુષ્ઠ चर्मदलकुष्ठ, प्रायः ઘણું ખરું प्रायः, पित्तश्लेष्माधिकम् પિત્તકફની અધિકતાવાળા હોય છે पित्तकफकी अधिकतावाले होते हैं, विचर्चिका અને વિચર્ચિકાકુષ્ઠ और विचर्चिकाकुष्ठ, कफप्राया કફની અધિકતાવાળો હોય છે कफकी अधिकतावाला होता है ॥ ३० ॥

30. In Pama, Sataru, Visphota, Dadru and Charmadala, there is mostly preponderance of pitta-cum-kapha and in Vicharchika, there is preponderance of kapha.

दोषाधिक्यमवेक्ष्य कुष्ठचिकित्सा कार्या—

सर्वं त्रिदोषजं कुष्ठं दोषाणां तु बलाबलम् ।
यथास्वैर्लक्षणैर्बुद्ध्वा कुष्ठानां क्रियते क्रिया ॥३१॥

सर्वम् સઘળા सब, कुष्ठम् કુષ્ઠો कुष्ठ, त्रिदोषजम् ત્રણે દોષથી ઉત્પન્ન થયેલા હોય છે त्रिदोषज हैं, यथास्वैः પોતપોતાના अपने अपने, लक्षणैः લક્ષણોથી लक्षणोंसे, दोषाणाम् દોષોનું दोषोंका, बलाबलम् બલાબલ बलाबल, बुद्ध्वा જાણીને समझ कर, कुष्ठानाम् કુષ્ઠોની कुष्ठोंकी, क्रिया ચિકિત્સા चिकित्सा, क्रियते કરાય છે की जाती है ॥ ३१ ॥

३० विस्फोटं-विस्फोटा (क. छ.)
,, पामा शतारुर्विस्फोटं दद्रुश्चर्मदलं तथा- दद्रुश्चर्मदलं पामा विस्फोटाश्च शतारुषः (ख. ङ.)

31. All the varieties of dermatosis result from discordance of all the three humors. Hence the time of treatment should be decided after determining the varying degree of morbidity of each humor by its specific characteristics.

दोषस्य यस्य पश्येत् कुष्ठेषु विशेषलिङ्गमुद्रिक्तम् ।
तस्यैव शमं कुर्यात्ततः परं चानुबन्धस्य ॥३२॥

कुष्ठेषु કુષ્ઠોમાં कुष्ठोंमें, यस्य જે जिस, दोषस्य દોષનું दोषका, उद्रिक्तम् વધી ગયેલું बढ़ा हुआ, विशेषलिङ्गम् વિશેષ લક્ષણ विशेष लक्षण, पश्येत् જણાય देखे, तस्य एव તેનું જ उसीका, शमम् શમન शमन, कुर्यात् કરવું करे, ततः परम् च અને તે પછી और उसके बाद, अनुबन्धस्य અનુબદ્ધ દોષનું શમન કરવું अनुबद्ध दोषका शमन करे ॥ ३२ ॥

32. The particular humor whose characteristic symptoms have become predominant should be first alleviated and the treatment of the other subordinate humor should be undertaken afterwards.

दोषकुष्ठयोः परस्परबोधकत्वम्—

कुष्ठविशेषैर्दोषा दोषविशेषैः पुनश्च कुष्ठानि ।
ज्ञायन्ते तैर्हेतुर्हेतुस्तांश्च प्रकाशयति ॥३३॥

कुष्ठविशेषैः ભિન્ન ભિન્ન કુષ્ઠોથી भिन्न भिन्न कुष्ठोंसे, दोषाः દોષો दोषों, दोषविशेषैः च पुनः અને ભિન્ન ભિન્ન દોષથી और भिन्न भिन्न दोषसे, कुष्ठानि કુષ્ઠો कुष्ठों, ज्ञायन्ते જણાય છે जाने जाते हैं, तैः અર્થાત્ તે કાર્યરૂપ ભિન્ન ભિન્ન કુષ્ઠોથી अर्थात् उन कार्यरूप भिन्न भिन्न कुष्ठोंसे, हेतुः કારણરૂપ દોષો પ્રકાશિત થાય છે कारणरूप दोषों प्रकाशित होते हैं, हेतुः च અને કારણરૂપ દોષો और कारणरूप दोषों, तान् च તે કાર્યરૂપ ભિન્ન ભિન્ન કુષ્ઠોને उन कार्यरूप भिन्न भिन्न कुष्ठोंको, प्रकाशयति પ્રકાશિત કરે છે प्रकाशित करते हैं ॥ ३३ ॥

33. By the diagnosis of the particular variety of the dermatosis, the predominant humoral morbidity is known and similarly by the diagnosis of the predominant morbid humor, the variety of the dermatosis is recognised. The characteristics of diseases throw light on the nature of the causative humors and the causative humors in turn throw light on the nature of the disease.

कुष्ठेषु दोषलिङ्गानि —

रौक्ष्यं शोषस्तोदः शूलं संकोचनं तथाऽऽयामः ।
पारुष्यं खरभावो हर्षः श्यावारुणत्वं च ॥३४॥
कुष्ठेषु वातलिङ्गं, दाहो रागः परिस्रवः पाकः ।
विस्रो गन्धः क्लेदस्तथाऽङ्गपतनं च पित्तकृतम् ॥३५॥

कुष्ठेषु કુષ્ઠોમાં कुष्ठोंमें, रौक्ष्यम् રૂક્ષતા रूक्षता, शोषः શોષ शोष, तोदः પીડા तोद, शूलम् શૂલ शूल, संकोचनम् સંકોચ संकोच, तथा તથા तथा, आयामः વિસ્તાર विस्तार, पारुष्यम् કઠોરતા परुषता, खरभावः ખરબચડાપણું खरता, हर्षः હર્ષ हर्ष, श्यावारुणत्वम् च શ્યાવ અને રક્તવર્ણવાળાપણું श्याम और लाल रंगका होना, वातलिङ्गम् એ વાતનાં લક્ષણો છે ये वातके लक्षण हैं, दाहः દાહ दाह, रागः રતાશ लाली, परिस्रवः સ્રાવ स्राव, पाकः પાક पाक, विस्रः गन्धः આમગન્ધ आमगन्ध, क्लेदः ક્લેદ क्लेद, तथा તથા तथा, अ पतनम् અંગપતન अंगपतन, पित्तकृतम् એ પિત્તનાં લક્ષણો છે ये पित्तके लक्षण हैं ॥ ३४-३५ ॥

34-35. Dryness, atrophy, pricking pain, aching pain, contraction, dilatation, hardness, roughness, horripilation and dusky-red coloration are the signs and symptoms of dermatosis of

३३. तैः हेतुः – ते हेतुम् (ग. च. छ. ध.)

३४. तथाऽऽयामः – तथाऽऽयासः (क. ख. ग. छ.)

the vata type. Burning, redness, exudation, suppuration, smell of raw-meat, softening and sloughing are the symptoms of dermatosis of the pitta type.

श्वैत्यं शैत्यं कण्डूः स्थैर्यं चोत्सेधगौरवस्नेहाः ।
कुष्ठेषु तु कफलिङ्गं जन्तुभिरभिभक्षणं क्लेदः ॥३६॥

कुष्ठेषु કુષ્ઠોમાં कुष्ठोंमें, श्वैत्यम् શ્વેતતા श्वैत्य, शैत्यम् શીતતા शीतता, कण्डूः ખજવાળ कंडू, स्थैर्यम् સ્થિરતા स्थैर्य, उत्सेध-गौरव- ઊંચાઈ-ગૌરવ उत्सेध-गुरुता, स्नेहाः च સ્નેહ स्निग्धता, जन्तुभिः જન્તુઓ વડે जन्तुओं द्वारा, अभिभक्षणम् ખવાવું खाया जाना, क्लेदः અને ક્લેદ और क्लेद, कफलिङ्गम् એ કફનાં લક્ષણો છે ये कफके लक्षण हैं ॥ ३६ ॥

36. Whiteness, coldness, pruritus, localisation, elevation, heaviness, sliminess, the eating away of thep art by parasites and softening are the symptoms of dermatosis of the kapha type.

कुष्ठानां साध्यासाध्यविचारः —

सर्वैर्लिङ्गैर्युक्तं मतिमान् विवर्जयेदबलम् ।
तृष्णादाहपरीतं शान्ताग्निं जन्तुभिर्जग्धम् ॥३७॥

मतिमान् બુદ્ધિમાન વૈદ્ય मतिमान वैद्य, सर्वैः लिङ्गैः સઘળાં લક્ષણોથી सब लक्षणोंसे, युक्तम् યુક્ત युक्त, अबलम् બલહીન दुर्बल, तृष्णादाह- તૃષ્ણા અને દાહથી तृष्णा तथा दाहसे, परीतम् યુક્ત पीडित, शान्ताग्निम् મંદ અગ્નિવાળા मंद अग्निवाले, जन्तुभिः અને જન્તુઓથી और जन्तुओंसे, जग्धम् ખવાઈ ગયેલા રોગીને खाये गये रोगीको, विवर्जयेत् છોડી દેવો त्याग दे ॥३७॥

37. The wise physician should consider that condition incurable which is accompanied by all the signs and symptoms combined, if the patient be low of vitality, afflicted with thirst and burning, and if his gastric fire is almost extinguished and parasites have greatly destroyed the body-tissues.

वातकफप्रबलं यद्यदेकदोषोल्बणं न तत् कृच्छ्रम् ।
कफपित्तवातपित्तप्रबलानि तु कृच्छ्रसाध्यानि ॥३८॥

यत् यत् જે જે કુષ્ઠ जो जो कुष्ठ, वातकफप्रबलम् વાતકફની પ્રબલતાવાળો वातकफकी प्रबलतावाला, एकदोषोल्बणम् तथा એક દોષની પ્રબલતાવાળો હોય तथा एक दोषकी प्रबलतावाला हो, तत् તે તે वह वह, न कृच्छ्रम् કષ્ટસાધ્ય નથી कृच्छ्रसाध्य नहीं है, कफपित्त- પરંતુ કફપિત્ત परन्तु कफपित्त, वातपित्त- તથા વાતપિત્તની तथा वातपित्तकी, प्रबलानि तु અધિકતાવાળા प्रबलतावाले, कृच्छ्रसाध्यानि કષ્ટસાધ્ય હોય છે कृच्छ्रसाध्य होते हैं ॥ ३८ ॥

38. That condition where vata and kapha are predominant or only one humor is in excess is not formidable; but the conditions where kapha and pitta or vata and pitta are predominant are formidable.

कुष्ठेषु चिकित्साक्रमः —

वातोत्तरेषु सर्पिर्वमनं श्लेष्मोत्तरेषु कुष्ठेषु ।
पित्तोत्तरेषु मोक्षो रक्तस्य विरेचनं चाग्रे ॥३९॥

वातोत्तरेषु વાતપ્રધાન वातप्रधान, कुष्ठेषु કુષ્ઠોમાં कुष्ठोंमें, अग्रे सर्पिः પહેલાં ઘૃતપાન प्रथमतः घृतपान, श्लेष्मोत्तरेषु કફપ્રધાન કુષ્ઠોમાં कफप्रधान कुष्ठोंमें, वमनम् પહેલાં વમન प्रथमतः वमन, पित्तोत्तरेषु અને પિત્તપ્રધાન કુષ્ઠોમાં और पित्तोल्बण कुष्ठोंमें, रक्तस्य मोक्षः પહેલાં રક્તમોક્ષણ प्रथमतः रक्तावसेक, विरेचनम् च અને વિરેચન કરાવવાં तथा विरेचन कराना चाहिए ॥ ३९ ॥

39. In the treatment of dermatosis where vata is predominant, ghee should be administered; where kapha

३८. °साध्यानि–°कुष्ठानि (ख. ग. घ. झ. त. द.)
३९. विरेचनं चाग्रे–विरेचनं चाद्यम् (प.)

is predominant, the vomition procedure should be done and where pitta is predominant, blood-letting should be done, after purgation is given to the patient.

वमनविरेचनयोगाः कल्पोक्ताः कुष्ठिनां प्रयोक्तव्याः ।
प्रच्छनमल्पे कुष्ठे महति च शस्तं सिराव्यधनम् ॥४०॥

कुष्ठिनाम् કુષ્ઠરોગીઓને कुष्ठियोंके लिए, कल्प-उक्ताः કલ્પસ્થાનમાં કહેલા कल्पस्थानमें कहे गये, वमन-विरेचन-योगाः વમન તથા વિરેચનના યોગોનો वमन तथा विरेचनके योग, प्रयोक्तव्याः પ્રયોગ કરવો प्रयोगमें लावे, अल्पे અલ્પ छोटे, कुष्ठे કુષ્ઠમાં कुष्ठमें, प्रच्छनम् પ્રચ્છન प्रच्छन्न, महति च तथा મહાકુષ્ઠમાં तथा बड़े कुष्ठमें, सिराव्यधनम् સિરાવેધ सिराव्यध, शस्तम् શ્રેષ્ઠ છે प्रशस्त है ॥ ४० ॥

40. The various preparations of vomition and purgation described in the Section on Pharmaceutics should be resorted to in the treatment of dermatosis. In dermatosis of minor types cupping should be done after making incision in the skin and in major types venesection is beneficial.

बहुदोषः संशोध्यः कुष्ठी बहुशोऽनुरक्षता प्राणान् ।
दोषे ह्यतिमात्रहृते वायुर्हन्यादबलमाशु ॥४१॥

प्राणान् પ્રાણનું प्राणोंकी, अनुरक्षता રક્ષણ કરતા વૈદ્યે रक्षा करते हुए वैद्यद्वारा, बहुदोषः બહુ દોષવાળા बहुत दोषवाले, कुष्ठी કુષ્ઠના રોગીના कुष्ठके रोगीके, बहुशः ઘણી વાર बहुत बार, संशोध्यः થોડા થોડા દોષનું સંશોધન કરાવવું જોઈએ थोड़े थोड़े दोषका संशोधन कराना चाहिए, हि કારણકે क्योंकि, दोषे દોષોનું दोषके, अतिमात्रहृते અત્યંત નિર્હરણ થતાં अति अधिक मात्रामें हरण होने पर, वायुः વાયુ वायु, अबलम् નિર્બળ થયેલા રોગીઓને निर्बल हुए कुष्ठरोगीको, आशु તુરત शीघ्र, हन्यात् હણી નાખે છે वध करता है ॥ ४१ ॥

41. The patient with excessive morbidity should be subjected repeatedly to the purificatory procedures taking care to preserve his strength and vitality, for if excessive elimination of the impurities is done then the vata getting provoked quickly overpowers the debilitated patient.

स्नेहस्य पानमिष्टं शुद्धे कोष्ठे प्रवाहिते रक्ते ।
वायुर्हि शुद्धकोष्ठं कुष्ठिनमबलं विशति शीघ्रम् ॥४२॥

कोष्ठे કોઠો कोष्ठके, शुद्धे શુદ્ધ થયા પછી અર્થાત્ વમન અથવા વિરેચન પછી शुद्ध हो जाने पर अर्थात् वमन अथवा विरेचनके बाद, रक्ते तथा રક્તનું तथा रक्तके, प्रवाहिते મોક્ષણ કર્યા પછી मोक्षण होने पर, स्नेहस्य સ્નેહનું स्नेहका, पानम् इष्टम् પાન કરાવવું યોગ્ય છે पान कराना इष्ट है, हि કારણ કે क्योंकि, शुद्धकोष्ठम् શુદ્ધ કોઠાવાળા शुद्ध कोष्ठवाले, अबलम् નિર્બળ दुर्बल, कुष्ठिनम् કુષ્ઠના રોગીના શરીરમાં कुष्ठीके शरीरमें, वायुः વાયુ वायु, शीघ्रम् શીઘ્ર शीघ्र, विशति પ્રવેશ કરે છે प्रविष्ट हो जाता है ॥ ४२ ॥

42. After the cleansing of the gastro- intestinal tract and after depletion of blood, a potion of unctuous medication is advised, for vata quickly makes its entry into the empty gastro-intestinal tract of the debilitated patient.

कुष्ठेषु वमनयोगाः —

दोषोत्क्लिष्टे हृदये वाम्यः कुष्ठेषु चोर्ध्वभागेषु ।
कुटजफलमदनमधुकैः सपटोलैर्निम्बरसयुक्तैः ॥४३॥

४०. महति च शस्तं सिराव्यधनम्—मतं शिराव्यधनं महति च शस्तम् (ख.)

४२. रक्ते—रुधिरे (क. ख. ग. ङ.)

४३. सपटोलैः—सक्षौद्रैः (ग.)

ऊर्ध्वभागेषु ઉપરના ભાગના ऊर्ध्वभागके, कुष्ठेषु च કુષ્ઠોમાં कुष्ठोंमें, हृदये હૃદય हृदयके, दोषोत्क्लिष्टे દોષથી ઘેરાયેલું હોય ત્યારે दोषसे उत्क्लिष्ट हो जाने पर, सपटोलैः પરવળ परवलसहित, निम्बरसयुक्तैः તેમજ લીમડાના રસથી યુક્ત एवं नीमके रससे युक्त, कुटजफल- ઇંદ્રજવ कुटज, मदन-मधुकैः મીંઢળ તથા જેઠીમધથી मैनफल तथा मुलहठीसे, वम्यः વમન કરાવવું वमन करावे ॥ ४३ ॥

43. In dermatosis affecting the upper parts of the body, if the morbid humor has got precipitated in the stomach, the patient should be subjected to the procedure of vomition by the use of kurchi seeds, emetic nut, liquorice and wild snake-gourd mixed with the juice of neem.

कुष्ठेषु विरेचनयोगाः —

शीतरसः पक्वरसो मधूनि मधुकं च वमनानि ।
कुष्ठेषु त्रिवृता दन्ती त्रिफला च विरेचने शस्ता ॥४४॥

कुष्ठेषु કુષ્ઠો માટે कुष्ठोंके लिए, शीतरसः શીતરસ (અમુક જાતનું મદ્ય) शीतरस (मद्यविशेष), पक्वरसः પકવરસ (અમુક જાતનું મદ્ય) पक्वरस (मद्यविशेष), मधूनि મધ मधु, मधुकम् च અને જેઠીમધ और मुलहठी, वमनानि च એ વમનદ્રવ્યો પ્રશસ્ત છે ये वमनद्रव्य प्रशस्त हैं, विरेचने તથા વિરેચનમાં तथा विरेचनके लिए, त्रिवृता નસોતર त्रिवृत , दन्ती દંતીમૂળ दन्ती, त्रिफला च અને ત્રિફળા और त्रिफला, शस्ता શ્રેષ્ઠ છે प्रशस्त है ॥ ४४ ॥

44. Cold infusions, decoctions as well as various kinds of honey and liquorice are used as emetics. For purgation in dermatosis, turpeth, red physic nut and three myrobalans are recommended.

सौवीरकं तुषोदकमालोडनमासवाश्च सीधूनि ।
शंसन्त्यधोहराणां यथाविरेकं क्रमश्चेष्टः ॥४५॥

अधोहराणाम् અધોહર પદાર્થોમાં विरेचनोंमें, आलोडनम् આલોડન માટે आलोडनार्थ, सौवीरकम् સૌવીરક सौवीरक, तुषोदकम् તુષોદક तुषोदक, आसवान् આસવો आसव, सीधूनि च અને સીધુઓને और सीधुकी, शंसन्ति વૈદ્યો વખાણે છે वैद्य प्रशंसा करते हैं, यथाविरेकम् च વિરેચન પછી તેને અનુસરીને विरेचनके बाद उसके अनुसार, क्रमः પેયા આદિનો ક્રમ पेया आदिका क्रम, इष्टः ઇષ્ટ છે इष्ट है ॥ ४५ ॥

45. Sauveeraka wine, tushodaka wine, sidhu wine and simple wine may be mixed with purgative preparations. When the patient is properly purged, usual after-treatment of the purgative procedure is recommended.

कुष्ठेषु आस्थापनम्—

दार्वीबृहतीसेव्यैः पटोलपिचुमर्दमदनकृतमालैः ।
सस्नेहैरास्थाप्यः कुष्ठी सकलिङ्गयवमुस्तैः ॥४६॥

स-कलिङ्ग-यव-मुस्तैः ઇંદ્રજવ, જવ અને મોથના કલ્ક સહિત इन्द्रजौ, जौ और मोथेके कल्कके साथ, सस्नेहैः તથા સ્નેહસહિત तथा स्नेहके साथ, दार्वी- દારુહળદર दारुहल्दी, बृहती- ઊભી ભોરીંગણી बनभाटा, सेव्यैः વાળો सुगन्धवाला, पटोल- પરવળ परवल, पिचुमर्द લીમડો नीम, मदन- મીંઢળ मदन, कृतमालैः અને ગરમાળો એઓના ક્વાથથી और अमलतास इनके क्वाथसे, कुष्ठी કુષ્ઠના રોગીને कुष्ठीको, आस्थाप्यः આસ્થાપનબસ્તિ આપવી आस्थापनबस्ति देनी चाहिए ॥ ४६ ॥

46. The patient is to be administered corrective enema prepared of indian berberry, yellow-berried nightshade, fragrant sticky mallow, bitter snake-gourd, neem, emetic nut, purging cassia mixed with kurchi seeds

४४. कुष्ठेषु—कुष्ठे (ग. च. छ.)
४५. आसवाश्च सीधूनि—आसवांस्तु शीध्वादीन् (ख. घ. ङ.)
४६. यवमुस्तैः—फलमुस्तैः (ग. च.).

and nut-grass and with unctuous substances.

कुष्ठेषु अनुवासनम्—

वातोल्बणं विरिक्तं निरूढमनुवासनार्हमालक्ष्य ।
फलमधुकनिम्बकुटजैः सपटोलैः साधयेत्स्नेहम् ४७

विरिक्तम् વિરેચન આપવામાં આવેલા विरेचन दिये गये, निरूढम् તથા નિરૂહબસ્તિ આપવામાં આવેલા तथा निरूहबस्ति दिये गये, वातोल्बणम् વાત-પ્રધાન કુષ્ઠવાળાને वातप्रधान कुष्ठीको, अनुवासनार्हम् અનુવાસનને યોગ્ય अनुवासनयोग्य, आलक्ष्य જાણીને देखकर, सपटोलैः પરવળસહિત परवलसहित, फल- મીંઢળ मैनफल, मधुक- જેઠીમધ मुलहठी, निम्ब- લીમડો नीम, कुटजैः અને કડો એઓથી और कुड़ा इनसे, स्नेहम् સ્નેહને स्नेहको, साधयेत् સિદ્ધ કરી અનુવાસન આપવું सिद्ध कर अनुवासन देना चाहिए ॥४७॥

47. If after purgation and evacuative enema, vata has become increased and the physician thinks it necessary to give an unctuous enema, he should administer the unctuous substance prepared with emetic nut, liquorice, neem, kurchi and bitter snake-gourd.

कुष्ठेषु नस्यम्—

सैन्धवदन्तीमरिचं फणिज्झकः पिप्पली करञ्जफलम् ।
नस्यं स्यात्सविडङ्गं क्रिमिकुष्ठकफप्रकोपघ्नम् ॥४८॥

सैन्धव- સિંધાલૂણ सैन्धव, दन्ती- દંતીમૂળ दन्ती, मरिचम् કાળાં મરી मरिच, फणिज्झकः મરવો मर्वा, पिप्पली પીપર पिप्पली, सविडङ्गम् તથા વાવડિંગ સહિત तथा वायविडंगसहित करञ्जफलम् કરંજનાં બીજ એઓથી બનાવેલું ઠીઠોદરી बीज इनसे बनाये हुए, नस्यम् નસ્ય नस्य, क्रिमि- ક્રિમિ कृमि, कुष्ठ- કુષ્ઠ कुष्ठ, कफ-प्रकोपघ्नम् તથા કફના પ્રકોપને દૂર કરનાર तथा कफ-प्रकोपका नाशक, स्यात् થાય છે होता है ॥४८॥

48. Nasal medication prepared of rock-salt, red physic nut, black pepper, sweet marjoran, long pepper, fruits of indian beech and embelia, is curative of parasitic infection, dermatosis and provoked kapha.

कुष्ठेषु धूमपानम्—

वैरेचनिकैर्धूमैः श्लोकस्थानेरितैः प्रशाम्यन्ति ।
क्रिमयः कुष्ठकिलासाः प्रयोजितैरुत्तमाङ्गस्थाः ॥४९॥

श्लोकस्थान- સૂત્રસ્થાનમાં सूत्रस्थानमें, ईरितैः કહેલા कहे गये, वैरेचनिकैः વૈરેચનિક वैरेचनिक, धूमैः ધૂમોનો धूमोंको, प्रयोजितैः પ્રયોગ કરવાથી प्रयोग करनेसे, उत्तमाङ्गस्थाः મસ્તકમાં રહેલા शिरमें उत्पन्न, क्रिमयः કૃમિઓ कृमि, कुष्ठकिलासाः કુષ્ઠ તથા કિલાસ कुष्ठ और किलास, प्रशाम्यन्ति શાંત થઈ જાય છે शान्त होते हैं ॥४९॥

49. By using errhine smokes described in the Section on General Principles, the parasitic infection in the head and leprous skin-lesions situated in the head get alleviated.

कुष्ठेषु रक्तमोक्षः—

स्थिरकठिनमण्डलानां स्विन्नानां प्रस्तरप्रणाडीभिः ।
कूर्चैर्विघट्टितानां रक्तोत्क्लेशोऽपनेतव्यः ॥५०॥

प्रस्तरप्रणाडीभिः પ્રસ્તરસ્વેદ તથા નાડીસ્વેદથી प्रस्तर और नाडीस्वेदोंसे, स्विन्नानाम् સ્વેદન આપવામાં આવેલા स्वेदन किये गये, स्थिरकठिन- સ્થિર તથા કઠિન स्थिर तथा कठिन, मण्डलानाम् મંડલવાળાં કુષ્ઠોને

४७. मधुक–त्रिफला (प.)
४८. सैन्धवदन्तीमरिचम्–दन्तीमधूकसैंधवफणिज्झकः (ख. म. ड. ज.)
,, मरिचम्–मधुकम् (क. च. व.)
,, प्रकोपघ्नम्–प्रदोपघ्नम् (ग. घ. ध.)
४९. °स्थानेरितैः प्रशाम्यन्ति–°स्थानेरितैश्च शाम्यन्ति (घ.)
५०. रक्तोत्क्लेशः–रसोत्क्लेशः (प.)

मण्डलवाले कुष्ठोंको, कूर्चैः કૂર્ચ શસ્ત્રથી कूर्चशस्त्रसे, विघट्टितानाम् ઘર્ષણ કરીને घर्षण करके, रक्तोत्क्लेशः રક્તનો ઉત્ક્લેશ रक्तका उत्क्लेश, अपनेतव्यः દૂર કરવો दूर करना चाहिए ॥ ५० ॥

50. The firm and indurated skin-lesions of the Mandala dermatosis, should be sweated by the hot-bed and steam-kettle methods of sudation and then the congestion of blood in the lesions should be relieved by rubbing them with the kurcha (a brush-like instrument).

आनूपवारिजानां मांसानां पोट्टलैः सुखोष्णैश्च ।
स्विन्नोत्सन्नं विलिखेत् कुष्ठं तीक्ष्णेन शस्त्रेण ॥५१॥

आनूप-वारिजानाम् અનૂપ દેશમાં ઉત્પન્ન થયેલા તથા જલચર પ્રાણીઓના आनूप तथा जलज प्राणियोंके, मांसानाम् માંસની मांसोंके, सुखोष्णैः च સહન થાય એટલી ઉની सुखोष्ण, पोट्टलैः પોટલીઓ વડે पोटलियोंसे, स्विन्नोत्सन्नम् સ્વેદન આપેલા તથા ઉપર આવેલા स्वेदन किये गये तथा उभर आये हुए, कुष्ठम् કુષ્ઠનું कुष्ठको, तीक्ष्णेन તીક્ષ્ણ तीक्ष्ण, शस्त्रेण શસ્ત્ર વડે शस्त्रसे, विलिखेत् લેખન કરવું लेखन करना चाहिए ॥ ५१ ॥

51. After sweating the patient with the congenially hot lump-sudation method with the flesh of the wet-land and aquatic animals, the elevated skin lesions should be scraped with a sharp instrument.

रुधिरागमार्थमथवा शृङ्गालाबूनि योजयेत् कुष्ठे ।
प्रच्छितमल्पं कुष्ठं विरेचयेद्वा जलौकोभिः ॥५२॥

अथवा અથવા अथवा, रुधिरागमार्थम् રુધિરના સ્રાવ માટે रक्तके स्रावके लिए, कुष्ठे શસ્ત્રથી થોડા છેકા મારી કુષ્ઠ ઉપર अल्प प्रच्छान कर कुष्ठपर, शृङ्ग-अलाबूनि શીંગડી અથવા તુંબડીનો शृंग या अलाबूका, योजयेत् ઉપયોગ કરવો उपयोग करे, अल्पम् અથવા થોડા अथवा अल्प, प्रच्छितम् શસ્ત્રથી છેકા મારેલા प्रच्छान किये गये, कुष्ठम् કુષ્ઠને कुष्ठको, जलौकोभिः વા જળોથી जौकोंद्वारा, विरेचयेत् શુદ્ધ કરવો शोधन करे ॥५२॥

52. And for drawing out the blood a horn or bottle gourd may be applied after making superficial lesions (wet cupping) in the skin, or the part may be depleted by application of leeches.

ये लेपाः कुष्ठानां युज्यन्ते निर्हृतास्रदोषाणाम् ।
संशोधिताशयानां सद्यः सिद्धिर्भवेत्तेषाम् ॥५३॥

संशोधित-आशयानाम् શુદ્ધ કોઠાવાળા પુરુષોના शुद्ध कोष्ठवाले पुरुषोंके, निर्हृत-अस्र-दोषाणाम् દૂર થયેલા રક્તદોષવાળા निकल गये रक्तदोषवाले, कुष्ठानाम् કુષ્ઠો ઉપર कुष्ठों पर, ये लेपाः જે લેપોનો जो लेप, युज्यन्ते ઉપયોગ કરવામાં આવે છે लगाये जाते हैं, तेषाम् તેઓથી उनसे, सद्यः તુરત शीघ्र, सिद्धिः સફળતા सिद्धि, भवेत् મળે છે होती है ॥ ५३ ॥

53. The external applications which are used after thoroughly removing the vitiated blood from the lesions in those who have been administered the purificatory procedure, prove to be immediately effective.

कुष्ठेषु क्षारः —

येषु न शस्त्रं क्रमते स्पर्शेन्द्रियनाशनानि यानि स्युः ।
तेषु निपात्यः क्षारो रक्तं दोषं च विस्राव्य ॥५४॥

येषु જેમાં जिनमें, शस्त्रम् न क्रमते શસ્ત્રપ્રયોગ કરવો યોગ્ય હોતો નથી शस्त्रकर्म नहीं किया जा सकता, यानि અને જે और जो, स्पर्शेन्द्रियनाशनानि સ્પર્શેન્દ્રિયનો

५१. स्विन्नोत्सन्नं–स्विन्नोत्स्विन्नम् (च. च. दं. ब.)
५२. अल्पं–अन्यं (ग.)
,, शृङ्गालाबूनि योजयेत् कुष्ठे–शृङ्गालाबूमिराहरेद्रक्तम् (स.त.ब.)
,, ,, ,, ,, –शृङ्गालाबूमिराहरेद्रुधिरम् (ब.)

५३. निर्हृतास्रदोषाणाम्–निःसृतास्रदोषाणाम् (ब.)

નાશ કરનારા स्पर्शेन्द्रियको नाश करनेवाले, स्युः હોય છે होते हैं, तेषु તેમાંથી उनमेंसे, रक्तम् રક્ત रक्त, दोषम् च તથા દોષને તથા दोषको, विस्राव्य સ્રાવ કરીને निकाल कर, क्षारः ક્ષારનો क्षारको, निपात्यः પ્રક્ષેપ કરવો अवचारण करना चाहिए ॥ ५४ ॥

54. Where the use of instruments is not advisable and where there is anesthesia, application of caustics should be done after removing the vitiated blood and the morbidity.

कुष्ठेषु विषप्रलेपः —

पाषाणकठिनपरुषे सुप्ते कुष्ठे स्थिरे पुराणे च ।
पीतागदस्य कार्यो विषैः प्रदेहोऽगदैश्चानु ॥५५॥

पाषाणकठिन- પથ્થરના જેવા કઠણ पाषाण जैसे कठिन, परुषे તથા ખરબચડા खुरदरे, सुप्ते स्थिरे સ્પર્શજ્ઞાનરહિત, સ્થિર सुप्त, स्थिर, पुराणे च તથા જૂના और पुराने, कुष्ठे કુષ્ઠમાં कुष्ठमें, पीतागदस्य જેણે અગદનું પાન કર્યું છે એવાને अगद पिये हुए को, विषैः પ્રથમ વિષોથી प्रथम विषोंसे, अनु અને પછી और पश्चात्, अगदैः च અગદોથી अगदोंसे, प्रदेहः લેપ प्रलेह, कार्यः કરવો करना चाहिए ॥ ५५ ॥

55. If the skin lesions are stony hard, indurated and devoid of sensation, localised and chronic, then the patient after being administered antidotes as internal medication, should be given an external application of the same poisonous drugs.

कुष्ठेषु लेपात्पूर्वं घर्षणविधानम् —

स्तब्धानि सुप्तसुप्तान्यस्वेदनकण्डुलानि कुष्ठानि ।
कूर्चैर्दन्तीत्रिवृताकरवीरकरञ्जकुटजानाम् ॥५६॥
जात्यर्कनिम्बजैर्वा पत्रैः शस्त्रैः समुद्रफेनैर्वा ।
घृष्टानि गोमयैर्वा ततः प्रदेहैः प्रदेह्यानि ॥५७॥

